यस्य अभ्यंतरे जगत् वसति जगतोऽभ्यंतरे य एव ।
जगति वसन्नपि जगत् एव नापि मन्यस्व परमात्मानं तमेव ॥ ४१ ॥

यस्य केवलज्ञानस्याभ्यंतरे जगत् त्रिभुवनं ज्ञेयभूतं वसति जगतोऽभ्यंतरे योसौ ज्ञायको भगवानपि वसति जगति वसन्नेव रूपविषये चक्षुरिव निश्चयनयेन तन्मयो न भवति मन्यस्व जानीहि हे प्रभाकरभट्ट । तमित्थंभूतं परमात्मानं वीतरागनिर्विकल्पसमाधौ स्थित्वा भावयेत्यर्थः । अत्र योसौ केवलज्ञानादिव्यक्तिरूपस्य कार्यसमयसारस्य वीतरागस्वसंवेदनकाले मुक्तिकारणं भवति स एवोपादेय इति भावार्थः ॥ ४१ ॥

अथ देहे वसन्नपि हरिहरादयः परमसमाधेरभावादेव न जानंति स परमात्मा भवतीति कथयंति;—

है अन्य कोई भी दूसरोंकर कल्पित परमात्मा नहीं है । यह आत्मा ही परमात्माकी प्राप्तिके शत्रु तीन वेदों (स्त्रीलिंगादि) कर उत्पन्न हुए रागादि विकल्पजालोंको निर्विकल्पसमाधिसे जिस समय नाश करता है उसी समय उपादेयरूप मोक्षसुखका कारण होनेसे उपादेय हो जाता है ॥ ४० ॥

आगे जिस परमात्माके केवलज्ञानरूप प्रकाशमें जगत वस रहा है और जगतके मध्यमें वह ठहर रहा है तौभी वह जगतरूप नहीं है ऐसा कहते हैं;—[**यस्य**] जिस आत्मारामके [**अभ्यंतरे**] केवलज्ञानमें [**जगत्**] संसार [**वसति**] वस रहा है अर्थात् प्रतिबिंबित हो रहा है प्रत्यक्ष भास रहा है [**जगदभ्यंतरे**] और जगतमें वह वस रहा है अर्थात् सबमें व्याप रहा है । वह ज्ञाता है और जगत ज्ञेय है [**जगति वसन्नपि**] संसारमें निवास करताहुआ भी [**जगदेव नापि**] निश्चयनयकर किसी जगतकी वस्तुसे तन्मय (उस स्वरूप) नहीं होता अर्थात् जैसे रूपी पदार्थको नेत्र देखते हैं तौभी उनसे जुदे ही रहते हैं इसतरह वह भी सबसे जुदा रहता है [**तमेव**] उसीको [**परमात्मानं**] परमात्मा [**मन्यस्व**] हे प्रभाकरभट्ट तू जान । **भावार्थ**—जो शुद्ध बुद्ध सर्वव्यापक सबसे अलिप्त शुद्धात्मा है उसे वीतराग निर्विकल्प समाधिमें स्थिर होकर ध्यान कर । जो केवलज्ञानादिव्यक्तिरूप कार्यसमयसार है उसका कारण वीतरागस्वसंवेदन ज्ञानरूप निजभाव ही उपादेय है ॥ ४१ ॥

**देहि वसंतुवि हरिहरवि, जं अज्जवि ण मुणंति ।
परमसमाहितवेण विणु, सो परमप्पु भणंति ॥ ४२ ॥**

देहे वसन्नपि हरिहरा अपि यं अद्यापि न जानंति ।
परमसमाधितपसा विना तं परमात्मानं भणंति ॥ ४२ ॥

परमात्मस्वभावविलक्षणे देहे अनुपचरितासद्भूतव्यवहारनयेन वसन्नपि हरिहरा अपि यमद्यापि न जानंति । केन विना । वीतरागनिर्विकल्पनित्यानंदैकसुखामृतरसास्वादरूपपरमसमाधितपसा, तं परमात्मानं भणंति वीतरागसर्वज्ञा इति । किंच । पूर्वभवे कोपि जीवो भेदाभेदरत्नत्रयाराधनां कृत्वा विशिष्टपुण्यबंधं च कृत्वा पश्चादज्ञानभावेन निदानबंधं करोति तदनंतरं स्वर्गं गत्वा पुनर्मनुष्यो भूत्वा त्रिखंडाधिपतिर्वासुदेवो भवति । अन्यः कोपि जिनदीक्षां गृहीत्वाप्यत्रैव भवे विशिष्टसमाधिबलेन पुण्यबंधं कृत्वा पश्चात्पूर्वकृतचारित्रमोहोदयेन विषयासक्तो भूत्वा रुद्रो भवति । कथं ते परमात्मस्वरूपं न जानंति इति पूर्वपक्षः । तत्र परिहारं ददाति । युक्तमुक्तं भवता, यद्यपि रत्नत्रयाराधनां कृतवंतस्तथापि यादृशेन वीतरागनिर्विकल्परत्नत्रयस्वरूपेण तद्भवे मोक्षो भवति तादृशं न जानंतीति ।

आगे वह शुद्धात्मा यद्यपि देहमें रहता है तौभी परमसमाधिके अभावसे हरिहरादिक सरीखे भी जिसे प्रत्यक्ष नहीं जान सकते वह परमात्मा है ऐसा कहते हैं;—[**देहे**] परमात्मस्वभावसे भिन्न शरीरमें [**वसन्नपि**] अनुपचरित असद्भूत व्यवहार नयकर वसता है तौभी [**यं**] जिसको [**हरिहरा अपि**] हरि हर सरीखे चतुर पुरुष [**अद्य अपि**] अबतक भी [**न जानंति**] नहीं जानते हैं । किसके विना [**परमसमाधितपसा विना**] वीतरागनिर्विकल्प नित्यानंद अद्वितीय सुखरूप अमृतके रसके आस्वादरूप परमसमाधिभूत महातपके विना नहीं जानते [**तं**] उसको [**परमात्मानं**] परमात्मा [**भणंति**] कहते हैं । यहां किसीका प्रश्न है कि पूर्वभवमें कोई जीव जिनदीक्षा धारणकर व्यवहार निश्चयरूप रत्नत्रयकी आराधनाकर महान् पुण्यको उपार्जन करके अज्ञानभावसे निदान बंध करनेके वाद स्वर्गमें उत्पन्न होता है पीछे आकर मनुष्य होता है वही तीन खंडका स्वामी वासुदेव (हरि) कहलाता है। और कोई जीव इसीभवमें जिनदीक्षा लेकर समाधिके बलसे पुण्यबंध करता है, उसके वाद पूर्वकृत चारित्रमोहके उदयसे विषयोंमें लीन हुआ रुद्र (हर) कहलाता है । इसलिये वे हरिहरादिक परमात्माका स्वरूप कैसे नहीं जानते? इसका समाधान यह है कि तुह्मारा कहना ठीक है । यद्यपि इन हरिहरादिक महान् पुरुषोंने रत्नत्रयकी आराधना की तौभी जिसतरहके वीतरागनिर्विकल्परत्नत्रयस्वरूपसे तद्भव मोक्ष होती है वैसा रत्नत्रय इनके नहीं प्रगट हुआ सरागरत्नत्रय हुआ है इसीका नाम व्यवहाररत्नत्रय है सो यह तो हुआ लेकिन शुद्धोपयोगरूप वीतरागरत्नत्रय नहीं हुआ इसलिये वीतरागरत्नत्रयके धारक उसी भवसे मोक्ष जानेवाले योगी जैसा जानते हैं वैसा ये हरि-

अत्रायमेव शुद्धात्मानं साक्षादुपादेयभूतं तद्भवमोक्षसाधकाराधनासमर्थं च ते हरिहरादयो न जानंतीति स एवोपादेयो भवतीति भावार्थः ॥ ४२ ॥

अथोत्पादव्ययपर्यायार्थिकनयेन संयुक्तोपि यः द्रव्यार्थिकनयेन उत्पादव्ययरहितः स एव परमात्मा निर्विकल्पसमाधिबलेन जिनवरैर्देहेपि दृष्ट इति निरूपयति;—

भावाभावहिं संजुवउ, भावाभावहिं जो जि।
देहि जि दिट्ठउ जिणवरहिं, मुणि परमप्पउ सो जि ॥ ४३ ॥

भावाभावाभ्यां संयुक्तः भावाभावाभ्यां य एव
देहे अपि दृष्टः जिनवरैः मन्यस्व परमात्मानं तमेव ॥ ४३ ॥

भावाभावाभ्यां संयुक्तः पर्यायार्थिकनयेनोत्पादव्ययाभ्यां परिणतः द्रव्यार्थिकनयेन भावाभावयोः रहितः य एव वीतरागनिर्विकल्पसदानंदैकसमाधिना तद्भवमोक्षसाधकाराधनासमर्थेन जिनवरैर्देहेपि दृष्टः तमेव परमात्मानं मन्यस्व जानीहि वीतरागपरमसमाधिबलेनानुभवेत्यर्थः । अत्र य एव परमात्मा कृष्णनीलकापोतलेश्यास्वरूपादिसमस्तविभावरहितेन शुद्धात्मोपलब्धेः ध्यानेन जिनवरैर्देहेपि दृष्टः स एव साक्षादुपादेय इति तात्पर्यार्थः ॥ ४३ ॥

हरादिक नहीं जानते । इसीलिये परम शुद्धोपयोगियोंकी अपेक्षा इनको नहीं जाननेवाले कहा गया है क्योंकि जैसे स्वरूपके जाननेसे साक्षात् मोक्ष होती है वैसा स्वरूप ये नहीं जानते । यहांपर सारांश यह है कि जिस साक्षात् उपादेय शुद्धात्माको तद्भव मोक्षके साधक महामुनि ही आराध सकते हैं और हरिहरादिक नहीं जान सकते वही चिंतवन करने योग्य है ॥ ४२ ॥

आगे यद्यपि पर्यायार्थिकनयकर उत्पादव्ययकर सहित है तौभी द्रव्यार्थिक नयकर उत्पाद व्यय रहित है सदा ध्रुव (अविनाशी) ही है वही परमात्मा निर्विकल्प समाधिके बलसे तीर्थंकर देवोंने देहमें भी देखलिया है ऐसा कहते हैं;—[**य एव**] जो [**भावाभावाभ्यां**] व्यवहार नयकर यद्यपि उत्पाद और व्ययकर सहित है तौभी द्रव्यार्थिकनयसे [**भावाभावाभ्यां**] उत्पाद और विनाशसे ["रहितः"] रहित है तथा [**जिनवरैः**] वीतरागनिर्विकल्प आनंदरूपसमाधिकर तद्भवमोक्षके साधक जिनवरदेवने [**देहे अपि**] देहमें भी [**दृष्टः**] देखलिया है [**तमेव**] उसीको तू [**परमात्मानं**] परमात्मा [**मन्यस्व**] जान अर्थात् वीतराग परम समाधिके बलसे अनुभव कर । **भावार्थ**—जो परमात्मा कृष्ण नील कापोतलेश्यारूप विभाव परिणामोंसे रहित शुद्धात्मकी प्राप्तिरूप ध्यानकर जिनवर देवने देहमें देखा है वही साक्षात् उपादेय है ॥ ४३ ॥

अथ येन देहे वसता पंचेंद्रियग्रामो वसति गतेनोद्वसो भवति स एव परमात्मा भवतीति कथयति;—

देहि वसंतें जेण पर, इंदियगामु वसेइ ।
उव्वसु होइ गएण फुडु, सो परमप्पु हवेइ ॥ ४४ ॥

देहे वसता येन परं इंद्रियग्रामः वसति ।
उद्वसो भवति गतेन स्फुटं स परमात्मा भवति ॥ ४४ ॥

देहे वसता येन परं नियमेनेन्द्रियग्रामो वसति येनात्मना निश्चयेनातीन्द्रियस्वरूपेणापि व्यवहारनयेन शुद्धात्मविपरीते देहे वसता स्पर्शनादीन्द्रियग्रामो वसति, स्वसंवित्त्यभावे स्वकीयविषये प्रवर्तत इत्यर्थः । उद्वसो भवति गतेन स एवेंद्रियग्रामो यस्मिन् भवांतरगते सत्युद्वसो भवति स्वकीयविषयव्यापाररहितो भवति स्फुटं निश्चितं स एवं लक्षणश्चिदानंदैकस्वभावः परमात्मा भवतीति । अत्र य एवातींद्रियसुखास्वादसमाधिरतानां मुक्तिकारणं भवति स एव सर्वप्रकारोपादेयातीन्द्रियसुखसाधकत्वादुपादेय इति भावार्थः ॥ ४४ ॥

अथ यः पंचेन्द्रियैः पंचविषयान् जानाति स च तैर्न ज्ञायते स परमात्मा भवतीति निरूपयति;—

जो णियकरणहिं पंचहिंवि, पंचवि विसय मुणेइ ।
मुणिउ ण पंचहि पंचहिवि, सो परमप्पु हवेइ ॥ ४५ ॥

यः निजकरणैः पंचभिरपि पंचापि विषयान् मनुते ।
मतो न पंचभिः पंचभिरपि स परमात्मा भवति ॥ ४५ ॥

यो निजकरणैः पंचभिरपि पंचापि विषयान् मनुते जानाति । तद्यथा । यः कर्ता

आगे देहमें जिसके रहनेसे पांचइंद्रीरूप गांव वसता है और जिसके निकलनेसे पंचेंद्रियरूप ग्राम ऊजड़ हो जाता है वह परमात्मा है ऐसा कहते हैं;—[**येन परं देहे वसता**] जिसके केवल देहमें रहनेसे [**इन्द्रियग्रामः**] इंद्रियगाम [**वसति**] रहता है [**गतेन**] और जिसके परभवमें चले जाने पर [**उद्वसः स्फुटं भवति**] ऊजड़ निश्चयसे हो जाता है [**स परमात्मा**] वह परमात्मा [**भवति**] है । **भावार्थ**—शुद्धात्मासे जुदी ऐसी देहमें वसते आत्मज्ञानके अभावसे ये इंद्रियां अपने २ विषयोंमें (रूपादिमें) प्रवर्तती हैं और जिसके चले जानेपर अपने २ विषयव्यापारसे रुक जातीं हैं ऐसा चिदानंद निज आत्मा वही परमात्मा है । अतींद्रियसुखके आस्वादी परमसमाधिमें लीन हुए मुनियोंको ऐसे परमात्माका ध्यान ही मुक्तिका कारण है वही अतीन्द्रियसुखका साधक होनेसे सब तरह उपादेय है ॥ ४४ ॥

आगे जो पांच इंद्रियोंसे पांच विषयोंको जानता है और आप इंद्रियोंके गोचर नहीं

शुद्धनिश्चयनयेनातीन्द्रियज्ञानमयोपि अनादिबंधवशात् असद्भूतव्यवहारेणेंद्रियमयशरीरं गृहीत्वा स्वयमर्थान् गृहीतुमसमर्थत्वात्पंचेंद्रियैः कृत्वा पंचविषयान् जानाति इन्द्रियज्ञानेन परिणमतीत्यर्थः । पुनश्च कथंभूतः । **मुणिउ ण पंचहि पंचहिं वि सो परमप्पु हवेइ** मतो न ज्ञातो न पंचभिरिंद्रियैः पंचभिरपि स्पर्शादिविषयैः । तथाहि—वीतरागनिर्विकल्पस्वसंवेदनज्ञानविषयोपि पंचेंद्रियैश्च न ज्ञात इत्यर्थः । स एवं लक्षणः परमात्मा भवतीति । अत्र य एव पंचेंद्रियविषयसुखास्वादविपरीतेन वीतरागनिर्विकल्पपरमानंदसमरसीभावसुखरसास्वादपरिणतेन समाधिना ज्ञायते स एवात्मोपादानसिद्धमित्यादिविशेषणविशिष्टस्योपादेयभूतस्यातींद्रियसुखस्य साधकत्वादुपादेय इति भावार्थः ॥ ४५ ॥

अथ यस्य परमार्थेन बंधसंसारौ न भवतस्तमात्मानं व्यवहारं मुक्त्वा जानीहि इति कथयति;—

जसु परमत्थें बंधु णवि, जोइय णवि संसारु ।
सो परमप्पउ जाणि तुहुं, मणि मिल्लिहिं ववहारु ॥ ४६ ॥

यस्य परमार्थेन बंधो नैव योगिन् नापि संसारः ।
तं परमात्मानं जानीहि त्वं मनसि मुक्त्वा व्यवहारम् ॥ ४६ ॥

जसु परमत्थें बंधु णवि जोइय णवि संसारु यस्य परमार्थेन बंधो नैव हे योगिन्

होता है वही परमात्मा है यह कहते हैं;—[**यः**] जो आत्माराम शुद्धनिश्चयनयकर अतीन्द्रिय ज्ञानमय है तौभी अनादि बंधके कारण व्यवहार नयसे इंद्रियमयी शरीरको ग्रहणकर [**निजकरणैः पंचभिरपि**] अपनी पांचों इंद्रियों द्वारा [**पंचापि विषयान्**] रूपादि पांचों ही विषयोंको जानता है अर्थात् इंद्रियज्ञानरूप परिणमन करके इंद्रियोंसे रूप रस गंध शब्द स्पर्शको जानता है और आप [**पंचभिः**] पांच इंद्रियोंकर तथा [**पंचभिरपि**] पांचों विषयोंकर भी [**मतो न**] नहीं जाना जाता अगोचर है [**स परमात्मा**] ऐसे लक्षण जिसके हैं वही परमात्मा [**भवति**] है । **भावार्थ**—पांच इंद्रियोंके विषये सुखके आस्वादसे विपरीत वीतराग निर्विकल्प परमानंद समरसीभावरूप सुखके रसका आस्वादरूप परमसमाधि उसकरके जो जाना जाता है वही परमात्मा है वह ज्ञानगम्य है इंद्रियोंसे अगम्य है और उपादेयरूप अतींद्रिय सुखका साधन अपना स्वभावरूप वही परमात्मा आराधने योग्य है ॥ ४५ ॥

आगे जिसके निश्चयकर बंध नहीं है और संसार भी नहीं है उस आत्माको सब लौकिकव्यवहार छोड़कर अच्छीतरह पहचानो ऐसा कहते हैं;—[**हे योगिन्**] हे योगी [**यस्य**] जिस चिदानंद शुद्धात्माके [**परमार्थेन**] निश्चयकरके [**संसारः**] निज स्वभावसे भिन्न द्रव्यक्षेत्रकालभवभावरूप पंचप्रकार परिवर्तन (भ्रमण) स्वरूप संसार [**नैव**]

नापि संसारः । तद्यथा—यस्य चिदानंदैकस्वभावशुद्धात्मनस्तद्विलक्षणो द्रव्यक्षेत्रकालभवभावरूपः परमागमप्रसिद्धः पंचप्रकारः संसारो नास्ति इत्थंभूतसंसारस्य कारणभूतप्रकृतिस्थित्यनुभागप्रदेशभेदभिन्नकेवलज्ञानाद्यनंतचतुष्टयव्यक्तिरूपमोक्षपदार्थाद्विलक्षणो बंधोपि नास्ति **सो परमप्पउ जाणि तुहुं मणि मिल्लिहिं ववहारु** तमेवेत्थंभूतलक्षणं परमात्मानं मनसि व्यवहारं मुक्त्वा जानीहि वीतरागनिर्विकल्पसमाधौ स्थित्वा भावयेत्यर्थः । अत्र य एव शुद्धात्मानुभूतिविलक्षणेन संसारेण बंधनेन च रहितः स एवानाकूलत्वलक्षणसर्वप्रकारोपादेयभूतमोक्षसुखसाधकत्वादुपादेय इति तात्पर्यार्थः ॥ ४६ ॥

अथ यस्य परमात्मनो ज्ञानं वल्लीवत् ज्ञेयास्तित्वाभावेन निवर्तते न च शक्त्यभावेनेति कथयति;—

णेयाभावें विल्लि जिम, थक्कइ णाणु वलेवि ।
मुक्कहं जसु पय बिंबियउ, परमसहाउ भणेवि ॥ ४७ ॥

ज्ञेयाभावे वल्ली यथा तिष्ठति ज्ञानं बलेपि ।
मुक्तानां यस्य पदे बिंबितं परमस्वभावं भणित्वा ॥ ४७ ॥

णेयाभावे विल्लि जिम थक्कइ णाणु वलेवि ज्ञेयाभावे वल्ली यथा तथा ज्ञानं तिष्ठति व्यावृत्त्येति । यथा मंडपाद्यभावे वल्ली व्यावृत्य तिष्ठति तथा ज्ञेयावलंबनाभावे ज्ञानं व्यावृत्य तिष्ठति न च ज्ञातृत्वशक्त्यभावेनेत्यर्थः । कस्य संबंधि ज्ञानं । **मुक्कहं** मुक्तात्मनां ज्ञानं ।

नहीं है [**बंधो नापि**] और संसारके कारण जो प्रकृति स्थिति अनुभाग प्रदेशरूप चारप्रकारका बंध भी नहीं है । जो बंध केवलज्ञानादि अनंत चतुष्टयकी प्रगटतारूप मोक्षपदार्थसे जुदा है [**तं परमात्मानं**] उस परमात्माको [**त्वं**] तू [**मनसि व्यवहारं मुक्त्वा**] मनमेंसे सब लौकिक व्यवहारको छोड़कर तथा वीतरागसमाधिमें ठहरकर [**जानीहि**] जान अर्थात् चिंतवनकर । **भावार्थ**—शुद्धात्माकी अनुभूतिसे भिन्न जो संसार और संसारका कारण बंध इनदोनोंसे रहित और आकुलतासे रहित लक्षणवाला मोक्षका मूलकारण जो शुद्धात्मा है वही सर्वथा आराधने योग्य है ॥ ४६ ॥

आगे जिस परमात्माका ज्ञान सर्वव्यापक है ऐसा कोई पदार्थ नहीं है जो ज्ञानसे न जाना जावे सब ही पदार्थ ज्ञानमें भासते हैं ऐसा कहते हैं;—[**यथा**] जैसे मंडपके अभावसे [**वल्ली**] वेलि [**तिष्ठति**] थक जाती है अर्थात् जहांतक मंडप है वहांतक तो चढती रहे और आगे मंडपका सहारा न मिलनेसे चढनेसे ठहर जाती है उसीतरह [**मुक्तानां**] मुक्तजीवोंका [**ज्ञानं**] ज्ञान भी जहांतक ज्ञेय (पदार्थ) हैं वहांतक फैल जाता है [**ज्ञेयाभावे**] और ज्ञेयका अवलंबन न मिलनेसे [**बलेपि**] जाननेकी शक्ति होनेपर भी [**तिष्ठति**] ठहर जाता है अर्थात् कोई पदार्थ जाननेसे बाकी नहीं रहता

च कथंभूतं । **जसु पय विंवियउ** यस्य भगवतः पदे परमात्मस्वरूपे विंबितं प्रतिस्फलितं तदाकारेण परिणतं । कस्मात् । **परमसहाउ भणेवि** परमस्वभाव इति भणित्वा मत्वा ज्ञात्वैवेत्यर्थः । अत्र यस्येत्थंभूतं ज्ञानं सिद्धसुखस्योपादेयस्याविनाभूतं स एव शुद्धात्मोपादेय इति भावार्थः ॥ ४७ ॥

अथ यस्य कर्माणि यद्यपि सुखदुःखादिकं जनयन्ति तथापि स न जनितो न हृत इत्यभिप्रायं मनसि धृत्वा सूत्रं कथयति;—

कम्मइ जासु जणंतहिंवि, णिउ णिउ कज्जु सयावि ।
किंपि ण जणियउ हरिउ णवि, सो परमप्पउ भावि ॥ ४८ ॥

कर्मभिः यस्य जनयद्भिरपि निजनिजकार्यं सदापि ।
किमपि न जनितो हृतः नैव तं परमात्मानं भावय ॥ ४८ ॥

कर्मभिर्यस्य जनयद्भिरपि । किं । निजनिजकार्यं सदापि तथापि किमपि न जनितो हृतश्च नैव तं परमात्मानं भावयत । यद्यपि व्यवहारनयेन शुद्धात्मस्वरूपप्रतिबंधकानि कर्माणि सुखदुःखादिकं निजनिजकार्यं जनयंति तथापि शुद्धनिश्चयनयेन अनंतज्ञानादिस्वरूपं न हृतं न विनाशितं न चाभिनवं जनितमुत्पादितं किमपि यस्यात्मनस्तं परमात्मानं

सब द्रव्य क्षेत्र काल और सब भावोंको ज्ञान जानता है ऐसे तीनलोक सरीखे अनंते लोकालोक होवें तौभी एक समयमें ही जान लेवे [**यस्य**] जिस भगवान परमात्माके [**पदे**] केवलज्ञानमें [**परमस्वभावं**] अपना उत्कृष्टस्वभाव सबके जाननेरूप [**बिंबितं**] प्रतिभासित होरहा है अर्थात् ज्ञान सबका अंतर्यामी है सर्वाकारज्ञानकी परिणति है ऐसा [**भणित्वा**] जानकर ज्ञानका आराधन करो । **भावार्थ**—जहांतक मंडफ वहांतक ही वेलिकी वढवारी और जब मंडफका अभाव हो तब वेलि थिर होके आगे नहीं फैलती लेकिन वेलिमें विस्तारशक्तिका अभाव नहीं कहसकते इसीतरह सर्वव्यापक ज्ञान केवलीका है जिसके ज्ञानमें सब पदार्थ झलकते हैं वही ज्ञान आत्माका परम स्वभाव है ऐसा जिसका ज्ञानहै वही शुद्धात्मा उपादेय है । यह ज्ञानानंदरूप आत्माराम है वही महामुनियोंके चित्तका विश्राम (ठहरनेकी जगह) है ॥ ४७ ॥

आगे जो शुभअशुभ कर्म हैं वे यद्यपि सुख दुःखादिको उपजाते हैं तौभी वह आत्मा किसीसे उत्पन्न नहीं हुआ किसीने बनाया नहीं ऐसा अभिप्राय मनमें रखकर गाथासूत्र कहते हैं;—

[**कर्मभिः**] ज्ञानावरणादि कर्म [**सदापि**] हमेशा [**निजनिजकार्यं**] अपने २ सुखःदुखादि कार्यको [**जनयद्भिरपि**] प्रगट करते हैं तौभी शुद्धनिश्चयनयकर [**यस्य**] जिस आत्माका [**किमपि**] कुछभी अर्थात् अनंतज्ञानादि खरूप [**न जनितः**] न तो

वीतरागनिर्विकल्पसमाधौ स्थित्वा भावयेत्यर्थः । अत्र यदेव कर्मभिर्न हृतं न चोत्पादितं चिदानंदैकस्वरूपं तदेवोपादेयमिति तात्पर्यार्थः ॥ ४८ ॥

अथ यः कर्मनिबद्धोपि कर्मरूपो न भवति कर्मापि तद्रूपं न संभवति तं परमात्मानं भावयेति कथयति;—

कम्मणिबद्धुवि होइ णवि, जो फुडु कम्मु कयावि ।
कम्मुवि जो ण कयावि फुडु, सो परमप्पउ भावि ॥ ४९ ॥

कर्मनिबद्धोपि भवति नैव यः स्फुटं कर्म कदाचिदपि ।
कर्मापि यो न कदाचिदपि स्फुटं तं परमात्मानं भावय ॥ ४९ ॥

कम्मणिबद्धुवि होइ णवि जो फुडु कम्मु कयावि कर्मनिबद्धोपि भवति नैव यः स्फुटं निश्चितं । किं न भवति । कर्म कदाचिदपि । तथाहि—यः कर्ता शुद्धात्मोपलंभाभावेनोपार्जितेन ज्ञानावरणादिशुभाशुभकर्मणा व्यवहारेण बद्धोपि शुद्धनिश्चयेन कर्मरूपो न भवति । केवलज्ञानाद्यनंतगुणस्वरूपं त्यक्त्वा कर्मरूपेण न परिणमतीत्यर्थः । पुनश्च किंवि-

---

नया पैदा किया और [**नैव हृतः**] न विनाशकिया दूसरी तरहका किया [**तं**] उस [**परमात्मानं**] परमात्माको [**भावय**] तू चिंतवनकर। **भावार्थ**—यद्यपि व्यवहारनयसे शुद्धात्मस्वरूपके रोकनेवाले ज्ञानावरणादिकर्म अपने २ कार्यको करते हैं अर्थात् ज्ञानावरण तो ज्ञानको ढकता है, दर्शनावरणकर्म दर्शनको आच्छादन करता है, वेदनीय साता असाता उत्पन्न करके अतींद्रियसुखको घातता है मोहनीय सम्यक्त्व तथा चारित्रको रोकता है, आयुकर्म स्थितिके प्रमाण शरीरमें राखता है अविनाशीभावको प्रगट नहीं होने देता, नामकर्म नानाप्रकार गति जाति शरीरादिकको उपजाता है, गोत्रकर्म ऊंच नीच गोत्रमें डालदेता है और अंतरायकर्म अनंतवीर्य (बल)को प्रगट नहीं होने देता । इसप्रकार कार्यको करते हैं तौभी शुद्धनिश्चयनयकर आत्माका अनंतज्ञानादिस्वरूप इन कर्मोंने न तो नाशकिया और न नया उत्पन्न किया आत्मा तो जैसा है वैसाही है। ऐसे अखंड परमात्माका तू वीतरागनिर्विकल्प समाधिमें स्थिर होकर ध्यानकर । यहांपर यह तात्पर्य है कि जो जीवपदार्थ कर्मोंसे न हरागया न उपजा किसी दूसरी तरह नहीं किया गया वही चिदानंद स्वरूप उपादेय है ॥ ४८ ॥

इसके वाद जो आत्मा कर्मोंसे अनादिकालका बंधा हुआ है तौभी कर्मरूप नहीं होता और कर्मभी आत्मस्वरूप नहीं होते आत्मा चैतन्य है कर्म जड़ हैं ऐसा जानकर उस परमात्माका तू ध्यानकर ऐसा कहते हैं;—[**यः**] जो चिदानंद आत्मा [**कर्मनिबद्धोपि**] ज्ञानावरणादिकर्मोंसे बंधा हुआ होनेपर भी [**कदाचिदपि**] कभीभी [**कर्म नैव स्फुटं**] कर्मरूप नहीं निश्चयसे [**भवति**] होता [**कर्म अपि**] और कर्म भी [**यः**] जिस

शिष्टः । **कम्मुवि जो ण कयावि फुडु** कर्मापि यो न कदाचिदपि स्फुटं निश्चितं । तद्यथा—ज्ञानावरणादिद्रव्यभावरूपं कर्मापि कर्तृभूतं यः परमात्मा न भवति स्वकीयकर्मपुद्गलस्वरूपं विहाय परमात्मरूपेण न परिणमतीत्यर्थः । **सो परमप्पउ भावि** तमेवं लक्षणं परमात्मानं भावय । देहरागादिपरिणतिरूपं बहिरात्मानं मुक्त्वा शुद्धात्मपरिणतिभावनारूपेंतरात्मनि स्थित्वा सर्वप्रकारोपादेयभूतं विशुद्धज्ञानदर्शनस्वभावपरमात्मानं भावयेति भावार्थः ॥ ४९ ॥ एवं त्रिविधात्मप्रतिपादकप्रथममहाधिकारमध्ये यथा निर्मलो ज्ञानमयो व्यक्तिरूपः शुद्धात्मा सिद्धौ तिष्ठति तथाभूतः शुद्धनिश्चयेन शक्तिरूपेण देहेपि तिष्ठतीति व्याख्यानमुख्यत्वेन चतुर्विंशति सूत्राणि गतानि ।

अत ऊर्ध्वं स्वदेहप्रमाणव्याख्यानमुख्यत्वेन षट्सूत्राणि कथयंति;—तद्यथा ।

किवि भणंति जिउ सव्वगउ, जिउ जडु केवि भणंति ।
किवि भणंति जिउ देहसमु, सुण्णुवि केवि भणंति ॥ ५० ॥

केपि भणंति जीवं सर्वगतं जीवं जडं केपि भणंति ।
केपि भणंति जीवं देहसमं शून्यमपि केपि भणंति ॥ ५० ॥

केपि भणंति जीवं सर्वगतं जीवं केपि जडं भणंति केपि भणंति जीवं देहसमं शून्यमपि

परमात्मस्वरूप [**कदाचिदपि स्फुटं**] कभी भी निश्चयकर [**न**] नहीं होते [**तं**] उस पूर्वोक्त लक्षणोंवाले [**परमात्मानं**] परमात्माको तू [**भावय**] चिंतवनकर ॥ **भावार्थ**—जो आत्मा अपने शुद्धात्मस्वरूपकी प्राप्तिके अभावसे उत्पन्न किये ज्ञानावरणादि शुभ अशुभकर्मोंसे व्यवहार नयकर बंधा हुआ है तौभी शुद्धनिश्चयनयसे कर्मरूप नहीं है अर्थात् केवलज्ञानादि अनंतगुणरूप अपने स्वरूपको छोड़कर कर्मरूप नहीं परिणमता और ये ज्ञानावरणादि द्रव्यभावरूप कर्मभी आत्मस्वरूप नहीं परिणमते अर्थात् अपने जड़रूप पुद्गलपनेको छोड़कर चैतन्यरूप नहीं होते यह निश्चय है । जीव तो अजीव नहीं होता और अजीव है वह जीव नहीं होता ऐसी अनादि कालकी मर्यादा है । इसलिये कर्मोंसे भिन्न ज्ञानदर्शनमयी सबतरह उपादेयरूप (आराधने योग्य) परमात्माको तुम देहरागादि परिणतिरूप बहिरात्मपनेको छोड़कर शुद्धात्मपरिणतिकी भावनारूप अंतरात्मामें स्थिर होकर चिंतवन करो उसीका अनुभव करो ऐसा तात्पर्य हुआ ॥ ४९ ॥

ऐसे तीनप्रकार आत्माके कहनेवाले पहले महाधिकारमें पांचवें स्थलमें जैसा निर्मल ज्ञानमई प्रगटरूप शुद्धात्मा सिद्धलोकमें विराजमान है वैसा ही शुद्धनिश्चयनयकर शक्तिरूपसे देहमें तिष्ठ रहा है ऐसे कथनकी मुख्यतासे चौवीस दोहासूत्र वीतगये । इससे आगे छह दोहासूत्रोंमें आत्मा व्यवहार नयकर अपनी देहके प्रमाण है यह कहते हैं;—[**केपि**] कोई नैयायिक वेदांती मीमांसक मतवाले [**जीवं**] जीवको [**सर्वगतं**]

केपि वदंति । तथाहि—केचन सांख्यनैयायिकमीमांसकाः सर्वगतं जीवं वदंति । सांख्याः पुनर्जडमपि कथयंति । जैनाः पुनर्देहप्रमाणं वदंति । बौद्धाश्च शून्यं वदंतीति । एवं प्रश्नचतुष्टयं कृतमिति भावार्थः ॥ ५० ॥

अथ वक्ष्यमाणनयविभागेन प्रश्नचतुष्टयस्याप्यभ्युपगमं स्वीकारं करोति;—

अप्पा जोइय सव्वगउ, अप्पा जडुवि वियाणि ।
अप्पा देहपमाणु मुणि, अप्पा सुण्णु वियाणि ॥ ५१ ॥

आत्मा योगिन् सर्वगतः आत्मा जडोपि विजानीहि ।
आत्मानं देहप्रमाणं मन्यस्व आत्मानं शून्यं विजानीहि ॥ ५१ ॥

आत्मा हे योगिन् सर्वगतोपि भवति, आत्मानं जडमपि विजानीहि, आत्मानं देहप्रमाणं मन्यस्व, आत्मानं शून्यमपि जानीहि । तद्यथा । हे प्रभाकरभट्ट वक्ष्यमाणविवक्षितनयविभागेन परमात्मा सर्वगतो भवति, जडोपि भवति, देहप्रमाणोपि भवति शून्योपि भवति नापि दोष इति भावार्थः ॥ ५१ ॥

अथ कर्मरहितात्मा केवलज्ञानेन लोकालोकं जानाति तेन कारणेन सर्वगतो भवतीति प्रतिपादयति;—

अप्पा कम्मविवज्जियउ, केवलणाणें जेण ।
लोयालोउवि मुणइ जिय, सव्वगु वुच्चइ तेण ॥ ५२ ॥

आत्मा कर्मविवर्जितः केवलज्ञानेन येन ।
लोकालोकमपि मनुते जीव सर्वगः उच्यते तेन ॥ ५२ ॥

सर्वव्यापक [**भणंति**] कहते हैं [**केपि**] कोई सांख्यमतवाले [**जीवं**] जीवको [**जडं**] जड [**भणंति**] कहते हैं [**केपि**] कोई बौद्धमतवाले जीवको [**शून्यं अपि**] शून्य भी [**भणंति**] कहते हैं [**केपि**] कोई जिनधर्मी [**जीवं**] जीवको [**देहसमं**] व्यवहार नयकर देहप्रमाण [**भणंति**] कहते हैं और निश्चय नयकर लोकप्रमाण है । वह आत्मा कैसा है और कैसा नहीं है ऐसे चार प्रश्न शिष्यने किये ऐसा तात्पर्य है ॥ ५० ॥

आगे नयविभागकर आत्मा सवरूप है एकांतवादकर अन्यवादी मानते हैं सो ठीक नहीं है इसप्रकार चारों प्रश्नोंको स्वीकार करके समाधान करते हैं;—[**हे योगिन्**] हे प्रभाकर भट्ट ! [**आत्मा सर्वगतः**] आगे कहेजानेवाले नयके भेदसे आत्मा सर्वगत भी है [**आत्मा**] आत्मा [**जडोपि**] जड़ भी है ऐसा [**विजानीहि**] जानो [**आत्मानं देहप्रमाणं**] आत्माको देहके बराबर भी [**मन्यस्व**] मानो [**आत्मानं शून्यं**] आत्माको शून्य भी [**विजानीहि**] जानो । नयविभागसे माननेमें कोई दोष नहीं है ऐसा तात्पर्य है ॥ ५१ ॥

आत्मा कर्मविवर्जितःसन् केवलज्ञानेन करणभूतेन येन कारणेन लोकालोकं मनुते जानाति हे जीव सर्वगत उच्यते तेन कारणेन । तथाहि—अयमात्मा व्यवहारेण केवलज्ञानेन लोकालोकं जानाति, देहमध्ये स्थितोपि निश्चयनयेन स्वात्मानं जानाति तेन कारणेन व्यवहारनयेन ज्ञानापेक्षया रूपविषये दृष्टिवत्सर्वगतो भवति नच प्रदेशापेक्षयेति । कश्चिदाह । यदि व्यवहारेण लोकालोकं जानाति तर्हि व्यवहारनयेन सर्वज्ञत्वं न च निश्चयनयेनेति । परिहारमाह—यथा स्वकीयमात्मानं तन्मयत्वेन जानाति तथा परद्रव्यं तन्मयत्वेन न जानाति तेन कारणेन व्यवहारो भण्यते न च परिज्ञानाभावात् । यदि पुनर्निश्चयेन स्वद्रव्यवत्तन्मयो भूत्वा परद्रव्यं जानाति तर्हि परकीयसुखदुःखरागद्वेषपरिज्ञातो सुखी दुःखी रागी द्वेषी च स्यादिति महद्दूषणं प्राप्नोतीति । अत्र येनैव ज्ञानेन व्यापको भण्यते तदेवोपादेयस्यानंतसुखस्याभिन्नत्वादुपादेयमित्यभिप्रायः ।। ५२ ।।

आगे कर्मरहित आत्मा केवलज्ञानसे लोक और अलोक दोनोंको जानता है इसलिये सर्वव्यापक भी होसकता है ऐसा कहते हैं;—[**आत्मा**] यह आत्मा [**कर्मविवर्जितः**] कर्मरहित हुआ [**केवलज्ञानेन**] केवलज्ञानसे [**येन**] जिसकारण [**लोकालोकमपि**] लोक और अलोकको [**मनुते**] जानता है [**तेन**] इसीलिये [**हे जीव**] हे जीव [**सर्वगः**] सर्वगत [**उच्यते**] कहाजाता है । **भावार्थ**—यह आत्मा व्यवहारनयसे केवलज्ञानकर लोकअलोकको जानता है और शरीरमें रहनेपर भी निश्चयनयसे अपने स्वरूपको जानता है इसकारण ज्ञानकी अपेक्षा तो व्यवहारसे सर्वगत है, प्रदेशोंकी अपेक्षा नहीं है । जैसे रूपवाले पदार्थोंको नेत्र देखते हैं परंतु उन पदार्थोंसे तन्मय नहीं होते । यहां कोई प्रश्न करता है कि जो व्यवहारनयसे लोकालोकको जानता है और निश्चयनयसे नहीं, तो व्यवहारसे सर्वज्ञपना हुआ निश्चयनयकर न हुआ? उसका समाधान कहते हैं—जैसे अपने आत्माको तन्मयी होकर जानता है उसतरह परद्रव्यको तन्मयीपनेसे नहीं जानता भिन्नस्वरूप जानता है इसकारण व्यवहारनयसे कहा, कुछ ज्ञानके अभावसे नहीं कहा । ज्ञानकर जानपना तो निजपरका समान है । जैसे अपनेको संदेहरहित जानता है वैसा ही परको जानता है इसमें संदेह नहीं समझना, लेकिन निजस्वरूपसे तो तन्मयी है और परसे तन्मयी नहीं । और जिसतरह निजको तन्मयी होकर निश्चयसे जानता है उसीतरह यदि परको भी तन्मय होकर जानें तो परके सुखदुःख रागद्वेषोंके ज्ञान होनेपर सुखी दुःखी रागी द्वेषी होवे यह बड़ा दूषण है । सो इस प्रकार कभी नहीं होसकता । यहां जिस ज्ञानसे सर्वव्यापक कहा वही ज्ञान उपादेय अतींद्रियसुखसे अभिन्न है सुखरूप है ज्ञान और आनंदमें भेद नहीं है वही ज्ञान उपादेय है यह अभिप्राय जानना । इस दोहामें जीवको ज्ञानकी अपेक्षा सर्वगत कहा है ।। ५२ ।।

अथ येन कारणेन निजबोधं लब्ध्वात्मन इन्द्रियज्ञानं नास्ति तेन कारणेन जडो भवतीत्यभिप्रायं मनसि धृत्वा सूत्रमिदं कथयति;—

जे णियबोहपरिट्ठियहं, जीवहं तुट्टइ णाणु ।
इंदियजणियउ जोइया, तिं जिउ जडुवि वियाणु ॥ ५३ ॥

येन निजबोधप्रतिष्ठितानां जीवानां त्रुट्यति ज्ञानं ।
इंद्रियजनितं योगिन् तेन जीवं जडमपि विजानीहि ॥ ५३ ॥

येन कारणेन निजबोधप्रतिष्ठितानां जीवानां त्रुट्यति विनश्यति । किं कर्तृ । ज्ञानं । कथंभूतं । इंद्रियजनितं हे योगिन तेन कारणेन जीवं जडमपि विजानीहि । तद्यथा । छद्मस्थानां वीतरागनिर्विकल्पसमाधिकाले स्वसंवेदनज्ञाने सत्यपीन्द्रियजनितं ज्ञानं नास्ति, केवलज्ञानिनां पुनः सर्वदैव नास्ति तेन कारणेन जडत्वमिति । अत्र इन्द्रियज्ञानं हेयमतींद्रियज्ञानमुपादेयमिति भावार्थः ॥ ५३ ॥

अथ शरीरनामकर्मकारणरहितो जीवो वर्धते न च हीयते तेन कारणेन मुक्तश्चरमशरीरप्रमाणो भवतीति निरूपयति;—

कारणविरहिउ सुद्धजिउ, वड्ढइ खिरइ ण जेण ।
चरमसरीरपमाणु जिउ, जिणवर बोल्लहिं तेण ॥ ५४ ॥

कारणविरहितः शुद्धजीवः वर्धते क्षरति न येन ।
चरमशरीरप्रमाणं जीवं जिनवराः वदंति तेन ॥ ५४ ॥

आगे आत्मज्ञानको पाकर इंद्रियज्ञान नाशको प्राप्त होता है परमसमाधिमें आत्मस्वरूपमें लीन है परवस्तुकी गम्य नहीं है इसलिये नयप्रमाणकर जड़भी है परंतु ज्ञानाभावरूप जड नहीं है चैतन्यरूप ही है अपेक्षासे जड कहा जाता है यह अभिप्राय मनमें रखकर गाथासूत्र कहते हैं;—[**येन**] जिस अपेक्षा [**निजबोधप्रतिष्ठितानां**] आत्मज्ञानमें ठहरे हुए [**जीवानां**] जीवोंके [**इंद्रियजनितं ज्ञानं**] इंद्रियोंमे उत्पन्न हुआ ज्ञान [**त्रुट्यति**] नाशको प्राप्त होता है [**हे योगिन्**] हे योगी [**तेन**] उसी कारणसे [**जीवं**] जीवको [**जडमपि**] जड भी [**विजानीहि**] जानो । **भावार्थ**—महामुनियोंके वीतरागनिर्विकल्पसमाधिके समयमें स्वसंवेदनज्ञान होनेपर भी इंद्रियजनित ज्ञान नहीं है और केवलज्ञानियोंके तो किसी समय भी इंद्रियज्ञान नहीं है केवल अतींद्रियज्ञान ही है इसलिये इंद्रियज्ञानके अभावकी अपेक्षा आत्मा जड भी कहा जासकता है । यहांपर बाह्य इंद्रियज्ञान सबतरह हेय है और अतींद्रियज्ञान उपादेय है यह सारांश हुआ ॥ ५३ ॥

आगे शरीर नामा नामकर्मरूप कारणसे रहित यह जीव न घटता है और न बढता है इसकारण मुक्त अवस्थामें चरमशरीरसे कुछकम पुरुषाकार रहता है इसलिये शरीर

कारणविरहितः शुद्धजीवो वर्द्धते क्षरति हीयते न येन कारणेन चरमशरीरप्रमाणं मुक्तजीवं जिनवरा भणंति तेन कारणेनेति । तथाहि । यद्यपि संसारावस्थायां हानिवृद्धिकारणभूतशरीरनामकर्मसहितत्वाद्धीयते वर्धते च तथापि मुक्तावस्थायां हानिवृद्धिकारणाभावाद्वर्धते हीयते च नैव, शरीरप्रमाण एव तिष्ठतीत्यर्थः । कश्चिदाह—मुक्तावस्थायां प्रदीपवदावरणाभावे सति लोकप्रमाणविस्तारेण भाव्यमिति । तत्र परिहारमाह—प्रदीपस्य योसौ प्रकाशविस्तारः स स्वभावज एव नत्वपरजनितः पश्चाद्भाजनादिना साद्यावरणेन प्रच्छादितस्तेन कारणेन तस्यावरणाभावेपि प्रकाशविस्तारो घटते एव । जीवस्य पुनरनादिकर्मप्रच्छादितत्वात्पूर्वं स्वभावेन विस्तारो नास्ति । किंरूपसंहारविस्तारौ । शरीरनामकर्मजनितौ । तेन कारणेन शुष्कमृत्तिकाभाजनवत् कारणाभावादुपसंहारविस्तारौ न भवतश्चरमशरीरप्रमाणेन तिष्ठतीति । अत्र य एव मुक्तौ शुद्धबुद्धस्वभावः परमात्मा तिष्ठति तत्सदृशो रागादिरहितकाले स्वशुद्धात्मोपादेय इति भावार्थः ॥ ५४ ॥

प्रमाण भी कहा जाता है ऐसा कहते हैं;—[**येन**] जिस हेतु [**कारणविरहितः**] हानिवृद्धिका कारण शरीर नामकर्मसे रहित हुआ [**शुद्धजीवः**] शुद्धजीव [**न वर्धते क्षरति**] न तो बढता है और न घटता है [**तेन**] इसी कारण [**जिनवराः**] जिनेंद्रदेव [**जीवं**] जीवको [**चरमशरीरप्रमाणं**] चरमशरीर प्रमाण [**वदंति**] कहते हैं। **भावार्थ**—यद्यपि संसार अवस्थामें हानिवृद्धिका कारण शरीर नामा नामकर्म है उसके संबंधसे जीव घटता है और बढता है जब महामच्छका शरीर पाता है तब तो शरीरकी वृद्धि होती है और जब निगोद शरीर धारता है तब घट जाता है। और मुक्त अवस्थामें हानि वृद्धिका कारण जो नामकर्म उसका अभाव होनेसे जीवके प्रदेश न तो सिकुड़ते हैं न फैलते हैं किंतु चरमशरीरसे कुछ कम पुरुषाकार ही रहते हैं इसलिये शरीर प्रमाण है यह निश्चयहुआ । यहां कोई प्रश्न करै कि जबतक दीपकके आवरण है तबतक तो प्रकाश नहीं होसकता है और जब उसके रोकनेवालेका अभाव हुआ तब प्रकाश विस्तर जाता (फैलजाता) है उसीप्रकार मुक्ति अवस्थामें आवरणके अभाव होनेसे आत्माके प्रदेश लोक प्रमाण फैलने चाहिये शरीर प्रमाण ही क्यों रहगये ? उसका समाधान यह है कि दीपकके प्रकाशका जो विस्तार है वह स्वभावसे होता है परसे नहीं उत्पन्न हुआ पीछे भाजन वगैरःसे अथवा दूसरे आवरणसे आच्छादन किया गया वह प्रकाश संकोचको प्राप्त होजाता है और जब आवरणका अभाव होता है तब प्रकाश विस्ताररूप हो जाता है इसमें संदेह नहीं और जीवका प्रकाश अनादिकालसे कर्मोंकर ढंका हुआ है पहले कभी विस्ताररूप नहीं हुआ। शरीर प्रमाण ही संकोचरूप और विस्ताररूप हुआ इसलिये जीवके प्रदेशोंका प्रकाश संकोच विस्ताररूप शरीर नामकर्मसे उत्पन्न हुआ है इसकारण

अथाष्टकर्माष्टादशदोषरहितत्वापेक्षया शून्यो भवतीति न च केवलज्ञानादिगुणापेक्षया चेति दर्शयति;—

अट्ठवि कम्मइं बहुविहइं, णवणव दोसवि जेण
सुद्धहं एक्कुवि अत्थि णवि, सुण्णुवि वुच्चइ तेण ॥ ५५ ॥

अष्टावपि कर्माणि बहुविधानि नवनव दोषा अपि येन ।
शुद्धानां एकोपि अस्ति नैव शून्योपि भण्यते तेन ॥ ५५ ॥

अष्टावपि कर्माणि बहुविधानि नवनव दोषा अपि येन कारणेन शुद्धात्मनां तन्मध्ये चैकोप्यस्ति नैव शून्योपि भण्यते तेन कारणेनैवेति । तद्यथा । शुद्धनिश्चयनयेन ज्ञानावरणाद्यष्टद्रव्यकर्माणि क्षुधादिदोषकारणभूतानि क्षुधातृषादिरूपाष्टादशदोषा अपि कार्यभूताः अपि शब्दात्सत्ताचैतन्यबोधादिशुद्धप्राणरूपेण शुद्धजीवित्वे सत्यपि दशप्राणरूपमशुद्धजीवत्वं च नास्ति तेन कारणेन संसारिणां निश्चयनयेन शक्तिरूपेण रागादिविभावशून्यं च भवति । मुक्तात्मनां तु व्यक्तिरूपेणापि न चात्मानंतज्ञानादिगुणशून्यत्वमेकांतेन बौद्धादिमतवदिति ।

सूखी मट्टीके बर्तनकी तरह कारणके अभावसे संकोच विस्ताररूप नहीं होता शरीर प्रमाण ही रहता है अर्थात् जब तक मट्टीका बासन जलसे गीला रहता है तब तक जलके संबंधसे वह घटे बढ जाता है और जब जलका अभाव हुआ तब बासन सूख जानेसे घटता बढता नहीं है जैसेका तैसा रहता है । उसी तरह इस जीवके जबतक नामकर्मका संबंध है तबतक संसार अवस्थामें शरीरकी हानि वृद्धि होती है उसकी हानि वृद्धिसे प्रदेश सिकुडते हैं और फैलते हैं । तथा सिद्ध अवस्थामें नामकर्मका अभाव होजाता है इसकारण शरीरके न होनेसे प्रदेशोंका संकोच विस्तार नहीं होता सदा एकसे ही रहते हैं । जिस शरीरसे मुक्त हुआ उसी प्रमाण कुछ कम रहता है । दीपकका प्रकाश तो स्वभावकर उत्पन्न है आवरणसे आच्छादित होजाता है । जब आवरण दूर होजाता है तब प्रकाश सहज ही विस्तरता है । यहां तात्पर्य यह है कि जो शुद्ध बुद्ध (ज्ञान) स्वभाव परमात्मा मुक्तिमें तिष्ठ रहा है वैसा ही शरीरमें भी विराज रहा है । जब रागका अभाव होता है उस कालमें यह आत्मा परमात्माके समान है वही उपादेय है ॥ ५४ ॥

आगे आठ कर्म और अठारह दोषोंसे रहित हुआ विभावभावोंकर रहित होनेसे शून्य कहा जाता है लेकिन केवलज्ञानादि गुणकी अपेक्षा शून्य नहीं है सदा पूर्ण ही है ऐसा दिखलाते हैं;—[**येन**] जिसकारण [**अष्टौ अपि**] आठों ही [**बहुविधानि कर्माणि**] अनेक भेदोंवाले कर्म [**नवनवदोषाअपि**] अठारह ही दोष इनमेंसे [**एकः अपि**] एक भी [**शुद्धानां**] शुद्धात्माओंके [**नैव अस्ति**] नहीं है [**तेन**] इसलिये [**शून्योपि**] शून्यभी [**भण्यते**] कहा जाता है । **भावार्थ**—इस आत्माके शुद्धनिश्चयनय-

तथाचोक्तं पंचास्तिकाये । "जेसिं जीवसहावो णत्थि अभावो य सव्वहा तत्थ । ते होंति भिण्णदेहा सिद्धा वचिगोयरमदीदा" । अत्र य एवमिथ्यात्वरागादिभावेन शून्यश्चिदानंदैकस्वभावेन भरितावस्थः प्रतिपादितः परमात्मा स एवोपादेय इति तात्पर्यार्थः ॥ ५५ ॥ एवं त्रिविधात्मप्रतिपादकप्रथममहाधिकारमध्ये य एव ज्ञानापेक्षया व्यवहारनयेन लोकालोकव्यापको भणितः स एव परमात्मा निश्चयनयेनासंख्यातप्रदेशोपि स्वदेहमध्ये तिष्ठतीति व्याख्यानमुख्यत्वेन सूत्रषट्कं गतं ।

तदनंतरं द्रव्यगुणपर्यायनिरूपणमुख्यत्वेन सूत्रत्रयं कथयति;—तद्यथा ।

अप्पा जणियउ केण णवि, अप्पें जणिउ ण कोइ ।
दव्वसहावें णिच्चु मुणि, पज्जउ विणसइ होइ ॥ ५६ ॥

आत्मा जनितः केन नापि आत्मना जनितं न किमपि ।
द्रव्यस्वभावेन नित्यं मन्यस्व पर्यायः विनश्यति भवति ॥ ५६ ॥

आत्मा न जनितः केनापि आत्मना कर्तृभूतेन जनितं न किमपि, द्रव्यस्वभावेन नित्य-

---

कर ज्ञानावरणादि आठ द्रव्यकर्म नहीं हैं, क्षुधादि दोषोंके कारणभूत कर्मोंके जानेसे क्षुधा तृषादि अठारह दोष कार्यरूप नहीं हैं, और अपि शब्दसे सत्ता चैतन्य ज्ञान आनंदादि शुद्ध प्राण होनेपर भी इंद्रियादि दश अशुद्धरूप प्राण नहीं हैं इसलिये संसारी जीवोंके भी शुद्ध निश्चयनयसे शक्तिरूपसे शुद्धपना है लेकिन रागादि विभावभावों की शून्यता ही है। तथा सिद्धजीवोंके तो सब तरहसे प्रगटरूप रागादिसे रहितपना है इसलिये विभावोंसे रहितपनेकी अपेक्षा शून्यभाव है इसी अपेक्षासे आत्माको शून्य भी कहते हैं । ज्ञानादिक शुद्धभावकी अपेक्षा सदा पूर्ण ही है । और जिसतरह बौद्धमती सर्वथा शून्य मानते हैं वैसा अनंतज्ञानादिगुणोंसे कभी नहीं होसकता । ऐसा कथन श्रीपंचास्तिकायमें भी किया है—"जेसिं जीवसहावो" इत्यादि । इसका अभिप्राय यह है कि जिन सिद्धोंके जीवका स्वभाव निश्चल है जिस स्वभावका सर्वथा अभाव नहीं है वे सिद्ध भगवान् देहसे रहित हैं और वचनके विषयसे रहित हैं अर्थात् जिनका स्वभाव वचनोंसे नहीं कह सकते । यहां मिथ्यात्वरागादिभावकर शून्य तथा एक चिदानंदस्वभावसे पूर्ण जो परमात्मा कहा गया है अर्थात् विभावसे शून्य, स्वभावसे पूर्ण कहा गया है वही उपादेय है ऐसा तात्पर्य हुआ ॥ ५५ ॥

ऐसे जिसमें तीन प्रकार आत्माका कथन है ऐसे पहले महाअधिकारमें जो ज्ञानकी अपेक्षा व्यवहारनयसे लोकालोक व्यापक कहागया वही परमात्मा निश्चयनयसे असंख्यातप्रदेश है तौ भी अपनी देहके प्रमाण रहता है इस व्याख्यानकी मुख्यतासे छह दोहासूत्र कहेगये ॥ आगे द्रव्यगुणपर्यायके कथनकी मुख्यतासे तीन दोहा कहते हैं;—[**आत्मा**]

मात्मानं मन्यस्व जानीहि । पर्यायो विनश्यति भवति चेति । तथाहि । संसारिजीवः शुद्धात्मसंवित्त्यभावेनोपार्जितेन कर्मणा यद्यपि व्यवहारेण जन्यते स्वयं च शुद्धात्मसंवित्तिच्युतः सन् कर्माणि जनयति तथापि शुद्धनिश्चयनयेन शक्तिरूपेण कर्मकर्तृभूतेन नरनारकादिपर्यायेण न जन्यते स्वयं च कर्मनोकर्मादिकं न जनयतीति । आत्मा पुनर्न केवलं शुद्धनिश्चयनयेन व्यवहारेणापि न च जन्यते न च जनयति तेन कारणेन द्रव्यार्थिकनयेन नित्यो भवति, पर्यायार्थिकनयेनोत्पद्यते विनश्यति चेति । अत्राह शिष्यः । मुक्तात्मनः कथमुत्पादव्ययाविति । परिहारमाह । आगमप्रसिद्ध्यागुरुलघुकगुणहानिवृद्ध्यपेक्षया, अथवा येनोत्पादादिरूपेण ज्ञेयं वस्तु परिणमति तेन परिच्छित्त्याकारेण ज्ञानपरिणत्यपेक्षया । अथवा मुक्तौ संसारपर्यायविनाशः सिद्धपर्यायोत्पादः शुद्धजीवद्रव्यं ध्रौव्यापेक्षया च सिद्धानामुत्पादव्ययौ ज्ञातव्याविति । अत्र तदेव सिद्धस्वरूपमुपादेयमिति भावार्थः ॥ ५६ ॥

अथ द्रव्यगुणपर्यायस्वरूपं प्रतिपादयति;—

यह आत्मा [**केन अपि**] किसीसे भी [**न जनितः**] उत्पन्न नहीं हुआ [**आत्मना**] और इस आत्माकर [**किमपि**] कोईद्रव्य [**न जनितं**] उत्पन्न नहीं हुआ [**द्रव्यस्वभावेन**] द्रव्यस्वभावकर [**नित्यं मन्यस्व**] नित्य जानो [**पर्यायः विनश्यति भवति**] पर्यायभावसे विनाशीक है । **भावार्थ**—यह संसारी जीव यद्यपि व्यवहार नयकर शुद्धात्मज्ञानके अभावसे उपार्जनकिये ज्ञानावरणादि शुभाशुभकर्मोंके निमित्तसे नरनारकादि पर्यायोंसे उत्पन्न होता है और विनसता है और आप भी शुद्धात्मज्ञानसे रहित हुआ कर्मोंको उपजाता (बांधता) है तौ भी शुद्धनिश्चयनयकर शक्तिरूप शुद्ध ही है कर्मोंकर उत्पन्न हुई नरनारकादिपर्यायरूप नहीं होता और आपभी कर्म नोकर्मादिकको नहीं उपजाता और व्यवहारसे भी न जन्मता है न किसीसे विनाशको प्राप्त होता है न किसीको उपजाता है कारण कार्यसे रहित है, अर्थात् **कारण** उपजानेवालेको कहते हैं **कार्य** उपजनेवालेको कहते हैं सो ये दोनों भाव वस्तुमें नहीं हैं इससे द्रव्यार्थिकनयकर जीव नित्य है और पर्यायार्थिकनयकर उत्पन्न होता है तथा विनाशको प्राप्त होता है । यहां पर शिष्य प्रश्नकरता है कि संसारी जीवोंके तो नरनारकी आदि पर्यायोंकी अपेक्षा उत्पत्ति और मरण प्रत्यक्ष दीखता है परंतु सिद्धोंके उत्पाद व्यय किस तरह होसकता है क्योंकि उनके विभाव पर्याय नहीं है स्वभावपर्याय ही है और वे सदा अखंड अविनश्वर ही हैं । उसका समाधान यह है कि जैसा उत्पन्न होना मरना चारों गतियोंमें संसारी जीवोंके है वैसा तो उनसिद्धोंके नहीं है वे अविनाशी हैं परंतु शास्त्रोंमें प्रसिद्ध अगुरुलघुगुणकी परिणतिरूप अर्थपर्याय है वह समय समयमें आविर्भाव तिरोभावरूप होती है

तं परियाणहिं दव्वु तुहुं, जं गुणपज्जयजुत्तु।
सहभुव जाणहि ताहं गुण कमभुय पज्जउ वुत्तु॥ ५७॥

तत् परिजानीहि द्रव्यं त्वं, यत् गुणपर्याययुक्तं।
सहभुवः जानीहि तेषां गुणाः क्रमभुवः पर्यायाः उक्ताः॥ ५७॥

तं परियाणहिं दव्वु तुहुं जं गुणपज्जयजुत्तु तत्परि समंताज्जानीहि द्रव्यं त्वं। तत्किं। यद्गुणपर्याययुक्तं, गुणपर्यायस्य स्वरूपं कथयति। **सहभुव जाणहि ताहं गुण कमभुय पज्जउ वुत्तु** सहभुवो जानीहि तेषां द्रव्याणां गुणाः, क्रमभुवः पर्यायाः उक्ता भणिता इति। तद्यथा। गुणपर्ययवद्द्रव्यं ज्ञातव्यं इदानीं तस्य तद्द्रव्यस्य गुणपर्यायाः कथ्यंते। सहभुवो गुणाः, क्रमभुवः पर्यायाः, इदमेकं तावत्सामान्यलक्षणं। अन्वयिनो गुणाः व्यतिरेकिणः पर्यायाः, इति द्वितीयं च। यथा जीवस्य ज्ञानादयः पुद्गलस्य वर्णादयश्चेति। ते च प्रत्येकं

अर्थात् समय २ में पूर्वपरिणतिका व्यय होता है और आगेकी पर्यायका आविर्भाव (उत्पाद) होता है। इस अर्थपर्यायकी अपेक्षा उत्पाद व्यय जानना। अन्य संसारी जीवोंकी तरह नहीं है। सिद्धोंके एक तो अर्थपर्यायकी अपेक्षा उत्पादव्यय कहा है। अर्थपर्यायमें षट्गुणी हानि और वृद्धि होती है। अनंतभागवृद्धि १ असंख्यातभागवृद्धि २ संख्यातभागवृद्धि ३ संख्यातगुणवृद्धि ४ असंख्यातगुणवृद्धि ५ अनंतगुणवृद्धि ६। अनंतभागहानि १ असंख्यातभागहानि २ संख्यातभागहानि ३ संख्यातगुणहानि ४ असंख्यातगुणहानि ५ अनंतगुणहानि ६। ये षट्गुणी हानि वृद्धिके नाम कहे हैं। इनका स्वरूप तो केवलीके गम्य है सो इस षट्गुणी हानिवृद्धिकी अपेक्षा सिद्धोंके उत्पादव्यय कहा जाता है। अथवा समस्त ज्ञेय पदार्थ उत्पाद व्यय ध्रौव्यरूप परिणमते हैं सो सब पदार्थ सिद्धोंके ज्ञानगोचर हैं। ज्ञेयाकार ज्ञानकी परिणति है सो जब ज्ञेयपदार्थमें उत्पादव्यय हुआ तब ज्ञानमें सब प्रतिभासित हुआ इसलिये ज्ञानकी परिणतिकी अपेक्षा उत्पाद व्यय जानना। अथवा जब सिद्ध हुए तब संसार पर्यायका विनाश हुआ सिद्ध पर्यायका उत्पाद हुआ तथा द्रव्यस्वभावसे सदा ध्रुव ही हैं। सिद्धोंके जन्म जरा मरण नहीं हैं सदा अविनाशी हैं। जो सिद्धका स्वरूप सब उपाधियोंसे रहित है वही उपादेय है यह भावार्थ जानना॥ ५६॥

आगे द्रव्यगुणपर्यायका स्वरूप कहते हैं;—[**यत्**] जो [**गुणपर्याययुक्तं**] गुण और पर्यायोंकर सहित है [**तत्**] उसको [**त्वं**] हे प्रभाकर भट्ट तू [**द्रव्यं**] द्रव्य [**परिजानीहि**] जान [**सहभुवः**] जो सदाकाल पाये जावें नित्यरूप हों वे तो [**तेषां गुणाः**] उनद्रव्योंके गुण हैं [**क्रमभुवः**] और जो द्रव्यकी अनेकरूप परिणति क्रमसे हो अर्थात् अनित्यपनेरूप समय समय उपजै विनशै नानास्वरूप हो वो [**पर्यायाः**]

द्विविधाः स्वभावविभावभेदेनेति । तथाहि । जीवस्य तावत्कथ्यंते । सिद्धत्वादयः स्वभावपर्यायाः केवलज्ञानादयः स्वभावगुणा असाधारणा इति । अगुरुलघुकाः स्वभावगुणास्तेषामेव गुणानां षड्ढानिवृद्धिरूपस्वभावपर्यायाश्च सर्वद्रव्यसाधारणाः । तस्यैव जीवस्य मतिज्ञानादिविभावगुणनरनारकादिविभावपर्यायाश्च इति । इदानीं पुद्गलस्य कथ्यंते । केवलपरमाणुरूपेणावस्थानं स्वभावपर्यायः वर्णांतरादिरूपेण परिणमनं वा । तस्मिन्नेव परमाणौ वर्णादयः स्वभावगुणा इति, द्व्यणुकादिरूपस्कंधरूपविभावपर्यायास्तेष्वेव द्व्यणुकादिस्कंधेषु वर्णादयो विभावगुणा इति भावार्थः । धर्माधर्माकाशकालानां स्वभावगुणपर्यायास्ते च यथावसरं कथ्यंते । विभावपर्यायास्तूपचारेण यथा घटाकाशमित्यादि । अत्र शुद्धगुणपर्यायसहितः शुद्धजीव एवोपादेय इति भावार्थः ॥ ५७ ॥

पर्याय [**उक्ताः**] कही जाती हैं । **भावार्थ**—जो द्रव्य होता है वह गुणपर्यायकर सहित होता है । यही कथन तत्त्वार्थसूत्रमें कहा है "गुणपर्ययवद्द्रव्यं" अब गुणपर्यायका स्वरूप कहते हैं—"सहभुवो गुणाः क्रमभुवः पर्यायाः" यह नयचक्र ग्रंथका वचन है अथवा "अन्वयिनो गुणा व्यतिरेकिणः पर्यायाः' इसका अर्थ ऐसे है कि गुण तो सदा द्रव्यसे सहभावी हैं द्रव्यमें हमेशह एकरूप नित्यरूप पाये जाते हैं और पर्याय नानारूप होती हैं जो परिणति पहले समयमें थी वह दूसरे समयमें नहीं होती, समय २ में उत्पाद व्ययरूप होता है इसलिये पर्याय क्रमवर्ती कहा जाता है । अब इसका विस्तार कहते हैं—जीवद्रव्यके ज्ञान आदि अर्थात् ज्ञान दर्शन सुख वीर्य आदि अनंतगुण हैं और पुद्गलद्रव्यके स्पर्श रस गंध वर्ण इत्यादि अनंतगुण हैं सो ये गुण तो द्रव्यमें सहभावी हैं अन्वयी हैं सदा नित्य हैं कभी द्रव्यसे तन्मयपना नहीं छोड़ते । तथा पर्यायके दो भेद हैं—एक तो स्वभाव दूसरी विभाव । सो जीवके सिद्धत्वादि स्वभाव पर्याय हैं और केवलज्ञानादि स्वभाव गुण हैं । ये तो जीवमें ही पाये जाते हैं अन्य द्रव्यमें नहीं पाये जाते तथा अस्तित्व वस्तुत्व द्रव्यत्व अगुरुलघुत्व ये स्वभावगुण सब द्रव्योंमें पाये जाते हैं । अगुरुलघुगुणका परिणमन षट्गुणी हानिवृद्धिरूप है । यह स्वभाव पर्याय सभी द्रव्योंमें हैं कोई द्रव्य षट्गुणी हानि वृद्धि विना नहीं है यही अर्थपर्याय कही जाती है वह शुद्धपर्याय है । यह शुद्धपर्याय संसारी जीवोंके सब अजीव पदार्थोंके तथा सिद्धोंके पायी जाती है । और सिद्धपर्याय तथा केवलज्ञानादिगुण सिद्धोंके ही पायाजाता है दूसरोंके नहीं । संसारी जीवोंके मतिज्ञानादि विभावगुण और नर नारकी आदि विभाव पर्याय–ये संसारी जीवोंके पायी जाती हैं । ये तो जीवद्रव्यके गुणपर्याय कहे और पुद्गलके परमाणुरूप तो द्रव्य तथा वर्ण आदि स्वभावगुण और एक वर्णसे दूसरे वर्णरूप होना ये विभावगुण व्यंजन पर्याय तथा एक परमाणूमें दो तीन इत्यादि अनेक परमाणू मिलकर स्कंधरूप होना ये विभावद्रव्यव्यंजनपर्याय हैं । द्व्यणुकादि स्कंधमें जो वर्ण आदि हैं वे

अथ जीवस्य विशेषेण द्रव्यगुणपर्यायान् कथयति;—

अप्पा बुज्झहि दव्वु तुहु, गुण पुणु दंसणु णाणु ।
पज्जय चउगइभाव तणु, कम्मविणिम्मिय जाणु ॥ ५८ ॥

आत्मानं बुध्यस्व द्रव्यं त्वं गुणौ पुनः दर्शनं ज्ञानं ।
पर्यायान् चतुर्गतिभावान् तनुं कर्मविनिर्मितान् जानीहि ॥ ५८ ॥

अप्पा बुज्झहि दव्वु तुहुं आत्मानं द्रव्यं बुध्यस्व जानीहि त्वं **गुण पुणु दंसणु णाणु** गुणौ पुनर्दर्शनं ज्ञानं च **पज्जय चउगइ भाव तणु कम्मविणिम्मिय जाणु** तस्यैव जीवस्य पर्यायाश्चतुर्गतिभावान् परिणामान् तनुं शरीरं च । कथंभूतान् तान् । कर्मविनिर्मितान् जानीहीति । इतो विशेषः । शुद्धनिश्चयेन शुद्धबुद्धैकस्वभावमात्मानं द्रव्यं जानीहि । तस्यैवात्मनः सविकल्पं ज्ञानं निर्विकल्पं दर्शनं गुण इति । तत्र ज्ञानमष्टविधं केवलज्ञानं सकलमखंडं शुद्धमिति शेषं सप्तकं खंडज्ञानमशुद्धमिति । तत्र सप्तकमध्ये मत्यादिचतुष्टयं

विभावगुण कहे जाते हैं और वर्णसे वर्णांतर होना, रससे रसांतर होना, गंधसे अन्यगंध होना वह विभावपर्याय हैं । परमाणू शुद्धद्रव्यमें एक वर्ण एक रस एक गंध और शीतउष्णमेंसे एक तथा रूखे चिकनेमेंसे एक ऐसे दो स्पर्श—इस तरह पांच गुण तो मुख्य हैं इनको आदिदे अस्तित्वादि अनंतगुण हैं वे स्वभावगुण कहे जाते हैं और परमाणुका जो आकार वह स्वभावद्रव्यव्यंजन पर्याय है तथा वर्णादिगुणरूप परिणमन वह स्वभावगुणव्यंजनपर्याय है । जीव और पुद्गल इन दोनोंमें तो स्वभाव और विभाव दोनों हैं तथा धर्म अधर्म आकाश काल इन चारोंमें अस्तित्वादिस्वभावगुण ही हैं और अर्थपर्याय षट्गुणी हानिवृद्धिरूप स्वभावपर्याय सभीके हैं । धर्मादिक चार पदार्थोंके विभावगुणपर्याय नहीं हैं । आकाशके घटाकाश मठाकाश इत्यादि कहावत है वह उपचार मात्र है । ये षट् द्रव्योंके गुणपर्याय कहे गये हैं । इन षट् द्रव्योंमें जो शुद्धगुण शुद्ध पर्याय सहित शुद्ध जीवद्रव्य है वही उपादेय है आराधने योग्य है ॥ ५७ ॥

आगे जीवके विशेषपनेकर द्रव्यगुणपर्याय कहते हैं;—हे शिष्य **[त्वं]** तू **[आत्मानं]** आत्माको तो **[द्रव्यं]** द्रव्य **[बुध्यस्व]** जान **[पुनः]** और **[दर्शनं ज्ञानं]** दर्शन ज्ञानको **[गुणौ]** गुण जानो **[चतुर्गतिभावान् तनुं]** चार गतियोंके भाव तथा शरीरको **[कर्मविनिर्मितान्]** कर्मजनित **[पर्यायान्]** विभाव पर्याय **[जानीहि]** समझ । **भावार्थ**—इसका विशेष व्याख्यान करते हैं—शुद्धनिश्चयनयकर शुद्धबुद्ध अखंड स्वभाव आत्माको तू द्रव्य जान, चेतनपनेके सामान्यस्वभावको दर्शन जान और विशेषतासे जानपना उसको ज्ञान समझ। ये दर्शन ज्ञान आत्माके निजगुण हैं, उनमेंसे ज्ञानके आठ भेद हैं, उनमें केवल ज्ञान तो पूर्ण है अखंड है शुद्ध है तथा मतिज्ञान श्रुतज्ञान

सम्यग्ज्ञानं कुमत्यादित्रयं मिथ्याज्ञानं इति । दर्शनचतुष्टयमध्ये केवलदर्शनं सकलमखंडं शुद्धमिति चक्षुरादित्रयं विकलमशुद्धमिति । किं च । गुणास्त्रिविधा भवंति । केचन साधारणाः केचनासाधारणाः केचन साधारणासाधारणा इति । जीवस्य तावदुच्यंते । अस्तित्वं वस्तुत्वं प्रमेयत्वागुरुलघुत्वादयः साधारणाः, ज्ञानसुखादयः स्वजातौ साधारणा अपि विजातौ पुनरसाधारणाः । अमूर्तत्वं पुद्गलद्रव्यं प्रत्यसाधारणमाकाशादिकं प्रति साधारणं । प्रदेशत्वं पुनः कालद्रव्यं प्रति पुद्गलपरमाणुद्रव्यं च प्रत्यसाधारणं शेषद्रव्यं प्रति साधारणमिति संक्षेपव्याख्यानं । एवं शेषद्रव्याणामपि यथासंभवं ज्ञातव्यमिति भावार्थः ॥ ५८ ॥

अथानंतसुखस्योपादेयभूतस्याभिन्नत्वात् शुद्धगुणपर्याय इति प्रतिपादनमुख्यत्वेन सूत्राष्टकं कथ्यते । तत्राष्टकमध्ये प्रथमचतुष्टयं कर्मशक्तिस्वरूपमुख्यत्वेन द्वितीयचतुष्टयं कर्मफलमुख्यत्वेनेति । तद्यथा ।

जीवकर्मणोरनादिसंबंधं कथयति;—

जीवहं कम्मु अणाइ जिय, जणियउ कम्मु ण तेण ।
कम्में जीउवि जणिउ णवि, दोहिंवि आइ ण जेण ॥ ५९ ॥

जीवानां कर्माणि अनादीनि जीव जनितं कर्म न तेन ।
कर्मणा जीवोपि जनितः नैव द्वयोरपि आदिः न येन ॥ ५९ ॥

अवधिज्ञान मनःपर्ययज्ञान—ये चार ज्ञान तो सम्यक् ज्ञान और कुमति कुश्रुत कुअवधि ये तीन मिथ्याज्ञान, ये केवलकी अपेक्षा सातों ही खंडित हैं अखंड नहीं हैं और सर्वथा शुद्ध नहीं हैं अशुद्धताकर सहित हैं इसलिये परमात्मामें एक केवलज्ञान ही है । पुद्गलमें अमूर्तगुण नहीं पाये जाते इस कारण पांचोंकी अपेक्षा साधारण, पुद्गलकी अपेक्षा असाधारण । प्रदेशत्व गुण कालके विना पांचद्रव्योंमें पाया जाता है इसलिये पांचकी अपेक्षा यह प्रदेशगुण साधारण है और कालमें न पानेसे कालकी अपेक्षा असाधारण है । पुद्गल द्रव्यमें मूर्तीकगुण असाधारण है इसीमें पाया जाता है अन्यमें नहीं और अस्तित्वादि गुण इसमें भी पाये जाते हैं तथा अन्यमें भी इसलिये साधारण गुण हैं । चेतनपना पुद्गलमें सर्वथा नहीं पाया जाता अमूर्तीकपना भी नहीं पाया जाता । पुद्गलपरमाणुको द्रव्य कहते हैं, स्पर्श रस गंध वर्णस्वरूप जो मूर्ति वह इस पुद्गलका विशेषगुण है । अन्य सब द्रव्योंमें जो उनका स्वरूप वह **द्रव्य** और अस्तित्वादि **गुण** तथा स्वभावपरिणति **पर्याय** है । जीव और पुद्गलके विना अन्य चार द्रव्योंमें विभाव गुण और विभाव पर्याय नहीं हैं तथा जीव पुद्गलमें स्वभाव विभाव दोनों हैं । उनमेंसे सिद्धोंमें तो स्वभाव ही है और संसारीमें विभावकी मुख्यता है । पुद्गल परमाणूमें स्वभाव ही है और स्कंधमें विभाव ही है । इस तरह छहों द्रव्योंका संक्षेप व्याख्यान जानना ॥ ५८ ॥

जीवहं कम्मु अणाइ जिय जणियउ कम्मु ण तेण जीवानां कर्मणामनादिसंबंधो भवति हे जीव जनितं कर्म न तेन जीवेन **कम्मिं जीउवि जणिउ णवि दोहिंवि आइ ण जेण** कर्मणा कर्तृभूतेन जीवोपि जनितो न द्वयोरप्यादिर्न येन कारणेनेति । इतो विशेषः । जीवकर्मणामनादिसंबंधः पर्यायसंतानेन बीजवृक्षवद्व्यवहारनये संबंधः कर्मतावत्तिष्ठति तथापि शुद्धनिश्चयनयेन विशुद्धज्ञानदर्शनस्वभावेन जीवेन न तु जनितं तथाविधजीवोपि स्वशुद्धात्मसंवित्त्यभावोपार्जितेन कर्मणा नरनारकादिरूपेण न जनितः कर्मात्मेति च द्वयोरनादित्वादिति । अत्रानादिजीवकर्मणोस्संबंधव्याख्यानेन सदा मुक्तः सदा शिवः कोप्यस्तीति निराकृतमिति भावार्थः ॥ तथा चोक्तं । "मुक्तश्चेत्प्राग्भवे बद्धो नो बद्धो मोचनं वृथा । अबद्धो मोचनं नैव मुंचेरर्थो निरर्थकः ॥" अनादितो हि मुक्तश्चेत्पश्चाद्बंधः कथं भवेत् । बंधनं मोचनं नोचेन्मुंचेरर्थो निरर्थकः ॥" ॥ ५९ ॥

ऐसें तीन प्रकार आत्माका है कथन जिसमें ऐसे पहला महाधिकारमें द्रव्यगुणपर्यायके व्याख्यानकी मुख्यतामें सातवें स्थलमें तीन दोहासूत्र कहे हैं । आगे आदर करने योग्य अतींद्रिय सुखसे तन्मयी जो निर्विकल्पभाव उसकी प्राप्तिकेलिये शुद्ध गुणपर्यायके व्याख्यानकी मुख्यताकर आठ दोहा कहते हैं । उनमें पहले चार दोहाओंमें अनादिकर्मसंबंधका व्याख्यान और पिछले चार दोहाओंमें कर्मके फलका व्याख्यान इस प्रकार आठ दोहाओंका रहस्य है, उसमें प्रथम ही जीव और कर्मका अनादिकालका संबंध है ऐसा कहते हैं;—[**हे जीव**] हे आत्मा [**जीवानां**] जीवोंके [**कर्माणि**] कर्म [**अनादीनि**] अनादि कालसे हैं अर्थात् जीव कर्मका अनादिकालका संबंध है [**तेन**] उस जीवने [**कर्म**] कर्म [**न जनितं**] नहीं उत्पन्न किये [**कर्मणा अपि**] ज्ञानावरणादि कर्मोंने भी [**जीवः**] यह जीव [**नैव जनितः**] नहीं उपजाया [**येन**] क्योंकि [**द्वयोः अपि**] जीव कर्म इन दोनोंकी ही [**आदिः न**] आदि नहीं है दोनों ही अनादिके हैं ॥ **भावार्थ**—यद्यपि व्यवहार नयकर पर्यायोंके समूहकी अपेक्षा नये नये कर्म समय २ बांधता है नवे नवे उपार्जन करता है जैसें बीजसे वृक्ष और वृक्षसे वीज होता है उसीतरह पहले बीजरूप कर्मोंसे देह धारता है देहमें नवे नवे कर्मोंको विस्तारता है यह तो वीजसे वृक्ष हुआ । इसीप्रकार जन्मसंतान चली जाती है । परंतु शुद्धनिश्चयनयकर विचारा जावे तो जीव निर्मलज्ञानदर्शन स्वभाव ही है । जीवने ये कर्म न तो उत्पन्न किये और यह जीवभी इन कर्मोंने नहीं पैदा किया । जीव भी अनादिका है ये पुद्गलस्कंध भी अनादिके हैं जीव कर्म नवे नहीं हैं जीव अनादिका कर्मोंसे बंधा है । और कर्मोंके क्षयसे मुक्त होता है । इस व्याख्यानसे जो कोई ऐसा कहते हैं कि आत्मा सदा मुक्त है कर्मोंसे रहित है उनका निराकरण (खंडन) किया । वे वृथा कहते हैं ऐसा

अथ व्यवहारनयेन जीवः पुण्यपापरूपो भवतीति प्रतिपादयति;—

एहु ववहारिं जीवडउ, हेउ लहेविणु कम्मु ।
बहुविहभाविं परिणवइ, तेण जि धम्मु अहम्मु ॥ ६० ॥

एष व्यवहारेण जीवः हेतुं लब्ध्वा कर्म ।
बहुविधभावेन परिणमति तेन एव धर्मः अधर्मः ॥ ६० ॥

एहु ववहारें जीवडउ हेउ लहेविणु कम्मु एष प्रत्यक्षीभूतो जीवो व्यवहारनयेन हेतुं लब्ध्वा । किं । कर्मेति **बहुविहभाविं परिणवइ तेण जि धम्मु अहम्मु** बहुविधभावेन विकल्पज्ञानेन परिणमति तेनैव कारणेन धर्माधर्मश्च भवतीति । तद्यथा । एष जीवः शुद्धनिश्चयेन वीतरागचिदानंदैकस्वभावोपि पश्चाद्व्यवहारेण वीतरागनिर्विकल्पस्वसंवेदनाभावेनोपार्जितं शुभाशुभं कर्म हेतुं लब्ध्वा पुण्यरूपः पापरूपश्च भवति । अत्र यद्यपि व्यवहारेण पुण्यपापरूपो भवति तथापि परमात्मानुभूत्यविनाभूतवीतरागसम्यग्दर्शनज्ञानचारित्रबहिर्द्रव्येच्छानिरोधलक्षणतपश्चरणरूपा या तु निश्चयचतुर्विधाराधना तस्या भावनाकाले साक्षादुपादेयभूतवीतरागपरमानंदैकरूपो मोक्षसुखादभिन्नत्वात् शुद्धजीव उपादेय इति तात्पर्यार्थः ॥ ६० ॥

तात्पर्य है । ऐसा दूसरी जगहभी कहा है—"मुक्तश्चेत्" इत्यादि । इसका अर्थ यह है कि जो यह जीव पहले बंधा हुआ होवे तभी 'मुक्त' ऐसा कथन संभवता है और जो पहले बंधा ही नहीं तो 'मुक्त' ऐसा कहना किसतरह ठीक हो सकता है । मुक्त तो छूटे हुएका नाम है सो जब बंधा ही नहीं तो 'छूटा' किसतरह कहा जासकता है । जो अबंध है उसको छूटा कहना ठीक नहीं । जो विभावबंध मुक्ति मानते हैं उनका कथन निरर्थक है । जो यह अनादिका मुक्त ही होवे तो पीछे बंध कैसे संभव हो सकता है । बंध होवे तभी मोचन होसके । जो बंध न हो तो मुक्त कहना निरर्थक है ॥ ५९ ॥

आगे व्यवहार नयकर यह जीव पुण्यपापरूप होता है ऐसा कहते हैं;—[**एष जीवः**] यह जीव [**व्यवहारेण**] व्यवहारनयकर [**कर्म हेतुं**] कर्मरूप कारणको [**लब्ध्वा**] पाकरके [**बहुविधभावेन**] अनेक विकल्परूप [**परिणमति**] परिणमता है [**तेन एव**] इसीसे [**धर्मः अधर्मः**] पुन्य और पापरूप होता है ॥ **भावार्थ**—यह जीव शुद्धनिश्चयनयकर वीतरागचिदानंद स्वभाव है तौभी व्यवहारनयकर वीतराग निर्विकल्पस्वसंवेदनज्ञानके अभावसे रागादिरूप परिणमनेसे उपार्जनकिये शुभ अशुभ कर्मोंके कारणको पाकर पुन्यी तथा पापी होता है । यद्यपि यह व्यवहारनयकर पुन्य पापरूप है तौभी परमात्माकी अनुभूतिसे तन्मयी जो वीतरागसम्यग्दर्शनज्ञानचारित्र और बाह्यपदार्थोंमें इच्छाके रोकने रूप तप ये चार निश्चय आराधना हैं उनकी भावनाके समय साक्षात् उपादेयरूप वीतरागपरमानंद

अथ तानि पुनः कर्माण्यष्टौ भवंतीति कथयति;—

ते पुणु जीवहं जोइया, अट्ठवि कम्म हवंति ।
जेहिं जि झंपिय जीव णवि, अप्पसहाउ लहंति ॥ ६१ ॥

तानि पुनः जीवानां योगिन् अष्टौ एव कर्माणि भवंति ।
यैः एव झंपिताः जीवाः नैव आत्मस्वभावं लभंते ॥ ६१ ॥

ते पुणु जीवहं जोइया अट्ठवि कम्म हवंति तानि पुनर्जीवानां हे योगिन्नष्टावेव कर्माणि भवंति । **जेहिं जि झंपिय जीव णवि अप्पसहाउ लहंति** यैरेव कर्मभिर्झंपिताः संतो जीवाः सम्यक्त्वाद्यष्टविधस्वकीयस्वभावं न लभंते । तद्यथा हि । "सम्मत्तणाणदंसण-वीरियसुहुमं तहेव अवगहणं । अगुरुगलहुगं अव्वावाहं अट्ठगुणा हुंति सिद्धाणं" । शुद्धात्मादिपदार्थविषये विपरीताभिनिवेशरहितः परिणामः क्षायिकसम्यक्त्वमिति भण्यते । जगत्त्रयकालत्रयवर्तिपदार्थयुगपद्विशेषपरिच्छित्तिरूपं केवलज्ञानं भण्यते तत्रैव सामान्यपरि-च्छित्तिरूपं केवलदर्शनं भण्यते । तत्रैव केवलज्ञानविषये अनंतपरिच्छित्तिशक्तिरूपमनंतवीर्यं भण्यते । अतींद्रियज्ञानविषयं सूक्ष्मत्वं भण्यते । एकजीवावगाहप्रदेशे अनंतजीवावगाहदान-सामर्थ्यमवगाहनत्वं भण्यते । एकांतेन गुरुलघुत्वस्याभावरूपेण अगुरुलघुत्वं भण्यते ।

जो मोक्षका सुख उसमे अभिन्न आनंदमई ऐसा निजशुद्धात्मा ही उपादेय है अन्य सब हेय हैं ॥ ६० ॥

आगे वे कर्म आठ हैं जिनसे संसारी जीव बंधे हैं ऐसा कहते हैं;—श्री-गुरु अपने शिष्य मुनिको कहते हैं कि [**हे योगिन्**] हे योगी [**तानि पुनः कर्माणि**] वे फिर कर्म [**जीवानां अष्टौ एव**] जीवोंके आठ ही [**भवंति**] होते हैं [**यैः एव झंपिताः**] जिन कर्मोंसे ही आच्छादित (ढकेहुए) [**जीवाः**] ये जीव [**आत्मस्वभावं**] अपने सम्यक्त्वादि आठगुणरूप स्वभावको [**नैव लभंते**] नहीं पाते ॥ अब उन्हीं आठ गुणोंका व्याख्यान करते हैं "सम्मत्त" इत्यादि—इसका अर्थ ऐसा है कि शुद्ध आत्मादि पदार्थोंमें विपरीत श्रद्धानरहित जो परिणाम उसको क्षायिक सम्यक्त्व कहते हैं, तीन लोक तीन कालके पदार्थोंको एक ही समयमें विशेषरूप सबको जानें वह केवलज्ञान है, सब पदार्थोंको केवलदृष्टिसे एक ही समयमें देखै वह केवल दर्शन है । उसी केवलज्ञानमें अनंतज्ञायक (जाननेकी) शक्ति वह अनंतवीर्य है, अतींद्रियज्ञानकर अमूर्तीक सूक्ष्मपदार्थोंको जानना आप चार ज्ञानके धारियोंसे न जाना जावे वह सूक्ष्मत्व है, एक जीवके अवगाह क्षेत्रमें (जगहमें) अनंते जीव समाजायें ऐसी अवकाश देनेकी सामर्थ्य वह अवगाहन गुण है, सर्वथा गुरुता और लघुताका अभाव

मोक्षसुख वर्णन किया है सो ये जगतके प्राणी अतींद्रियसुखको जानते ही नहीं हैं इंद्रियसुखको ही सुख मानते हैं । तब गुरुने कहा कि हे प्रभाकर भट्ट कोई एक पुरुष जिसका चित्त व्याकुलतारहित है और पंचेंद्रियके भोगोंसे रहित अकेला स्थित है उससमय किसी पुरुषने पूछा कि तुम सुखी हो । तब उसने कहा कि सुखसे तिष्ठ रहे हैं उस समयपर विषयसेवनादि सुख तो है ही नहीं उसने यह क्यों कहा कि हम सुखी हैं । इसलिये यह मालूम होता है सुख नाम व्याकुलता रहितका है सुखका मूल निर्व्याकुलपना है वह निर्व्याकुल अवस्था आत्मामें ही है विषय सेवनमें नहीं । भोजनादि जिह्वा इंद्रियका विषय भी उस समय नहीं है, स्त्रीसेवनादि स्पर्शका विषय नहीं है और गंधमाल्यादिक नाकका विषय भी नहीं है, दिव्य स्त्रियोंका रूप अवलोकनादि नेत्रका विषय भी नहीं और कानोंका मनोज्ञ गीत वादित्रादि शब्द विषयभी नहीं हैं इसलिये जानते हैं कि सुख आत्मामें ही है । ऐसा तू निश्चयकर जो एकोदेश विषयव्यापारसे रहित हैं उनके एकोदेश थिरताका सुख है तो वीतरागनिर्विकल्पस्वसंवेदनज्ञानियोंके समस्त पंच इंद्रियोंके विषय और मनके विकल्प जालोंकी रुकावट होनेपर विशेषतासे निर्व्याकुल सुख उपजता है । इसलिये ये दो वातें तो प्रत्यक्ष ही दृष्टि पड़ती हैं । जो पुरुष नीरोग और चिंतारहित हैं उनके विषयसामग्रीके विना ही सुख भासता है और जो महामुनि शुद्धोपयोग अवस्थामें ध्यानारूढ हैं उनके निर्व्याकुलता प्रगट ही दीख रही है वे इंद्रादिक देवोंसे भी अधिक सुखी हैं । इसकारण जब संसार अवस्थामें ही सुखका मूल निर्व्याकुलता दीखती है तो सिद्धोंके सुखकी वात ही क्या है । यद्यपि वे सिद्ध दृष्टिगोचर नहीं हैं तौ भी अनुमानकर ऐसा जानाजाता है कि सिद्धोंके भावकर्म द्रव्यकर्म नोकर्म नहीं तथा विषयोंकी प्रवृत्ति नहीं है कोई भी विकल्पजाल नहीं है केवल अतींद्रिय आत्मीक सुख ही है वही सुख उपादेय है अन्य सुख सब दुःखरूप ही हैं । जो चारों गतियोंके पर्याय हैं उनमें

ब्धिरिति । अत्रेत्थंभूतसुखमेवोपादेयमिति भावार्थः । तथागमे चोक्तमात्मोत्थमतींद्रियसुखं । "अइसयमादसमुत्थं विसयातीदं अणोवममणंतं । अव्वुच्छिण्णं च सुहं सुद्धुवओगप्पसिद्धाणं" ॥ १३५ ॥

अथ यस्मिन् मोक्षे पूर्वोक्तमतींद्रियसुखमस्ति तस्य मोक्षस्य स्वरूपं कथयति;—

जीवहं सो पर मुक्खु मुणि, जो परमप्पयलाहु ।
कम्मकलंकविमुक्काहं, णाणिय बोल्लहिं साहु ॥ १३६ ॥

जीवानां तं परं मोक्षं मन्यस्व यः परमात्मलाभः ।
कर्मकलंकविमुक्तानां ज्ञानिनः ब्रुवंति साधवः ॥ १३६ ॥

जीवहं इत्यादि । **जीवहं** जीवानां **सो** तं परं नियमेन **मोक्खु** मोक्षं **मुणि** मन्यस्व जानीहि हे प्रभाकरभट्ट । तं कं । **जो परमप्पयलाहु** यः परमात्मलाभः । इत्थंभूतो मोक्षः केषां भवति । **कम्मकलंकविमुक्काहं** ज्ञानावरणाद्यष्टविधकर्मकलंकविमुक्तानां । इत्थंभूतं मोक्षं के ब्रुवंति । **णाणिय बोल्लहिं** वीतरागस्वसंवेदनज्ञानिनो ब्रुवंति । ते के । **साहु** साधवः इति । तथाहि । केवलज्ञानाद्यनंतगुणव्यक्तिरूपस्य कार्यसमयसारभूतस्य हि परमात्मालाभो मोक्षो भवतीति । स च केषां । पुत्रकलत्रममत्वस्वरूपप्रभृतिसमस्तविकल्परहितध्यानेन भावकर्मद्रव्यकर्मकलंकरहितानां भव्यानां भवतीति ज्ञानिनः कथयंति । अत्रायमेव मोक्षः पूर्वोक्तस्यानंतसुखस्योपादेयभूतस्य कारणत्वादुपादेय इति भावार्थः

कदापि सुख नहीं है । सुख तो सिद्धोंके है या महामुनीश्वरोंके सुखका लेशमात्र देखाजाता है दूसरेके जगतकी विषयवासनाओंसे सुख नहीं है । ऐसा ही कथन श्रीप्रवचनसारमें किया है । "अइसय" इत्यादि । सारांश यह है कि जो शुद्धोपयोगकर प्रसिद्ध ऐसे श्रीसिद्ध परमेष्ठी हैं उनके अतींद्रियसुख है वह सर्वोत्कृष्ट है और आत्मजनित है तथा विषयवासनासे रहित है अनुपम है जिसके समान सुख तीनलोकमें भी नहीं है जिसका पार नहीं बाधारहित ऐसा सुख सिद्धोंके है ॥ १३५ ॥

आगे जिस मोक्षमें ऐसा अतींद्रिय सुख है उस मोक्षका स्वरूप कहते हैं;—हे प्रभाकरभट्ट जो [**कर्मकलंकविमुक्तानां जीवानां**] कर्मरूपी कलंकसे रहित जीवोंको [**यः परमात्मलाभः**] जो परमात्मकी प्राप्ति है [**तं परं**] उसीको नियमसे तू [**मोक्षं मन्यस्व**] मोक्ष जान ऐसा [**ज्ञानिनः साधवः**] ज्ञानवान् मुनिराज [**ब्रुवंति**] कहते हैं, रत्नत्रयके योगसे मोक्षका साधन करते हैं इससे उनका नाम साधु है । **भावार्थ**—केवलज्ञानादि अनंतगुण प्रगट रूप जो कार्यसमयसार अर्थात् शुद्धपरमात्माका लाभ वह मोक्ष है यह मोक्ष भव्यजीवोंके ही होती है । भव्य कैसे हैं कि पुत्रकलत्रादि पर वस्तुओंके ममत्वको आदि लेकर सब विकल्पोंसे रहित जो आत्मध्यान उससे जिन्होंने भावकर्म

॥ १३६ ॥ एवं मोक्षमोक्षफलमोक्षमार्गादिप्रतिपादकद्वितीयमहाधिकारमध्ये सूत्रदशकेन मोक्षस्वरूपनिरूपणस्थलं समाप्तं ।

अथ तस्यैव मोक्षस्यानंतचतुष्टयस्वरूपं फलं दर्शयति;—

दंसणु णाणु अणंतसुहु, समउ ण तुट्टइ जासु ।
सो पर सासउ मोक्खफलु, बिज्जउ अत्थि ण तासु ॥ १३७ ॥

दर्शनं ज्ञानं अनंतसुखं समयं न त्रुट्यति यस्य ।
तत् परं शाश्वतं मोक्षफलं द्वितीयं अस्ति न तस्य ॥ १३७ ॥

दंसणु इत्यादि । **दंसणु** केवलदर्शनं **णाणु** केवलज्ञानं **अणंतसुहु** अनंतसुखं एतदुपलक्षणमनंतवीर्याद्यनंतगुणाः **समउ ण तुट्टइ** एतद्गुणकदंबकमेकसमयमपि यावन्न त्रुट्यति न नश्यति **जासु** यस्य मोक्षपर्यायस्याभेदेन तदाधारजीवस्य वा **सो पर** तदेव केवलज्ञानादिस्वरूपं **सासउ मोक्खफलु** शाश्वतं मोक्षफलं भवति **बिज्जउ अत्थि ण तासु** तस्यानंतज्ञानादिमोक्षफलस्यान्यं द्वितीयमधिकं किमपि नास्तीति । अयमत्र भावार्थः । अनंतज्ञानादिमोक्षफलं ज्ञात्वा समस्तरागादित्यागेन तदर्थमेव निरतरं शुद्धात्मभावना कर्तव्येति ॥ १३७ ॥ एवं द्वितीयमहाधिकारे मोक्षफलकथनरूपेण स्वतंत्रसूत्रमेकं गतं ।

अथानंतरमेकोनविंशतिसूत्रपर्यंतं निश्चयव्यवहारमोक्षमार्गव्याख्यानस्थलं कथ्यते तद्यथा;—

जीवहं मुक्खहं हेउ वरु, दंसणु णाणु चरित्तु ।
ते पुणु तिण्णिवि अप्पु मुणि, णिच्छइं एहउ वुत्तु ॥ १३८ ॥

द्रव्यकर्मरूपी कलंक क्षय किये हैं ऐसे जीवोंके निर्वाण होता है ऐसा ज्ञानी जन कहते हैं । यहां पर अनंतसुखका कारण होनेसे मोक्ष ही उपादेय है ॥ १३६ ॥

इस प्रकार मोक्षका फल और मोक्ष मार्गका जिसमें कथन है ऐसा दूसरे महाधिकारमें दस दोहाओंसे मोक्षका स्वरूप दिखलाया ।

आगे मोक्षका फल अनंतचतुष्टय है यह दिखलाते हैं;—[**यस्य**] जिस मोक्षपर्यायके धारक शुद्धात्माके [**दर्शनं ज्ञानं अनंतसुखं**] केवलदर्शन केवलज्ञान अनंतसुख और अनंतवीर्य इन अनंतचतुष्टयोंको आदि देकर अनंत गुणोंका समूह [**समयं न त्रुट्यति**] एक समयमात्र भी नाश नहीं होता अर्थात् हमेशा अनंतगुण पाये जाते हैं । [**तस्य**] उस शुद्धात्माके [**तत्**] वही [**परं**] निश्चयसे [**शाश्वतं फलं**] हमेशा रहनेवाला मोक्षका फल [**अस्ति**] है [**द्वितीयं न**] इसके सिवाय दूसरा मोक्षफल नहीं है और इससे अधिक दूसरी वस्तु कोई नहीं है । **भावार्थ**—मोक्षका फल अनंत ज्ञानादि जानकर समस्तरागादिकका त्यागकरके उसीके लिये निरंतर शुद्धात्माकी भावना करनी चाहिये ॥१३७॥

जीवानां मोक्षस्य हेतुः वरं दर्शनं ज्ञानं चारित्रं ।
तानि पुनः त्रीण्यपि आत्मानं मन्यस्व निश्चयेन एवं उक्तं ॥ १३८ ॥

जीवहं इत्यादि । **जीवहं** जीवानां अथवा एकवचनपक्षे 'जीवहो' जीवस्य **मोक्खहं हेउ** मोक्षस्य हेतुः कारणं व्यवहारनयेन भवतीति क्रियाध्याहारः । कथंभूतं । **वरु** वरमुत्कृष्टं । किं तत् । **दंसणु णाणु चरित्तु** सम्यग्दर्शनज्ञानचारित्रत्रयं । **ते पुणु** तानि पुनः **तिण्णिवि** त्रीण्यपि सम्यग्दर्शनज्ञानचारित्राणि **अप्पु** आत्मानमभेदनयेन **मुणि** मन्यस्व जानीहि त्वं हे प्रभाकरभट्ट **णिच्छए** निश्चयनयेन **एहउ वुत्तु** एवमुक्तं भणितं तिष्ठतीति । इदमत्र तात्पर्यं । भेदरत्नत्रयात्मको व्यवहारमोक्षमार्गो साधको भवति अभेदरत्नत्रयात्मकः पुनर्निश्चयमोक्षमार्गः साध्यो भवत्येवं निश्चयव्यवहारमोक्षमार्गयोः साध्यसाधकभावो ज्ञातव्यः सुवर्णसुवर्णपाषाणवत् इति । तथा चोक्तं । "सम्मद्दंसणणाणं चरणं मोक्खस्स कारणं जाणे । ववहारा णिच्छयदो तत्तियमइओ णिओ अप्पा" ॥ १३८ ॥

अथ निश्चयरत्नत्रयपरिणतो निजशुद्धात्मैव मोक्षमार्गो भवतीति प्रतिपादयति;—

पेच्छइ जाणइ अणुचरइ, अप्पिं अप्पउ जो जि ।
दंसणु णाणु चरित्तु जिउ, मुक्खहं कारणु सो जि ॥ १३९ ॥

पश्यति जानाति अनुचरति आत्मना आत्मानं य एव ।
दर्शनं ज्ञानं चारित्रं जीवः मोक्षस्य कारणं स एव ॥ १३९ ॥

पिच्छइ इत्यादि । **पिच्छइ** पश्यति **जाणइ** जानाति **अणुचरइ** अनुचरति । केन

इस प्रकार दूसरे महाधिकारमें मोक्षफलके कथनकी मुख्यताकर एक दोहासूत्र कहा ।

आगे उन्नीसदोहापर्यंत निश्चय व्यवहारमोक्षमार्गका व्याख्यान करते हैं;—[**जीवानां**] जीवोंके [**मोक्षस्य हेतुः**] मोक्षके कारण [**वरं**] उत्कृष्ट [**दर्शनं ज्ञानं चारित्रं**] दर्शन ज्ञान और चारित्र हैं [**तानि पुनः**] फिर वे [**त्रीण्यपि**] तीनों ही [**निश्चयेन**] निश्चयकर [**आत्मानं**] आत्माको ही [**मन्यस्व**] जानो [**एवं**] ऐसा [**उक्तं**] श्रीवीतरागदेवने कहा है ऐसा हे प्रभाकरभट्ट तू जान । **भावार्थ**—भेदरत्नत्रयरूप व्यवहारमोक्षमार्ग साधक है और अभेदरत्नत्रयरूप निश्चयमोक्षमार्ग साधने योग्य है । इस प्रकार निश्चयव्यवहारमोक्षमार्गका साध्यसाधकभाव, सुवर्ण सुवर्णपाषाणकी तरह जानना । ऐसा ही कथन श्रीद्रव्यसंग्रहमें कहा है । "सम्मद्दंसण" इत्यादि । इसका अभिप्राय यह है कि सम्यग्दर्शन सम्यग्ज्ञान सम्यक् चारित्र ये तीनों ही व्यवहारनयकर मोक्षके कारण जानना और निश्चयसे उन तीनोंमयी एक आत्मा ही मोक्षका कारण है ॥ १३८ ॥

आगे निश्चयरत्नत्रयरूप परिणया निजशुद्धात्मा ही मोक्षका मार्ग है ऐसा क-

कृत्वा । **अप्पइं** आत्मना करणभूतेन । कं कर्मतापन्नं । **अप्पउ** निजात्मानं **जो जि** य एव कर्ता **दंसणुणाणुचरित्तु** दर्शनज्ञानचारित्रत्रयं भवतीति क्रियाध्याहारः । कोसौ भवति । **जीउ** जीवः य एवाभेदनयेन सम्यग्दर्शनज्ञानचारित्रत्रयं भवतीति **मोक्खहं कारणु** निश्चयेन मोक्षस्य कारणं एक एव **सो जि** स एव निश्चयरत्नत्रयपरिणतो जीव इति । तथाहि । यः कर्ता निजात्मानं मोक्षस्य कारणभूतेन पश्यति निर्विकल्परूपेणावलोकयति । अथवा । तत्त्वार्थश्रद्धानापेक्षया चलमलिनावगाढपरिहारेण शुद्धात्मैवोपादेय इति रुचिरूपेण निश्चिनोति न केवलं निश्चिनोति वीतरागस्वसंवेदनलक्षणाभेदज्ञानेन जानाति परिच्छिनत्ति । न केवलं परिच्छिनत्ति । अनुचरति रागादिसमस्तविकल्पत्यागेन तत्रैव निजस्वरूपे स्थिरीभवतीति स निश्चयरत्नत्रयपरिणतः पुरुष एव निश्चयमोक्षमार्गो भवतीति । अत्राह प्रभाकरभट्टः । तत्त्वार्थश्रद्धानरुचिरूपं सम्यग्दर्शनं मोक्षमार्गो भवति नास्ति दोषः पश्यति निर्विकल्परूपेणावलोकयति इत्येवं यदुक्तं तत्सत्तावलोकदर्शनं कथं मोक्षमार्गो भवति यदि भवति चेत्तर्हि तत्सत्तावलोकदर्शनमभव्यानामपि विद्यते तेषामपि मोक्षो भवति स चागमविरोधः इति । परिहारमाह । तेषां निर्विकल्पसत्तावलोकदर्शनं बहिर्विषये विद्यते न चाभ्यंतरशुद्धात्मतत्त्वविषये । कस्मादिति चेत् । तेषामभव्यानां मिथ्यात्वादिसप्तप्रकृत्युपशमक्षयोपशमक्षयाभावात् शुद्धात्मोपादेय इति रुचिरूपं सम्यग्दर्शनमेव नास्ति चारित्रमोहो-

---

हते हैं;—[**य एव**] जो [**आत्मना**] अपनेसे [**आत्मानं**] आपको [**पश्यति**] देखता है [**जानाति**] जानता है [**अनुचरति**] आचरण करता है [**स एव**] वही विवेकी [**दर्शनं ज्ञानं चारित्रं**] दर्शन ज्ञान चारित्ररूपपरिणया [**जीवः**] जीव [**मोक्षस्य कारणं**] मोक्षका कारण है । **भावार्थ**—जो सम्यग्दृष्टी जीव अपने आत्माको आपकर निर्विकल्परूप देखता है अथवा तत्त्वार्थ श्रद्धानकी अपेक्षा चंचलता और मलिनता तथा शिथिलता इनका त्यागकर शुद्धात्मा ही उपादेय है इस प्रकार रुचिरूप निश्चय करता है, वीतराग स्वसंवेदनलक्षण ज्ञानसे जानता है और सब रागादिक विकल्पोंके त्यागसे निजस्वरूपमें स्थिर होता है सो निश्चय रत्नत्रयको परिणत हुआ पुरुष ही मोक्षका मार्ग है । ऐसा कथन सुनकर प्रभाकरभट्टने प्रश्न किया । कि हे प्रभो तत्त्वार्थ श्रद्धान रुचिरूप सम्यग्दर्शन वह मोक्षका मार्ग है इसमें तो दोष नहीं और तुमने कहा कि जो देखै वह दर्शन, जानें वह ज्ञान और आचरण है वह चारित्र । सो यह देखनेरूप दर्शन कैसे मोक्षका मार्ग होसकता है । और जो कभी देखनेका नाम दर्शन कहो तो देखना अभव्यके भी होता है उसके मोक्षमार्ग तो नहीं माना है यदि अभव्यक मोक्षमार्ग होवै तो आगमसे विरोध आवै । आगममें तो यह निश्चय है कि अभव्यको मोक्ष नहीं होती । उसका समाधान यह है कि अभव्योंके देखनेरूप जो दर्शन है वह बाह्यपदार्थोंका है अंतरंगशुद्धात्मतत्त्वका दर्शन तो अभव्योंके नहीं होता उनके मिथ्यात्व

दयात् पुनर्वीतरागचारित्ररूपं निर्विकल्पशुद्धात्मसत्तावलोकनमपि न संभवतीति भावार्थः । निश्चयेनाभेदरत्नत्रयपरिणतो निजशुद्धात्मैव मोक्षमार्गो भवतीत्यस्मिन्नर्थे संवादगाथामाह । "रयणत्तयं ण वट्टइ अप्पाणं मुइत्तु अण्णदवियम्मि । तह्मा तत्तियमइओ होदि हु मोक्खस्स कारणं आदा" ॥ १३९ ॥

अथ भेदरत्नत्रयात्मकं व्यवहारमोक्षमार्गं दर्शयति;—

जं बोल्लइ ववहारणउ, दंसणु णाणु चरित्तु ।
तं परियाणहि जीव तुहुं, जें परु होहि पवित्तु ॥ १४० ॥

यत् ब्रूते व्यवहारनयः दर्शनं ज्ञानं चारित्रं ।
तत् परिजानीहि जीव त्वं येन परः भवसि पवित्रः ॥ १४० ॥

जं इत्यादि । जं यत् बुल्लइ ब्रूते । कोसौ कर्ता । **ववहारणउ** व्यवहारनयः । यत् किं ब्रूते । **दंसणु णाणु चरित्तु** सम्यग्दर्शनज्ञानचारित्रत्रयं तं पूर्वोक्तं भेदरत्नत्रयस्वरूपं **परियाणहि** परि समंतात् जानीहि **जीव तुहुं** हे जीव त्वं कर्ता **जिं** येन भेदरत्नत्रयपरिज्ञानेन **परु होहि** परः उत्कृष्टो भवसि त्वं । पुनरपि किं विशिष्टस्त्वं । **पवित्तु** पवित्रः सर्वजनपूज्य इति । तद्यथा । हे जीव सम्यग्दर्शनज्ञानचारित्ररूपनिश्चयरत्नत्रयलक्षणनिश्चयमोक्षमार्ग-साधकं व्यवहारमोक्षमार्गं जानीहि त्वं येन ज्ञातेन कथंभूतो भविष्यसि ? परंपरया पवित्रः

आदि सात प्रकृतियोंका उपशम क्षयोपशम क्षय नहीं है तथा शुद्धात्मा ही उपादेय है ऐसी रुचिरूप सम्यग्दर्शन भी उनके नहीं है और चारित्रमोहके उदयसे वीतराग चारित्ररूप निर्विकल्प शुद्धात्मका सत्तावलोकन भी कभी नहीं है । तात्पर्य यह है निश्चयकर अभेदरत्नत्रयको परिणत हुआ निज शुद्धात्मा ही मोक्षका मार्ग है । ऐसा ही द्रव्यसंग्रहमें साक्षीभूत गाथा कहा है । "रयणत्तयं" इत्यादि । उसका अर्थ ऐसा है कि रत्नत्रय आत्माको छोड़कर अन्य (दूसरी) द्रव्योंमें नहीं रहते इसलिये मोक्षका कारण उन तीनमई निजआत्मा ही है ॥ १३९ ॥

आगे भेदरत्नत्रयस्वरूप व्यवहार वह परंपराय मोक्षका मारग है ऐसा दिखलाते हैं;— [**जीव**] हे जीव [**व्यवहारनयः**] व्यवहारनय [**यत्**] जो [**दर्शनं ज्ञानं चारित्रं**] दर्शन ज्ञान चारित्र इन तीनोंको [**ब्रूते**] कहता है [**तत्**] उस व्यवहाररत्नत्रयको [त्वं] तू [**परिजानीहि**] जान [**येन**] जिससे कि [**परः पवित्रः**] उत्कृष्ट पवित्र [**भवसि**] होवै । **भावार्थ**—हे जीव तू तत्त्वार्थका श्रद्धान शास्त्रका ज्ञान और अशुभक्रियाओंका त्यागरूप सम्यग् दर्शन ज्ञान चारित्र व्यवहारमोक्षमार्गको जान क्योंकि ये निश्चयरत्नत्रयरूप निश्चयमोक्षमार्गके साधक हैं इनके जाननेसे किसी समय परमपवित्र परमात्मा हो जायगा । पहले व्यवहार रत्नत्रयकी प्राप्ति होजावे तब ही निश्चयरत्नत्रयकी

परमात्मा भविष्यसि इति । व्यवहारनिश्चयमोक्षमार्गस्वरूपं कथ्यते । तद्यथा । वीतराग-सर्वज्ञप्रणीतषड्द्रव्यादिसम्यक्श्रद्धानज्ञानव्रताद्यनुष्ठानरूपो व्यवहारमोक्षमार्गः निजशुद्धात्मसम्यक्श्रद्धानज्ञानानुष्ठानरूपो निश्चयमार्गः । अथवा साधको व्यवहारमोक्षमार्गः साध्यो निश्चयमोक्षमार्गः । अत्राह शिष्यः । निश्चयमोक्षमार्गो निर्विकल्पः तत्काले सविकल्पमोक्षमार्गो नास्ति कथं साधको भवतीति । अत्र परिहारमाह । भूतनैगमनयेन परंपरया भवतीति । अथवा सविकल्पनिर्विकल्पभेदेन निश्चयमोक्षमार्गो द्विधा; तत्रानंतज्ञानरूपोऽहमित्यादि सविकल्पसाधको भवति, निर्विकल्पसमाधिरूपो साध्यो भवतीति भावार्थः ॥ सविकल्पनिर्विकल्पनिश्चयमोक्षमार्गविषये संवादगाथामाह । "जं पुण सगयं तच्चं सवियप्पं

प्राप्ति होसकती है इसमें संदेह नहीं है । जो अनंतसिद्ध हुए और होवेंगे वे पहले व्यवहार रत्नत्रयको पाकर निश्चय रत्नत्रयरूप हुए । व्यवहार साधन है और निश्चयसाध्य है । *व्यवहार निश्चयमोक्षमार्गका स्वरूप कहते हैं—वीतरागसर्वज्ञदेवके* कहे हुए छह द्रव्य साततत्त्व नौ पदार्थ पंचास्तिकाय इनका श्रद्धान इनके स्वरूपका ज्ञान और शुभक्रियाका आचरण यह व्यवहार मोक्षमार्ग है और निज शुद्ध आत्माका सम्यक् श्रद्धान स्वरूपका ज्ञान और स्वरूपका आचरण यह निश्चयमोक्षमार्ग है । साधनके विना सिद्धि नहीं होती इसलिये व्यवहारके विना निश्चयकी प्राप्ति नहीं होती । यह कथन सुनकर शिष्यने प्रश्न किया कि हे प्रभो निश्चयमोक्षमार्ग जो निश्चय रत्नत्रय वह तो निर्विकल्प है और व्यवहार रत्नत्रय विकल्प सहित है सो यह विकल्पदशा निर्विकल्पपनेकी साधन कैसे होसकती है इसकारण उसको साधक मत कहो । उसका समाधान करते हैं । जो अनादिकालका यह जीव विषय कषायोंकर मलीन होरहा है सो व्यवहारसाधनके विना उज्ज्वल नहीं होसकता जब मिथ्यात्व अव्रत कषायादिककी क्षीणतासे देवगुरु धर्मकी श्रद्धा करै तत्त्वोंका जानपना होवै अशुभक्रिया मिट जावै तब गुरू वह अध्यात्मका अधिकारी होसकता है । जैसे मलिन कपडेको धोवें तव रंगने योग्य होता है विना धोये रंग नहीं लगता इसलिये परंपराय मोक्षका कारण व्यवहाररत्नत्रय कहा है । मोक्षका मार्ग दो प्रकार है एक व्यवहार दूसरा निश्चय, निश्चय तो साक्षात् मोक्षमार्ग है और व्यवहार परंपराय है । अथवा सविकल्प निर्विकल्पके भेदसे निश्चय मोक्षमार्ग भी दो प्रकारका है । जो मैं अनंतज्ञानरूप हूं शुद्ध हूं एक हूं ऐसा 'सोहं' का चिंतवन है वह तो सविकल्प निश्चयमोक्षमार्ग है उसको साधक कहते हैं और जहांपर कुछ चिंतवन नहीं है कुछ बोलना नहीं है और कुछ चेष्टा नहीं है वह निर्विकल्पसमाधिरूप साध्य है यह तात्पर्य हुआ । इसी कथनके वारेमें द्रव्यसंग्रहकी साख देते हैं । "मा चिट्ठह" इत्यादि । सारांश यह है कि हे जीव तू कुछ भी कायकी चेष्टा मत करै कुछ बोलै भी मत

होइ तह य अवियप्पं । सवियप्पं सासवयं निरासवं विगयसंकप्पं" ॥ १४० ॥ एवं पूर्वोक्त-एकोनविंशतिसूत्रप्रमितमहास्थलमध्ये निश्चयव्यवहारमोक्षमार्गप्रतिपादनरूपेण सूत्रत्रयं गतं । इदानीं चतुर्दशसूत्रपर्यंतं व्यवहारमोक्षमार्गप्रथमावयवभूतव्यवहारसम्यक्त्वं मुख्यवृत्त्या प्रतिपादयति । तद्यथा;—

दव्वइं जाणइं जह ठियइं, तहं जगि मण्णइ जो जि ।
अप्पहं केरउ भावडउ, अविचलु दंसणु सो जि ॥ १४१ ॥

द्रव्याणि जानाति यथास्थितानि तथा जगति मन्यते य एव ।
आत्मनः संबंधि भावः अविचलः दर्शनं स एव ॥ १४१ ॥

दव्वइं इत्यादि । **दव्वइं** द्रव्याणि **जाणइं** जानाति । कथंभूतानि । **जहठियइं** यथास्थितानि वीतरागस्वसंवेदनलक्षणस्य निश्चयसम्यग्ज्ञानस्य परंपरया कारणभूतेन परमागमज्ञानेन परिछिनत्तीति । न केवलं परिछिनत्ति **तह** तथैव **जगि** इह जगति **मण्णइ** मन्यते निजात्मद्रव्यमेवोपादेयमिति रुचिरूपं यन्निश्चयसम्यक्त्वं तस्य परंपरया कारणभूतेन । "मूढत्रयं मदश्चाष्टौ तथानायतानि षट् । अष्टौ शंकादयश्चेति दृग्दोषाः पंचविंशतिः" ॥ लोककथितपंचविंशतिसम्यक्त्वमलत्यागेन श्रद्दधातीति । एवं द्रव्याणि जानाति श्रद्दधाति । कोसौ । **अप्पहं केरउ भावडउ** आत्मनः संबंधिभावः परिणामः । किंविशिष्टो भावः । **अविचलु**

मौन रह और कुछ चिंतवन भी मत करै । सब वातों को छोड आत्मामें आपको लीन कर, यह ही परमध्यान है । श्रीतत्त्वसारमें भी सविकल्प निर्विकल्प निश्चयमोक्ष-मार्ग के कथनमें यह गाथा कही है कि "जं पुण सगइं" इत्यादि । इसका सारांश यह है कि जो आत्मतत्त्व है वह भी सविकल्प निर्विकल्पके भेदकर दो प्रकारका है जो विकल्पसहित है वह तो आस्रवसहित है और जो निर्विकल्प है वह आस्रव रहित है ॥ १४० ॥

इस तरह पहले महास्थलमें अनेक अंतर स्थलोंमेंसे उन्नीसदोहाओंके स्थलमें तीन दोहाओंसे निश्चयव्यवहारमोक्षमार्गका कथन किया ।

आगे चौदह दोहापर्यंत व्यवहारमोक्षमार्गका पहला अंग व्यवहारसम्यक्त्वको मुख्यतासे कहते हैं;—[**य एव**] जो [**द्रव्याणि**] द्रव्योंको [**यथास्थितानि**] जैसा उनका स्वरूप है वैसा [**जानाति**] जानें [**तथा**] और उसी तरह [**जगति**] इस जगतमें [**मन्यते**] निर्दोष श्रद्धान करै [**स एव**] वही [**आत्मनः**] आत्माका [**निश्चलः संबंधिभावः**] चलमलिनावगाढ दोषरहित निश्चल भाव है [**स एव**] वही आत्मभाव [**दर्शनं**] सम्यक् दर्शन है । **भावार्थ**—यह जगत् छहद्रव्यमयी है सो इन द्रव्योंको अच्छीतरह जानकर श्रद्धान करै जिसमें संदेह नहीं वह सम्यक् दर्शन है यह सम्य-

अविचलोपि चलमलिनावगाढदोषरहितः **दंसणु** दर्शनं सम्यक्त्वं भवतीति । क एव । **सो जि** स एव पूर्वोक्तो जीवभाव इति । अयमत्र भावार्थः । इदमेव सम्यक्त्वं चिंतामणिरिदमेव कल्पवृक्ष इदमेव कामधेनुरिति मत्वा भोगाकांक्षास्वरूपादिसमस्तविकल्पजालं वर्जनीयमिति । तथा चोक्तं । "हस्ते चिंतामणिर्यस्य गृहे यस्य सुरद्रुमः । कामधेनुर्धनं यस्य तस्य का प्रार्थना परा" ॥ १४१ ॥

अथ यैः षट्द्रव्यैः सम्यक्त्वविषयभूतैस्त्रिभुवनं भृतं तिष्ठति तानीदृक् जानीहीत्यभिप्रायं मनसि संप्रधार्य सूत्रमिदं कथयति;—

दव्वइ जाणहि ताइं छह, तिहुयणु भरियउ जेहिं ।
आइविणासविवज्जियहिं, णाणिहि पभणियएहिं ॥ १४२ ॥

ग्दर्शन आत्माका निज स्वभाव है । वीतरागनिर्विकल्प स्वसंवेदन निश्चयसम्यग्ज्ञान उसका परंपराय कारण जो परमागमका ज्ञान उससे अच्छीतरह जानें और मनमें मानें यह निश्चय करै कि इन सब द्रव्योंमें निज आत्मद्रव्य ही ध्यावने योग्य है ऐसी रुचिरूप जो निश्चयसम्यक्त्व है उसका परंपराय कारण व्यवहारसम्यक्त्व देव गुरु धर्मकी श्रद्धा उसे स्वीकार करै । व्यवहारसम्यक्त्वके पचीसदोष हैं उनको छोड़ै । उन पचीसोंको "मूढत्रयं" इत्यादि श्लोकमें कहा है । इसका अर्थ ऐसा है कि जहां देव कुदेवका विचार नहीं है वह तो देवमूढ, जहां सुगुरु कुगुरुका विचार नहीं है वह गुरुमूढ, जहां धर्म कुधर्मका विचार नहीं है वह धर्ममूढ ये तीन मूढता; और जातिमद कुलमद धनमद रूपमद तपमद बलमद विद्यामद राजमद ये आठमद; कुगुरु कुदेव कुधर्म इनकी और इनके आराधकोंकी जो प्रशंसा वह छह अनायतन और निःशंकितादि आठ अंगोंसे विपरीत शंका कांक्षा विचिकित्सा मूढता परदोषकथन अथिरकरण साधर्मियोंसे स्नेह नहीं रखना और जिनधर्मकी प्रभावना नहीं करना ये शंकादि आठ मल इस प्रकार सम्यग्दर्शनके पचीस दोष हैं । इन दोषोंको छोड़कर तत्त्वों की श्रद्धा करै वह व्यवहार सम्यग्दर्शन कहाजाता है । जहां अस्थिर बुद्धि नहीं है और परिणामोंकी मलिनता नहीं और शिथिलता नहीं वह सम्यक्त्व है । यह सम्यग्दर्शन ही कल्पवृक्ष कामधेनु चिंतामणि है ऐसा जानकर भोगोंकी वांछारूप जो सब विकल्प उनको छोड़कर सम्यक्त्वका ग्रहण करना चाहिये । ऐसा कहा है "हस्ते" इत्यादि । जिसके हाथमें चिंतामणि है धनमें कामधेनु जिसके घरमें कल्पवृक्ष है उसके अन्य क्या प्रार्थनाकी आवश्यकता है कल्पवृक्ष कामधेनु चिंतामणि तो कहने मात्र हैं सम्यक्त्व ही कल्पवृक्ष कामधेनु चिंतामणि है यह जानना ॥ १४१ ॥

द्रव्याणि जानीहि तानि षट् त्रिभुवनं भृतं यैः ।
आदिविनाशविवर्जितैः ज्ञानिभिः प्रभणितैः ॥ १४२ ॥

दव्वइं इत्यादि । **दव्वइं** द्रव्याणि **जाणहि** जानीहि त्वं हे प्रभाकरभट्ट **ताइ** तानि परमागमप्रसिद्धानि । कतिसंख्योपेतानि । **छहं** षडेव । यैः द्रव्यैःकिं कृतं । **तिहुयणु भरियउ** त्रिभुवनं भृतं **जेहिं** यैः कर्तृभूतैः । पुनरपि किंविशिष्टैः । **आइविणासविवज्जियहिं** द्रव्यार्थिकनयेनादिविनाशविवर्जितैः । पुनरपि कथंभूतैः । **णाणिहि पभणियएहिं** ज्ञानिभिः प्रभणितैः कथितैश्चेति । अयमत्राभिप्रायः । एतैः षड्भिर्द्रव्यैर्निष्पन्नोऽयं लोको नचान्यः कोपि लोकस्य हर्ता कर्ता रक्षको वास्तीति । किं च । यद्यपि षड्द्रव्याणि व्यवहारसम्यक्त्वविषयभूतानि भवंति तथापि शुद्धनिश्चयेन शुद्धात्मानुभूतिरूपस्य वीतरागसम्यक्त्वस्य नित्यानंदैकस्वभावो निजशुद्धात्मैव विषयो भवतीति ॥ १४२ ॥

अथ तेषामेव षड्द्रव्याणां संज्ञां चेतनाचेतनविभागं च कथयति;—

जीउ सचेयणु दव्वु मुणि, पंच अचेयण अण्ण ।
पुग्गलु धम्माहम्मु णहु, कालें सहिया भिण्ण ॥ १४३ ॥

जीवः सचेतनं द्रव्यं मन्यस्व पंच अचेतनानि अन्यानि ।
पुद्गलः धर्माधर्मौ नभः कालेन सहितानि भिन्नानि ॥ १४३ ॥

जीउ इत्यादि । **जीउ सचेयणु दव्वु** चिदानंदैकस्वभावो जीवश्चेतनाद्रव्यं भवति **मुणि** मन्यस्व जानीहि त्वं **पंच अचेयण** पंचाचेतनानि **अण्ण** जीवादन्यानि । तानि कानि । **पोग्गलु धम्माहम्मु णहु** पुद्गलधर्माधर्मनभांसि । कथंभूतानि तानि । **कालें सहिया**

आगे सम्यक्त्वके कारण जो छह द्रव्य हैं उनसे यह तीनलोक भरा हुआ है उनको यथार्थ जानो ऐसा अभिप्राय मनमें रखकर यह गाथासूत्र कहते हैं;—हे प्रभाकर भट्ट तू [**तानि षट्द्रव्याणि**] उन छहों द्रव्यों को [**जानीहि**] जान कि [**यैः**] जिन द्रव्योंसे [**त्रिभुवनं भृतं**] यह तीनलोक भररहा है वे छह द्रव्य [**ज्ञानिभिः**] ज्ञानियोंने [**आदिविनाशविवर्जितैः**] आदि अंतकर रहित द्रव्यार्थिकनयसे [**प्रभणितैः**] कहे हैं । **भावार्थ**—यह लोक छह द्रव्योंसे भरा है अनादि निधन है इस लोकका आदि अंत नहीं है तथा इसका कर्ता हर्ता व रक्षक कोई नहीं है । यद्यपि ये छह द्रव्य व्यवहार सम्यक्त्वके कारण हैं तो भी शुद्ध निश्चयनयकर शुद्धात्मानुभूतिरूप वीतरागसम्यक्त्वका कारण नित्य आनंद स्वभाव निजशुद्धात्मा ही है ॥ १४२ ॥

आगे उन छह द्रव्योंके नाम कहते हैं;—हे शिष्य तू [**जीवः सचेतनद्रव्यं**] जीव चेतनद्रव्य है ऐसा [**मन्यस्व**] जान [**अन्यानि**] और वाकी [**पुद्गलः धर्माधर्मौ**] पुद्गल धर्म अधर्म [**नभः**] आकाश [**कालेन सहिता**] और काल सहित जो [**पंच**]

कालद्रव्येण सहितानि । पुनरपि कथंभूतानि । **भिण्ण** स्वकीयस्वकीयलक्षणेन परस्परभिन्नानि इति । तथाहि । द्विधा सम्यक्त्वं भण्यते सरागवीतरागभेदेन । सरागसम्यक्त्वलक्षणं कथ्यते । प्रशमसंवेगानुकंपास्तिक्याभिव्यक्तिलक्षणं सरागसम्यक्त्वं भण्यते तदेव व्यवहारसम्यक्त्वमिति तस्य विषयभूतानि षड्द्रव्याणीति । वीतरागसम्यक्त्वं निजशुद्धात्मानुभूतिलक्षणं वीतरागचारित्राविनाभूतं तदेव निश्चयसम्यक्त्वमिति । अत्राह प्रभाकरभट्टः । निजशुद्धात्मैवोपादेय इति रुचिरूपं निश्चयसम्यक्त्वं भवतीति बहुधा व्याख्यातं पूर्वं भवद्भिः इदानीं पुनः वीतरागचारित्राविनाभूतं निश्चयसम्यक्त्वं व्याख्यातमिति पूर्वापरविरोधः । कस्मादितिचेत् । निजशुद्धात्मैवोपादेय इति रुचिरूपं निश्चयसम्यक्त्वं गृहस्थावस्थायां तीर्थंकरपरमदेवभरतसगररामपांडवादीनां विद्यते न च तेषां वीतरागचारित्रमस्तीति परस्परविरोधः अस्ति चेत्तर्हि तेषामसंयतत्वं कथमिति पूर्वपक्षः । तत्र परिहारमाह । तेषां शुद्धात्मोपादेयभावनारूपं निश्चयसम्यक्त्वं विद्यते परं किंतु चारित्रमोहोदयेन स्थिरता नास्ति व्रतप्रतिज्ञाभंगो भवतीति तेन कारणेनासंयता वा भण्यंते । शुद्धात्मभावनाच्युताः संतः भरतादयो निर्दोषि-

---

पांच हैं वे [**अचेतनानि**] अचेतन हैं और [**अन्यानि**] जीवसे भिन्न हैं तथा ये सब [**भिन्नानि**] अपने २ लक्षणोंसे आपसमें भिन्न (जुदे२) हैं, काल सहित छह द्रव्य हैं कालके विना पांच अस्तिकाय हैं । **भावार्थ**—सम्यक्त्व दो प्रकारका है एक सरागसम्यक्त्व दूसरा वीतरागसम्यक्त्व, सरागसम्यक्त्वका लक्षण कहते हैं । **प्रशम** अर्थात् सांतिपना, **संवेग** अर्थात् जिनधर्मकी रुचि तथा जगतसे अरुचि, **अनुकंपा** परजीवोंको दुखी देखकर दया भाव और **आस्तिक्य** अर्थात् देव गुरु धर्मकी तथा छह द्रव्योंकी श्रद्धा ये चारोंका होना वह व्यवहारसम्यक्त्वरूप सरागसम्यक्त्व है । और वीतरागसम्यक्त्व जो निश्चयसम्यक्त्व वह निजशुद्धात्मानुभूतिरूप वीतरागचारित्रसे तन्मयी है । यह कथन सुनकर प्रभाकर भट्टने प्रश्न किया । हे प्रभो निजशुद्धात्मा ही उपादेय है ऐसी रुचिरूप निश्चय सम्यक्त्व का कथन पहले तुमने अनेकवार किया फिर अब वीतरागचारित्रसे तन्मयी निश्चयसम्यक्त्व है यह व्याख्यान करते है यह तो पूर्वापर विरोध है । क्योंकि जो निजशुद्धात्मा ही उपादेय है ऐसी रुचिरूप निश्चयसम्यक्त्व तो गृहस्थ अवस्थामें तीर्थंकर परमदेव भरतचक्रवर्ती सगरचक्रवर्ती और रामपांडवादिक बड़े २ पुरुषोंके रहता है लेकिन उनके वीतरागचारित्र नहीं है । यही परस्पर विरोध है । यदि उनके वीतरागचारित्र माना जावे तो गृहस्थपना क्यों कहा । यह प्रश्न किया । उसका उत्तर श्रीगुरु कहते हैं । उन महान (बड़े) पुरुषोंके शुद्धात्मा उपादेय है ऐसी भावना रूप निश्चय सम्यक्त्व तो है परंतु चारित्रमोहके उदयसे थिरता नहीं है । जबतक महाव्रतका उदय नहीं है तबतक असंयमी कहलाते हैं शुद्धात्माकी अखंड भावनासे रहित हुए भरत

परमात्मनामर्हत्सिद्धानां गुणस्तववस्तुस्तवरूपस्तवनादिकं कुर्वंति । तच्चरितपुराणादिकं च समाकर्णयंति तदाराधकपुरुषाणामाचार्योपाध्यायसाधूनां विषयकषायदुर्ध्यानवंचनार्थं संसारस्थितिछेदनार्थं च दानपूजादिकं कुर्वंति तेन कारणेन शुभरागयोगात् सरागसम्यग्दृष्टयो भवंति । या पुनस्तेषां सम्यक्त्वस्य निश्चयसम्यक्त्वसंज्ञा वीतरागचारित्राविनाभूतस्य निश्चयसम्यक्त्वस्य परंपरया साधकत्वादिति । वस्तुवृत्त्या तु तत्सम्यक्त्वं सरागसम्यक्त्वाख्यं व्यवहारसम्यक्त्वमेवेति भावार्थः ॥ १४३ ॥

अथानंतरं सूत्रचतुष्टयेन जीवादिषड्द्रव्याणां क्रमेण प्रत्येकं लक्षणं कथ्यते;—

मुत्तिविहूणउ णाणमउ, परमाणंदसहाउ ।
णियमिं जोइय अप्पु मुणि, णिच्चु णिरंजणु भाउ ॥ १४४ ॥

मूर्तिविहीनः ज्ञानमयः परमानंदस्वभावः ।
नियमेन योगिन् आत्मानं मन्यस्व नित्यं निरंजनं भावम् ॥ १४४ ॥

मुत्तिविहूणउ इत्यादि । **मुत्तिविहूणउ** अमूर्तशुद्धात्मनो विलक्षणया स्पर्शरसगंधवर्णवत्या मूर्त्या विहीनत्वात् मूर्तिविहीनः **णाणमउ** क्रमकरणव्यवधानरहितेन लोकालोकप्रकाशकेन केवलज्ञानेन निर्वृत्तत्वात् ज्ञानमयः **परमाणंदसहाउ** वीतरागपरमानंदैकरूपसुखामृतरसास्वादेन समरसीभावपरिणतस्वरूपत्वात् परमानंदस्वभावः **णियमिं** शुद्धनिश्चयेन **जोइय** हे योगिन् **अप्पु** तमित्थंभूतमात्मानं **मुणि** मन्यस्व जानीहि त्वं । पुनरपि किंविशिष्टं जानीहि । **णिच्चु** शुद्धद्रव्यार्थिकनयेन टंकोत्कीर्णज्ञायकैकस्वभावत्वान्नित्यं । पुनरपि किं

सगर राघव पांडवादिक; निर्दोष परमात्मा अरहंत सिद्धोंके गुणस्तवन वस्तुस्तवन रूप स्तोत्रादि करते हैं और उनके चारित्रपुराणादिक सुनते हैं तथा उनकी आज्ञाके आराधक जो महान पुरुष आचार्य उपाध्याय साधु उनको भक्तिसे आहारदानादि करते हैं पूजा करते हैं । विषय कषाय रूप खोटे ध्यानके रोकनेके लिये तथा संसारकी स्थितिके नाश करनेके लिये ऐसीं शुभक्रिया करते हैं । इसलिये शुभरागके संबंधसे सम्यग्दृष्टि हैं और इनके निश्चय सम्यक्त्व भी कहा जासकता है क्योंकि वीतरागचारित्रसे तन्मई निश्चय सम्यक्त्वके परंपराय साधकपना है । अब वास्तवमें (असलमें) विचारा जावे तो गृहस्थ अवस्थामें इनके सरागसम्यक्त्व ही है और जो सरागसम्यक्त्व है वह व्यवहार ही है ऐसा जानो ॥ १४३ ॥

आगे चार दोहाओंसे छह द्रव्योंके क्रमसे हर एकके लक्षण कहते हैं;—**[योगिन्]** हे योगी **[नियमेन]** निश्चय करके **[आत्मानं]** तू आत्माको ऐसा **[मन्यस्व]** जान । कैसा है आत्मा **[मूर्तिविहीनः]** मूर्तिसे रहित है **[ज्ञानमयः]** ज्ञानमई है **[परमानंदस्वभावः]** परमानंदस्वभाववाला है **[नित्यं]** नित्य है **[निरंजनं]** निरंजन है

विशिष्टं । **णिरंजणु** मिथ्यात्वरागादिरूपांजनरहितत्वान्निरंजनं । पुनश्च कथंभूतमात्मानं जानीहि । **भाउ** भावं विशिष्टपदार्थं इति । अत्रैवं गुणविशिष्टः शुद्धात्मैवोपादेय अन्यद्धेयमिति तात्पर्यार्थः ॥ १४४ ॥

अथ;—

पुग्गलु छव्विहु मुत्तु वढ, इयर अमुत्तु वियाणि ।
धम्माधम्मुवि गइठियहिं, कारणु पभणहिं णाणि ॥ १४५ ॥

पुद्गलः षड्विधः मूर्तः वत्स इतराणि अमूर्तानि विजानीहि ।
धर्माधर्ममपि गतिस्थित्योः कारणं प्रभणंति ज्ञानिनः ॥ १४५ ॥

पुग्गलु इत्यादि । **पुग्गलु** पुद्गलद्रव्यं **छव्विहु** षड्विधं । तथा चोक्तं । "पुढवी जलं च छाया चउरिंदियविसय कम्मपाउग्गा । कम्मातीदा एवं छब्भेया पुग्गला होंति" । एवं तत्कथं भवति । **मुत्तु** स्पर्शरसगंधवर्णवती मूर्तिरिति वचनान्मूर्तं **वढ** वत्स पुत्र **इयर** इतराणि पुद्गलात् शेषद्रव्याणि **अमुत्त** स्पर्शाद्यभावादमूर्तानि **वियाणि** विजानीहि त्वं **धम्माधम्मुवि** धर्माधर्मद्वयमपि **गइठियहिं** गतिस्थित्योः **कारणु** कारणं निमित्तं **पभणहिं** प्रभणंति कथयंति । के कथयंति । **णाणि** वीतरागस्वसंवेदनज्ञानिनः इति । अत्र द्रष्टव्यं । यद्यपि वज्रवृषभनाराचसंहननरूपेण पुद्गलद्रव्यं मुक्तिगमनकाले सहका-

---

[**भावं**] ऐसा जीवपदार्थ है । **भावार्थ**—यह आत्मा, अमूर्तीक शुद्धात्मासे भिन्न जो स्पर्श रसगंधवर्णवाली मूर्ति उससे रहित है, लोक अलोकका प्रकाश करनेवाले केवलज्ञानकर पूर्ण है जो कि केवलज्ञान सब पदार्थोंको एक समयमें प्रत्यक्ष जानता है आगे पीछे नहीं जानता, वीतरागभाव परमानंदरूप अतींद्रियसुखस्वरूप अमृतके रसके स्वादसे समरसी भावको परिणत हुआ है ऐसा हे योगी शुद्धनिश्चयसे अपने आत्माको ऐसा समझ शुद्धद्रव्यार्थिकनयसे विना टांकीका घड़्या हुआ सुघटघाट ज्ञायक स्वभाव नित्य है । तथा मिथ्यात्वरागादिरूप अंजनसे रहित निरंजन है । ऐसे आत्माको तू भली भांति जान सब पदार्थोंमें उत्कृष्ट है । इन गुणोंसे मंडित शुद्ध आत्मा ही उपादेय है और सब तजने योग्य हैं ॥ १४४ ॥

आगे फिर भी कहते हैं;—[**हे वत्स**] हे वत्स तू [**पुद्गलः**] पुद्गलद्रव्य [**षड्विधः**] छै प्रकार तथा [**मूर्तः**] मूर्तीक है [**इतराणि**] अन्य सब द्रव्य [**अमूर्तानि**] अमूर्त हैं ऐसा [**विजानीहि**] जान [**धर्माधर्ममपि**] धर्म और अधर्म इन दोनों द्रव्योंको [**गतिस्थित्योः कारणं**] गति स्थितिका सहायककारण [**ज्ञानिनः**] केवली श्रुतकेवली [**प्रभणंति**] कहते हैं । **भावार्थ**— पुद्गल द्रव्यके छह भेद दूसरी जगह भी "पुढवी जलं" इत्यादि गाथासे कहे हैं । उसका अर्थ यह है कि बादर बादर १ बादर २ बाद-

रिकारणं भवति तथापि धर्मद्रव्यं च गतिसहकारिकारणं भवति, अधर्मद्रव्यं च लोकाग्रे स्थितस्य स्थितिसहकारिकारणं भवति । यद्यपि मुक्तात्मप्रदेशमध्ये परस्परैकक्षेत्रावगाहेन तिष्ठंति तथापि निश्चयेन विशुद्धज्ञानदर्शनस्वभावपरमात्मनः सकाशाद्भिन्नस्वरूपेण मुक्तौ तिष्ठंति । तथात्र संसारे चेतनाकारणानि हेयानीति भावार्थः ॥ १४५ ॥

अथ;—

दव्वइं सयलइं वरि ठियइं, णियमिं जासु वसंति ।
तं णहु दव्वु वियाणि तुहुं, जिणवर एउ भणंति ॥ १४६ ॥

द्रव्याणि सकलानि उदरे स्थितानि नियमेन यस्य वसंति ।
तत् नभः द्रव्यं विजानीहि त्वं जिनवरा एतद् भणंति ॥ १४६ ॥

दव्वइ द्रव्याणि । कतिसंख्योपेतानि । **सयलई** समस्तानि **उवरि** उदरे **ठियइं** स्थितानि **णियमें** निश्चयेन **जासु** यस्य **वसंति** आधाराधेयभावेन तिष्ठंति **तं** तत् **णहु दव्वु** नभ

रसूक्ष्म ३ सूक्ष्मबादर ४ सूक्ष्म ५ सूक्ष्मसूक्ष्म ६ ये छह भेद पुद्गलके हैं । उनमेंसे पत्थर काठ तृण आदि पृथ्वी वादर वादर हैं टुकड़े होकर नहीं जुड़ते, जल घी तैल आदि वादर हैं जो टूटकर मिल जाते हैं, छाया आतप चांदनी ए बादर सूक्ष्म हैं जो कि देखनेमें तो बादर और ग्रहण करनेमें सूक्ष्म हैं, नेत्रको छोड़कर चार इंद्रियोंके विषय रसगंधादि सूक्ष्म वादर हैं जो कि देखनेमें नहीं आते और ग्रहण करनेमें आते हैं, कर्मवर्गणा सूक्ष्म हैं जो अनंत मिली हुई हैं परंतु दृष्टिमें नहीं आतीं और सूक्ष्मसूक्ष्म परमाणु है जिसका दूसरा भाग नहीं होता । इस तरह छह भेद हैं । इन छहोंतरहके पुद्गलोंको तू अपने स्वरूपसे जुदे समझ । यह पुद्गलद्रव्य स्पर्शरस गंध वर्णको धारण करता है इसलिये मूर्तीक है अन्य धर्म अधर्म दोनों गति तथा स्थितिके कारण हैं ऐसा वीतरागदेवने कहा है । यहांपर एक बात देखनेकी है कि यद्यपि वज्रवृषभनाराचसंहननरूप पुद्गलद्रव्य मोक्षके गमनका सहायक है इसके विना मुक्ति नहीं होसकती तौभी धर्मद्रव्य गति सहाई है इसके विना सिद्धलोकको जाना नहीं होसकता तथा अधर्मद्रव्य सिद्धलोकमें स्थितिका सहाई है । लोकशिखरपर आकाशके प्रदेश अवकाशमें सहाई हैं । अनंते सिद्ध अपने स्वभावमें ही ठहरे हुए हैं परद्रव्यका कुछप्रयोजन नहीं है । यद्यपि मुक्तात्माओंके प्रदेश आपसमें एक-जगह हैं तौभी विशुद्धज्ञान दर्शन भाव भगवान सिद्धक्षेत्रमें भिन्न भिन्न स्थित हैं कोई सिद्ध किसी सिद्धसे प्रदेशोंकर मिला हुआ नहीं है । पुद्गलादि पांचो द्रव्य जीवको यद्यपि निमित्त कारण कहे गये हैं तौभी उपादान कारण नहीं है ऐसा सारांश हुआ ॥ १४५ ॥

आगे आकाशका स्वरूप कहते हैं;—[**यस्य**] जिसके [**उदरे**] अंदर [**सकलानि द्रव्याणि**] सब द्रव्यें [**स्थितानि**] स्थित हुईं [**नियमेन वसंति**] निश्चयसे आधार

आकाशद्रव्यं **वियाणि** विजानीहि **तुहुं** त्वं हे प्रभाकरभट्ट **जिणवर** जिनवराः वीतरागसर्वज्ञाः **एउ भणंति** एतद्भणंति कथयंतीति । अयमत्र तात्पर्यार्थः । यद्यपि परस्परैकक्षेत्रावगाहेन तिष्ठत्याकाशं तथापि साक्षादुपादेयभूतादनंतसुखस्वरूपात्परमात्मनः सकाशादत्यंतभिन्नत्वाद्धेयमिति ॥ १४६ ॥

अथ;—

कालु मुणिज्जहि दव्वु तुहुं, वट्टणलक्खणु एउ ।
रयणहं रासि विभिण्ण जिम, तसु अणुअहं तह भेउ ॥१४७॥

कालं मन्यस्व द्रव्यं त्वं वर्तनालक्षणं एतत् ।
रत्नानां राशिः विभिन्नः यथा तस्य अणूनां तथा भेदः ॥ १४७ ॥

कालु इत्यादि । **कालु** कालं **मुणिज्जहि** मन्यस्व जानीहि । किं जानीहि । **दव्वु** कालसंज्ञं द्रव्यं । कथंभूतं । **वट्टणलक्खणु** वर्तनालक्षणं स्वयमेव परिणममानानां द्रव्याणां बहिरंगसहकारिकारणं । किंवदिति चेत् । कुंभकारचक्रस्याधस्तनशिलावदिति **एउ** एतत् प्रत्यक्षीभूतं तस्य कालद्रव्यस्यासंख्येयप्रमितस्य परस्परभेदविषये दृष्टांतमाह । **रयणहं रासि** रत्नानां राशिः । कथंभूतः । विभिन्नः विशेषेण स्वरूपव्यवधानेन भिन्नः **तसु** तस्य कालद्रव्यस्य **अणुअहं** अणूनां कालाणूनां **तह** तथा **भेउ** भेदः इति । अत्राह शिष्यः । समय एव निश्चयकाल: अन्यन्निश्चयकालसंज्ञं कालद्रव्यं नास्ति । अत्र परिहारमाह । समयस्तावत्प-

---

आधेयरूप होकर रहती हैं [**तत्**] उसको [**त्वं**] तू [**नभो द्रव्यं**] आकाशद्रव्य [**विजानीहि**] जान [**एतत्**] ऐसा [**जिनवराः**] जिनेंद्रदेव [**भणंति**] कहते हैं । लोकाकाश आधार है अन्य सब द्रव्य आधेय हैं । **भावार्थ**—यद्यपि ये सब द्रव्य आकाशमें परस्पर एक क्षेत्रावगाहसे ठहरी हुई हैं तौभी आत्मासे अत्यंत भिन्न हैं इसलिये त्यागने योग्य हैं और आत्मा साक्षात् आराधने योग्य है अनंतसुखस्वरूप है ॥ १४६ ॥

आगे कालद्रव्यका व्याख्यान करते हैं;—[**त्वं**] हे भव्य तू [**एतत्**] इस प्रत्यक्षरूप [**वर्तनालक्षणं**] वर्तनालक्षणवालेको [**कालं**] कालद्रव्य [**मन्यस्व**] जान अर्थात् अपने आप परिणमते हुए द्रव्योंको कुम्हारके चक्रकी नीचेकी सिलाकी तरह बहिरंग सहकारी कारण है यह कालद्रव्य असंख्यात प्रदेश प्रमाण है [**यथा**] जैसे [**रत्नानां राशिः**] रत्नोंकी राशि [**विभिन्नः**] जुदे रूप है सब रत्न जुदे २ रहते हैं मिलते नहीं हैं [**तथा**] उसीतरह [**तस्य**] उसकालके [**अणूनां**] कालकी अणुओंका [**भेदः**] भेद है एक कालाणूसे दूसरी कालाणू नहीं मिलता । यहांपर शिष्यने प्रश्न किया कि समय ही निश्चयकाल है अन्य निश्चयकाल नामवाला काल द्रव्य नहीं है उसका श्रीगुरु समाधान करते हैं । समय है वह कालद्रव्यकी पर्याय है क्योंकि विनाशको पाता है । ऐसा ही श्रीपंचास्ति-

-र्यायः । कस्मात् । विनश्वरत्वात् । तथा चोक्तं समयस्य विनश्वरत्वं । "समओ उप्पण्णपद्धंसी" इति । स च पर्यायो द्रव्यं विना न भवति । कस्य द्रव्यस्य भवतीति विचार्यते । यदि पुद्गलद्रव्यस्य पर्यायो भवति तर्हि पुद्गलपरमाणुपिंडनिष्पन्नघटादयो यथा मूर्ता भवंति तथा अणोरण्वंतरव्यतिक्रमणाज्जातः समयः, चक्षुःसंपुटविघटनाज्जातो निमिषः, जलभाजनहस्तादिव्यापाराज्जाता घटिका आदित्यविंबदर्शनाज्जातो दिवसः, इत्यादि कालपर्याया मूर्ता दृष्टिविषया प्राग्भवंति । कस्मात् । पुद्गलद्रव्योपादानकारणजातत्वात् घटादिवत् इति । तथा चोक्तं । उपादानकारणसदृशं कार्यं भवति मृत्पिंडाद्युपादानकारणजनितघटादिवदेव न च तथा समयनिमिषघटिकादिवसादिकालपर्याया मूर्ता दृश्यंते । यैः पुनः पुद्गलपरमाणुमंदगतिगमननयनपुटविघटनजलभाजनहस्तादिव्यापारदिनकरविंबगमनादिभिः पुद्गलपर्यायभूतैः क्रियाविशेषैः समयादिकालपर्यायाः परिच्छिद्यंते । ते चाणुव्यतिक्रमणादयः तेषामेव समयादिकालपर्यायाणां व्यक्तिनिमित्तत्वेन बहिरंगसहकारिकारणभूता एव ज्ञातव्याः । न चोपादानकारणभूता घटोत्पत्तौ कुंभकारचक्रचीवरादिवत् । तस्माद् ज्ञायते तत्कालद्रव्यममूर्तमविनश्वरमस्तीति तस्य तत्पर्यायाः समयनिमेषादय इति । अत्रेदं तु कालद्रव्यं सर्वप्रकारोपादेयभूतात् शुद्धबुद्धैकस्वभावाज्जीवद्रव्याद्भिन्नत्वाद्धेयमिति तात्पर्यार्थः ॥ १४७ ॥

कायमें कहा है "समओ उप्पण्णपद्धंसी" अर्थात् समय उत्पन्न होता है नाश होता है । इससे जानते हैं कि समय पर्याय है पर्याय द्रव्यके विना हो नहीं सकता । किस द्रव्यका पर्याय है इसपर अब विचार करना चाहिये । यदि पुद्गलद्रव्यकी पर्याय मानी जावे तो जैसे पुद्गलपरमाणुओंसे उत्पन्न हुए घटादि मूर्तीक हैं वैसे समयभी मूर्तीक होना चाहिये परंतु समय अमूर्तीक है इसलिये पुद्गलकी पर्याय तो नहीं है । पुद्गलपरमाणु आकाशके एक प्रदेशसे दूसरे प्रदेशको जव गमनकरता है तव समय होता है सो समय पर्याय कालकी है पुद्गलपरमाणुके निमित्तसे होती है, नेत्रोंका मिलना तथा विघटना उससे निमेष होता है, जलपात्र तथा हस्तादिकके व्यापारसे घटिका होती है और सूर्य विंबके उदयसे दिन होता है इत्यादि कालकी पर्याय हैं पुद्गलद्रव्यके निमित्तसे होती हैं पुद्गल इन पर्यायोंका मूलकारण नहीं है मूलकारण काल है । जो पुद्गल मूलकारण होता तो समयादिक मूर्तीक होते । जैसे मूर्तीक मट्टीके डेलेसे उत्पन्न घड़े वगैरः मूर्तीक होते हैं वैसे समयादिक मूर्तीक नहीं हैं । इसलिये अमूर्तद्रव्य जो काल उसकी पर्याय हैं द्रव्य नहीं हैं कालद्रव्य अणुरूप अमूर्तीक अविनश्वर है और समयादिक पर्याय अमूर्तीक हैं परंतु विनश्वर हैं अविनश्वरपना द्रव्यमें ही है पर्यायमें नहीं है यह निश्चयसे जानना । इसलिये समयादिकको कालद्रव्यकी पर्याय ही कहना चाहिये पुद्गलकी पर्याय नहीं हैं पुद्गलपर्याय मूर्तीक है । सर्वथा उपादेय शुद्धबुद्धकेवलस्वभाव जो जीव उससे भिन्न कालद्रव्य है इसलिये हेय है ऐसा सारांश हुआ ॥ १४७ ॥

अथ जीवपुद्गलकालद्रव्याणि मुक्त्वा शेषधर्माधर्माकाशान्येकद्रव्याणीति निरूपयति;—

जीउवि पुग्गलु कालु जिय, ए मेल्लेविणु दव्व ।
इयर अखंड वियाणि तुहु, अप्पपएसहिं सव्व ॥ १४८ ॥

जीवोपि पुद्गलः कालः जीव एतानि मुक्त्वा द्रव्याणि ।
इतराणि अखंडानि विजानीहि त्वं आत्मप्रदेशैः सर्वाणि ॥ १४८ ॥

जीउवि इत्यादि । **जीउवि** जीवोपि **पुग्गलु** पुद्गलः **कालु** कालः **जिय** हे जीव **ए मेल्लेविणु** एतानि मुक्त्वा **दव्व** द्रव्याणि **इयर** इतराणि धर्माधर्माकाशानि **अखंड** अखंडद्रव्याणि **वियाणि** विजानीहि **तुहुं** त्वं हे प्रभाकरभट्ट । कैः कृत्वाखंडानि विजानीहि। **अप्पपएसहिं** आत्मप्रदेशैः । कतिसंख्योपेतानि । **सव्व** सर्वाणि इति । तथाहि । जीवद्रव्याणि पृथक् पृथक् जीवद्रव्यगणनेनानंतसंख्यानि पुद्गलद्रव्याणि तेभ्योप्यनंतगुणानि भवंति । धर्माधर्माकाशानि पुनरेकद्रव्याण्येवेति । अत्र जीवद्रव्यमेवोपादेयं तत्रापि यद्यपि शुद्धनिश्चयेन शक्त्यपेक्षया सर्वे जीवा उपादेयास्तथापि व्यक्त्यपेक्षया पंचपरमेष्ठिन एव तेष्वपि मध्ये विशेषेणार्हत्सिद्धा एव तयोरपि मध्ये सिद्धा एव परमार्थेन तु मिथ्यात्वरागादिविभावपरिणामनिवृत्तिकाले स्वशुद्धात्मैवोपादेय इत्युपादेयपरंपरया ज्ञातव्येति भावार्थः ॥ १४८ ॥

आगे जीव पुद्गल काल ये तीन द्रव्य अनेक हैं और धर्म अधर्म आकाश ये तीन द्रव्य एक हैं ऐसा कहते हैं;—[**हे जीव**] हे जीव [**त्वं**] तू [**जीवः अपि**] जीव और [**पुद्गलः**] पुद्गल [**कालः**] काल [**एतानि द्रव्याणि**] इन तीन द्रव्योंको [**मुक्त्वा**] छोड़कर [**इतराणि**] दूसरी धर्म अधर्म आकाश [**सर्वाणि**] ये सब तीन द्रव्य [**आत्मप्रदेशैः**] अपने प्रदेशोंसे [**अखंडानि**] अखंडित हैं । **भावार्थ**—जीवद्रव्य जुदे २ जीवोंकी गणनासे अनंत हैं पुद्गलद्रव्य उससे भी अनंतगुणे हैं कालद्रव्याणू असंख्यात हैं धर्मद्रव्य एक है वह लोकव्यापी है अधर्मद्रव्य भी एक है लोकव्यापी है ये दोनों द्रव्य असंख्यात प्रदेशी हैं और आकाशद्रव्य अलोक अपेक्षा अनंत प्रदेशी है तथा लोक अपेक्षा असंख्यात प्रदेशी हैं । ये सब द्रव्य अपने २ प्रदेशोंकर सहित हैं किसीके प्रदेश किसीसे नहीं मिलते । इन छहों द्रव्योंमें जीव ही उपादेय है । यद्यपि शुद्धनिश्चयसे शक्तिकी अपेक्षा सभी जीव उपादेय हैं तौभी व्यक्तिकी अपेक्षा पंच परमेष्टी ही उपादेय हैं उनमें भी अरहंतसिद्ध ही हैं उन दोनोंमें भी सिद्ध ही हैं और निश्चयनयकर मिथ्यात्वरागादिविभावपरिणामके अभावमें विशुद्धात्मा ही उपादेय है ऐसा जानना ॥ १४८ ॥

अथ जीवपुद्गलौ सक्रियौ धर्माधर्माकाशकालद्रव्याणि निःक्रियाणीति प्रतिपादयति;—

दव्व चयारिवि इयर जिय, गमणागमणविहीण ।
जीउवि पुग्गलु परिहरिवि, पभणहिं णाणिपवीण ॥ १४९ ॥

द्रव्याणि चत्वारि एव इतराणि जीव गमनागमनविहीनानि ।
जीवोपि पुद्गलः परिहृत्य प्रभणंति ज्ञानिप्रवीणाः ॥ १४९ ॥

दव्व इत्यादि । **दव्व** द्रव्याणि । कतिसंख्योपेतानि एव । **चयारिवि** चत्वार्येव **इयर** जीवपुद्गलाभ्यामितराणि **जिय** हे जीव । कथंभूतान्येतानि । **गमणागमणविहीण** गमनागमनविहीनानि निःक्रियाणि चलनक्रियाविहीनानि । किंकृत्वा । **जीउवि पुग्गलु परिहरिवि** जीवपुद्गलौ परिहृत्य पभणहिं एवं प्रभणंति कथयंति । के ते । **णाणिपवीण** भेदाभेदरत्नत्रयाराधकाविवेकिन इत्यर्थः । तथाहि । जीवानां संसारावस्थायां गतेः सहकारिकारणभूताः कर्मनोकर्मपुद्गलाः कर्मनोकर्माभावात्सिद्धानां निःक्रियत्वं भवति पुद्गलस्कंदानां तु कालाणुरूपं कालद्रव्यं गतेर्बहिरंगनिमित्तं भवति । अनेन किमुक्तं भवति । अविभागिव्यवहारकालसमयोत्पत्तौ मंदगतिपरिणतपुद्गलपरमाणुः घटोत्पत्तौ कुंभकारवद्बहिरंगनिमित्तेन व्यंजको व्यक्तिकारको भवति । कालद्रव्यं तु मृत्पिंडवदुपादानकारणं भवति । तस्य तु पुद्गल-

---

आगे जीव पुद्गल ये दोनों चलनहलनादि क्रिया युक्त हैं और धर्म अधर्म आकाश काल ये चारों निःक्रिय हैं ऐसा निरूपण करते हैं;—[हे जीव] हे हंस [**जीवः अपि पुद्गलः**] जीव और पुद्गल इन दोनोंको [**परिहृत्य**] छोड़कर [**इतराणि**] दूसरीं [**चत्वारि एव द्रव्याणि**] धर्मादि चारों ही द्रव्य [**गमनागमनविहीनानि**] चलन हलनादि क्रिया रहित हैं जीव पुद्गल क्रियावंत हैं गमनागमन करते हैं ऐसा [**ज्ञानिप्रवीणाः**] ज्ञानियोंमें चतुर रत्नत्रयके धारक केवली श्रुतकेवली [**प्रभणंति**] कहते हैं । **भावार्थ**—जीवोंके संसार अवस्थामें इस गतिसे अन्य गतिके जानेको कर्म नोकर्म जातिके पुद्गल सहाई हैं । और कर्म नोकर्मके अभावसे सिद्धोंके निःक्रियपना है गमनागमन नहीं है । पुद्गलके स्कंदोंको गमनका बहिरंगनिमित्तकारण कालाणुरूप कालद्रव्य है । इससे क्या अर्थ निकला । यह निकला कि निश्चय कालकी पर्याय जो समयरूप व्यवहारकाल उसकी उत्पत्तिमें मंदगतिरूप परिणत हुआ अविभागी पुद्गलपरमाणू कारण होता है । समयरूप व्यवहार कालका उपादानकारण निश्चय काल द्रव्य है उसीकी एक समयादि व्यवहारकालका मूलकारण निश्चयकालाणुरूप काल द्रव्य है उसीकी एक समयादिक पर्याय है पुद्गल परमाणुकी मंदगति बहिरंग निमित्त कारण है उपादान कारण नहीं है पुद्गल परमाणु आकाशके प्रदेशमें मंदगतिसे गमन करता है यदि शीघ्र गतिसे चले तो एक समयमें चौदह राजू जाता है जैसे घटपर्यायकी उत्पत्तिमें मूलकारण तो मट्टीक

परमाणोर्मंदगतिगमनकाले यद्यपि धर्मद्रव्यं सहकारिकारणमस्ति तथापि कालाणुरूपं निश्चयकालद्रव्यं च सहकारिकारणं भवति । सहकारिकारणानि तु बहून्यपि भवंति मत्स्यानां धर्मद्रव्ये विद्यमानेपि जलवत् घटोत्पत्तौ कुंभकारबहिरंगनिमित्तेपि चक्रचीवरादिवत् जीवानां धर्मद्रव्ये विद्यमानेपि कर्मनोकर्मपुद्गला गतेः सहकारिकारणं पुद्गलानां तु कालद्रव्यं गतेः सहकारिकारणं । कुत्र भणितमास्ते इति चेत् । पंचास्तिकायप्राभृते श्रीकुंदकुंदाचार्यदेवैः सक्रियनिःक्रियव्याख्यानकाले भणितमस्ति । "जीवा पुग्गलकाया सह सक्किरिया हवंति ण य सेसा । पुग्गलकरणा जीवा खंदा खलु कालकरणेहिं" ॥ पुद्गलस्कंधानां धर्मद्रव्ये विद्यमानेपि जलवत् द्रव्यकालो गतेः सहकारिकारणं भवतीत्यर्थः । अत्र निश्चयनयेन

डला है और बहिरंग कारण कुम्हार है वैसे समयपर्यायकी उत्पत्तिमें मूलकारण तो कालाणूरूप निश्चय काल है और बहिरंगनिमित्त कारण पुद्गलपरमाणू है । पुद्गलपरमाणुकी मंदगतिरूप गमन समयमें यद्यपि धर्मद्रव्य सहकारी है तौभी कालाणूरूप निश्चयकाल परमाणूकी मंदगतिका सहाई जानना । परमाणूके निमित्तसे तो कालका समय पर्याय प्रगट होता है और कालके सहायसे परमाणू मंदगति करता है । कोई प्रश्न करे कि गतिका सहकारी धर्म है कालको क्यों कहा । उसका समाधान यह है कि सहकारी कारण बहुत होते हैं और उपादानकारण एक ही होता है दूसरा द्रव्य नहीं होता निज द्रव्य ही निज (अपनी) गुणपर्यायोंका मूलकारण है और निमित्तकारण बहिरंगकारण तो बहुत होते हैं इसमें कुछ दोष नहीं है । धर्म द्रव्य तो सबहीका गतिसहाई है परंतु मछलीयोंको गतिसहाई जल है तथा घटकी उत्पत्तिमें बहिरंग निमित्त कुम्हार है तौभी दंड चक्र चीवरादिक ये भी अवश्य कारण हैं इनके विना घट नहीं होता । और जीवोंके धर्मद्रव्य गतिकी सहाई विद्यमान है तौभी कर्म नोकर्म पुद्गल सहकारी कारण हैं इसीतरह पुद्गलको कालद्रव्य गतिसहकारी कारण जानना । यहां कोई प्रश्न करै कि धर्म द्रव्य तो गतिका सहाई सब जगह कहा है और कालद्रव्य वर्तनाका सहाई है गति सहाई किसजगह कहा है । उसका समाधान श्रीपंचास्तिकायमें कुंदकुंदाचार्यने क्रियावंत और अक्रियावंतके व्याख्यानमें कहा है । "जीवा पुग्गल" इत्यादि । इसका अर्थ ऐसा है कि जीव और पुद्गल ये दोनों क्रियावंत हैं और वाकीके चार द्रव्य अक्रियावाले हैं चलन हलन क्रियासे रहित हैं । जीवको दूसरी गतिमें गमनका कारण कर्म है वह पुद्गल है और पुद्गलको गमनका कारण काल है । जैसे धर्म द्रव्यके मौजूद होनेपर भी मच्छोंको गमनसहाई जल है उसीतरह पुद्गलको धर्म द्रव्यके होनेपर भी द्रव्यकाल गमनका सहकारी कारण है । यहां निश्चयनयकर गमनादि क्रियासे रहित निःक्रिय सिद्धस्वरूपके समान निःक्रिय निर्द्वंद्व निज शुद्धात्मा ही उपादेय है यह शास्त्रका तात्पर्य हुआ । इसी प्रकार

निःक्रियसिद्धस्वरूपसमानं निजशुद्धात्मद्रव्यमुपादेयमिति तात्पर्यं । तथाचोक्तं निश्चयनयेन निःक्रियजीवलक्षणं "यावत्क्रियाः प्रवर्तंते तावद्द्वैतस्य गोचरः । अद्वये निष्कले प्राप्ते निःक्रियस्य कुतःक्रिया" ॥ १४९ ॥

अथ पंचास्तिकायसूचनार्थं कालद्रव्यमप्रदेशं विहाय कस्य द्रव्यस्य कियंतः प्रदेशाः भवंतीति कथयति;—

धम्माधम्मुवि एक्कु जिउ, ए जि असंखपदेस ।
गयणु अणंतपएसु मुणि, बहुविह पुग्गलदेस ॥ १५० ॥

धर्माधर्मौ अपि एकः जीवः एतानि एव असंख्यप्रदेशानि ।
गगनं अनंतप्रदेशं मन्यस्व बहुविधाः पुद्गलदेशाः ॥ १५० ॥

धम्माधम्मुवि इत्यादि । **धम्माधम्मुवि** धर्माधर्मद्वितयमेव **एक्कु जिउ** एको विवक्षितो जीवः **ए जि** एतान्येव त्रीणि द्रव्याणि **असंखपएस** असंख्येयप्रदेशानि भवंति **गयणु** गगनं **अणंतपएसि** अनंतप्रदेशं **मुणि** मन्यस्व जानीहि **बहुविह** बहुविधा भवंति । के ते । **पुग्गलदेस** पुद्गलप्रदेशाः । अत्र पुद्गलद्रव्यप्रदेशविवक्षया प्रदेशशब्देन परमाणवो ग्राह्याः

दूसरे ग्रंथोंमें भी निश्चयकर हलन चलनादि क्रिया रहित जीवका लक्षण कहा है । "यावक्रिया" इत्यादि । इसका अर्थ ऐसा है कि जब तक इस जीवके हलन चलनादि क्रिया है गतिसे गत्यंतरको जाना है तब तक दूसरे द्रव्यका संबंध है जब दूसरेका संबंध मिटा अद्वैत हुआ तब निकल अर्थात् शरीरसे रहित निःक्रिय है उसके हलन चलनादि क्रिया कहांसे होसक्ती है अर्थात् संसारी जीवके कर्मके संबंधसे गमन है सिद्ध भगवान कर्मरहित निःक्रिय हैं उनके गमनागमन क्रिया कभी नहीं होसक्ती ॥ १४९ ॥

आगे पंचास्तिकायके प्रगट करनेके लिये काल द्रव्य अप्रदेशीको छोड़कर अन्य पांचद्रव्योंमेंसे किसके कितने प्रदेश हैं यह कहते हैं;—[**धर्माधर्मौ**] धर्मद्रव्य अधर्मद्रव्य [**अपि एकः जीवः**] और एक जीव [**एतानि एव**] इन तीनों ही को [**असंख्यप्रदेशानि**] असंख्यात प्रदेशी [**मन्यस्व**] तू जान [**गगनं**] आकाश [**अनंतप्रदेशं**] अनंतप्रदेशी है [**पुद्गलप्रदेशाः**] और पुद्गलके प्रदेश [**बहुविधाः**] बहुत प्रकारके हैं परमाणू तो एक प्रदेशी है और स्कंध संख्यात प्रदेश असंख्यात प्रदेश तथा अनंत प्रदेशी भी होते हैं । **भावार्थ**—जगतमें धर्म द्रव्य तो एक ही है, वह असंख्यात प्रदेशी है, अधर्म द्रव्य भी एक है असंख्यात प्रदेशी है, जीव अनंत हैं सो एक २ जीव असंख्यात प्रदेशी है. आकाशद्रव्य एक ही है वह अनंतप्रदेशी है ऐसा जानो । पुद्गल एक प्रदेशसे लेकर अनंत प्रदेशतक है । एक परमाणू तो एक प्रदेशी है और जैसे २ परमाणू मिलते जाते हैं वैसे २ प्रदेश भी वढते जाते हैं वे संख्यात असंख्यात अनंत प्रदेशतक जानने,

न च क्षेत्रप्रदेशा इति । कस्मात् । पुद्गलस्यानंतक्षेत्रप्रदेशाभावादिति । अथवा पाठांतरं । 'पुग्गलु तिविहु पएसु' पुद्गलद्रव्ये संख्यातासंख्यातानंतरूपेण त्रिविधाः प्रदेशाः परमाणवो भवंतीति । अत्र निश्चयेन द्रव्यकर्माभावादमूर्तो मिथ्यात्वरागादिरूपभावकर्मसंकल्पविकल्पाभावात् शुद्धा लोकाकाशप्रमाणेनासंख्येयाः प्रदेशाः यस्य शुद्धात्मनः स शुद्धात्मा वीतरागनिर्विकल्पसमाधिपरिणतिकाले साक्षादुपादेय इति भावार्थः ॥ १५० ॥

अथ लोके यद्यपि व्यवहारेणैकक्षेत्रावगाहेन तिष्ठंति द्रव्याणि तथापि निश्चयेन संकरव्यतिकरपरिहारेण कृत्वा स्वकीयस्वकीयस्वरूपं न त्यजंतीति दर्शयति;—

लोयागासु धरेवि जिय, कहियइं दव्वइं जाइं ।
एक्कहिं मिलियइं इत्थु जगि, सगुणहिं णिवसहिं ताइं ॥ १५१ ॥

लोकाकाशं धृत्वा जीव कथितानि द्रव्याणि यानि ।
एकत्वे मिलितानि अत्र जगति स्वगुणेषु निवसंति तानि ॥ १५१ ॥

लोगागासु इत्यादि । **लोगागासु** लोकाकाशं कर्मतापन्नं **धरेवि** धृत्वा मर्यादीकृत्वा **जिय** हे जीव अथवा लोकाकाशमाधारीकृत्वा **ठियाइं** आधेयरूपेण स्थितानि । कानि स्थितानि । **कहियइं दव्वइं जाइं** कथितानि जीवादिद्रव्याणि यानि । पुनः कथंभूतानि ।

अनंत परमाणू इकट्ठे होवें तब अनंत प्रदेश कहे जाते हैं । अन्य द्रव्योंके तो विस्ताररूप प्रदेश हैं और पुद्गलके स्कंधरूप प्रदेश हैं । पुद्गलके कथनमें प्रदेश शब्दसे परमाणू लेना क्षेत्र नहीं लेना पुद्गलका प्रचार लोकमें ही है अलोकाकाशमें नहीं है इसलिये अनंत क्षेत्र प्रदेशके अभाव होनेसे क्षेत्र प्रदेश न जानने । जैसे २ परमाणू मिलजाते हैं वैसे २ प्रदेशोंकी बढवारी जाननी । इसी दोहाके कथनमें पाठांतरमें "पुग्गलु तिविहु पएसु" ऐसा है उसका अर्थ यह है कि पुद्गलके संख्यात असंख्यात अनंत प्रदेश परमाणुओंके मेलसे जानने चाहिये अर्थात् एक परमाणू एक प्रदेश बहुत परमाणू बहु प्रदेश यह जानना । सूत्रमें शुद्ध निश्चयनयकर द्रव्यकर्मके अभावसे यह जीव अमूर्तीक है और मिथ्यात्वरागादिरूप भावकर्म संकल्प विकल्पके अभावसे शुद्ध है लोकाकाशप्रमाण असंख्यात प्रदेशवाला है ऐसा जो निजशुद्धात्मा वही वीतरागनिर्विकल्पसमाधिदशामें साक्षात् उपादेय है यह जानना ॥ १५० ॥

आगे लोकमें यद्यपि व्यवहारनयकर ये सब द्रव्य एक क्षेत्रावगाहसे तिष्ठरहे हैं तो भी निश्चयनयकर कोई द्रव्य किसीसे नहीं मिलता और कोई भी अपने २ स्वरूपको नहीं छोड़ता है ऐसा दिखलाते हैं;—[**हे जीव**] हे जीव [**अत्र जगति**] इस संसारमें [**यानि द्रव्याणि कथितानि**] जो द्रव्य कहे गये हैं [**तानि**] वे सब [**लोकाकाशं**

एकहिं मिलियइं एकत्वे मिलितानि । **इत्थु जगि** अत्र जगति **सगुणहिं णिवसहिं** निश्चयनयेन स्वकीयगुणेषु निवसंति 'सगुणहिं' तृतीयांतं करणपदं स्वगुणेष्वधिकरणं कथं जातमिति । ननु कथितं पूर्वं प्राकृते कारकव्यभिचारो लिंगव्यभिचारश्च कचिद्भवतीति । कानि निवसंति । **ताइं** तानि पूर्वोक्तानि जीवादिषड्द्रव्याणीति । तद्यथा । यद्यप्युपचरितासद्भूतव्यवहारेणाधाराधेयभावेनैकक्षेत्रावगाहेन तिष्ठंति तथापि शुद्धपारिणामिकभावग्राहकेण शुद्धद्रव्यार्थिकनयेन संकरव्यतिकरपरिहारेण स्वकीयस्वकीयसामान्यविशेषशुद्धगुणान्न त्यजंतीति । अत्राह प्रभाकरभट्टः । हे भगवन् लोकस्तावदसंख्यातप्रदेशः परमागमे भणितं तिष्ठति तत्रासंख्यातप्रदेशलोके प्रत्येकं प्रत्येकमसंख्येयप्रदेशान्यनंतजीवद्रव्याणि, तत्र चैकैके जीवद्रव्ये कर्मनोकर्मरूपेणानंतानि पुद्गलपरमाणुद्रव्याणि च तिष्ठंति तेभ्योप्यनंतगुणानि शेषपुद्गलद्रव्याणि तिष्ठंति तानि सर्वाण्यसंख्येयप्रदेशलोके कथमवकाशं लभंते इति पूर्वपक्षः । भगवान् परिहारमाह । अवगाहनशक्तियोगादिति । तथाहि । यथैकस्मिन् गूढनागरसगद्याणके शतसहस्रलक्षसुवर्णसंख्याप्रमितान्यवकाशं लभंते । अथवा यथैकस्मिन् प्रदीपप्रकाशे बहवोपि प्रदीपप्रकाशा अवकाशं लभंते । अथवा यथैकस्मिन् भस्मघटे जलघटः सम्यगवकाशं लभते । अथवा यथैकस्मिन् भूमिगृहे बहवोपि पटहजयघंटादिशब्दाः सम्यगवकाशं लभंते तथैकस्मिन् लोके विशिष्टावगाहनशक्तियोगात् पूर्वोक्तानंतसंख्या जीवपुद्गला अवकाशं लभंते नास्ति विरोधः इति । तथा चोक्तं जीवानामवगाहनशक्तिस्वरूपं परमागमे । "एग-

---

धृत्वा] लोकाकाशमें स्थित हैं लोकाकाश तो आधार है और ये सब आधेय हैं [**एकत्वे मिलितानि**] ये द्रव्य एक क्षेत्रमें मिले हुए रहते हैं एक क्षेत्रावगाही हैं तौभी [**स्वगुणेषु**] निश्चय नयकर अपने २ गुणोंमें ही [**निवसंति**] निवास करते हैं परद्रव्यसे मिलते नहीं है । **भावार्थ**—यद्यपि उपचरित असद्भूत व्यवहारनयकर आधाराधेय भावसे एक क्षेत्रावगाहकर तिष्ठरहे हैं तौभी शुद्धपारिणामिक परमभाव ग्राहक शुद्धद्रव्यार्थिक नयसे परद्रव्यसे मिलनेरूप संकर दोषसे रहित हैं और अपने अपने सामान्यगुण तथा विशेषगुणोंको नहीं छोड़ते हैं । यह कथन सुनकर प्रभाकर भट्टने प्रश्न किया कि हे भगवन् परमागममें लोकाकाश तो असंख्यात प्रदेशी कहा है उस असंख्यात प्रदेशी लोकमें अनंत जीव किसतरह समासकते हैं क्योंकि एक एक जीवके असंख्यात २ प्रदेश हैं और एक एक जीवमें अनंतानंत पुद्गलपरमाणू कर्मनोकर्मरूपसे लगरही हैं और उनके सिवाय अनंतगुणे अन्य पुद्गल रहते हैं सो ये द्रव्य असंख्यात प्रदेशी लोकमें कैसे समागये । उसका समाधान श्रीगुरु कहते हैं । आकाशमें अवकाशदान (जगहदेनेकी) शक्ति है उसके संबंधसे समाजाते हैं । जैसे एक गूढ नागरस गुटिकामें शत सहस्र लक्ष सुवर्ण संख्या आजाती है, अथवा एक दीपकके प्रकाशमें बहुत दीपकोंका प्रकाश

णिगोदसरीरे जीवा दव्वप्पमाणदो दिट्ठा । सिद्धेहिं अणंतगुणा सव्वेण वितीदकालेण" ॥ पुनस्तथोक्तं पुद्गलानामवगाहनशक्तिस्वरूपं । "ओगाढगाढणिचिदो पुग्गलकाएहिं सव्वदो लोगो । सुहुमेहिं बादरेहि य णंताणंतेहिं विविहेहिं" । अयमत्र भावार्थः । यद्यप्येकावगाहेन तिष्ठंति तथापि शुद्धनिश्चयेन जीवाः केवलज्ञानाद्यनंतगुणस्वरूपं न त्यजंति पुद्गलाश्च वर्णादिस्वरूपं न त्यजंति शेषद्रव्याणि च स्वकीयस्वकीयस्वरूपं न त्यजंति ॥ १५१ ॥

अथ जीवस्य व्यवहारेण शेषपंचद्रव्यकृतमुपकारं कथयति, तस्यैव जीवस्य निश्चयेन तान्येव दुःखकारणानि च कथयति;—

एयइं दव्वइं देहियइं, णियणियकज्जु जणंति ।
चउगइदुक्ख सहंत जिय, ते संसारु भमंति ॥ १५२ ॥

एतानि द्रव्याणि देहिनां निजनिजकार्यं जनयंति ।
चतुर्गतिदुःखं सहमानाः जीवाः तेन संसारं भ्रमंति ॥ १५२ ॥

एयइं इत्यादि । **एयइं** एतानि **दव्वइं** जीवादन्यद्रव्याणि **देहियहं** देहिनां संसारि-

---

जगह पाता है, अथवा जैसे एक राखके घड़ेमें जलका घड़ा अच्छी तरह अवकाश पाता है भस्में जल शोषित हो जाता है, अथवा जैसे एक उटनीके दूधके घडेमें शहतका घड़ा समा जाता है, अथवा एक भूमिघरमें ढोल घंटा आदि बहुत वाजोंका शब्द अच्छी तरह समाजाता है उसीतरह एक लोक आकाशमें विशिष्ट अवगाहन शक्तिके योगसे अनंतजीव और अनंतानंत पुद्गल अवकाश पाते हैं इसमें विरोध नहीं है । और जीवोंमें परस्पर अवगाहन शक्ति है । ऐसा ही कथन परमागममें कहा है—"एगणिगोद" इत्यादि । इसका अर्थ ऐसा है कि एक निगोदिया जीवके शरीरमें जीव द्रव्यके प्रमाणसे दिखलाए गये जितने सिद्ध हैं उन सिद्धोंसे अनंतगुणे जीव एक निगोदियाके शरीरमें हैं और निगोदियाका शरीर अंगुलके असंख्यातवें भाग है सो ऐसे सूक्ष्म शरीरमें अनंत जीव समा जाते हैं तो लोकाकाशमें समाजानेका क्या अचंभा है । अनंतानंत पुद्गल लोकाकाशमें समारहे हैं उसकी "ओगाढ" इत्यादि गाथा है । उसका अर्थ यह है कि सबप्रकार सब जगह यह लोक पुद्गल कायोंकर अवगाढगाढ भरा है ये पुद्गल काय अनंत हैं अनेक प्रकारके भेदको धरते हैं कोई सूक्ष्म हैं कोई बादर हैं । तात्पर्य यह है कि यद्यपि सब द्रव्य एक क्षेत्रावगाहकर रहते हैं तौभी शुद्धनिश्चयनयकर जीव केवलज्ञानादि अनंतगुणरूप अपने स्वरूपको नहीं छोडते हैं पुद्गलद्रव्य अपने वर्णादि स्वरूपको नहीं छोड़ता और धर्मादि अन्य द्रव्य भी अपने २ स्वरूपको नहीं छोडते हैं ॥ १५१ ॥

आगे जीवका व्यवहारनयकर अन्य पांचों द्रव्य उपकार करते हैं ऐसा कहते हैं तथा उसी जीवके निश्चयसे वे ही दुःखके कारण हैं ऐसा कहते हैं;—**[एतानि]** ये

जीवानां । किं कुर्वंति । **णियणियकज्जु जणंति** निजनिजकार्यं जनयंति येन कारणेन निजनिजकार्यं जनयंति **चउगइदुक्ख सहंत जिय** चतुर्गतिदुःखं सहमानाः संतो जीवा **तें संसारु भमंति** तेन कारणेन संसारं भ्रमंतीति । तथा च । पुद्गलस्तावज्जीवस्य स्वसंवित्तिविलक्षणविभावपरिणामरतस्य व्यवहारेण शरीरवाङ्मनःप्राणापाननिष्पत्तिं करोति, धर्मद्रव्यं चोपचरितासद्भूतव्यवहारेण गतिसहकारित्वं करोति, तथैवाधर्मद्रव्यं स्थितिसहकारित्वं करोति, तेनैव व्यवहारनयेन आकाशद्रव्यमवकाशदानं ददाति, तथैव कालद्रव्यं च शुभाशुभपरिणामसहकारित्वं करोति । एवं पंचद्रव्याणामुपकारं लब्ध्वा जीवो निश्चयव्यवहाररत्नत्रयभावनाच्युतःसन् चतुर्गतिदुःखं सहत इति भावार्थः ॥ १५२ ॥

अथैवं पंचद्रव्याणां स्वरूपं निश्चयेन दुःखकारणं ज्ञात्वा हे जीव निजशुद्धात्मोपलंभलक्षणे मोक्षमार्गे स्थीयत इति निरूपयति;—

दुक्खहं कारणु मुणिवि जिय, दव्वहं एहु सहाउ ।
होयवि मुक्खहं मग्गि लहु, गम्मिज्जइ परलोउ ॥ १५३ ॥

दुःखस्य कारणं मत्वा जीव द्रव्याणां इमं स्वभावम् ।
भूत्वा मोक्षस्य मार्गे लघु गम्यते परलोकः ॥ १५३ ॥

दुक्खहं कारणु दुःखस्य कारणं **मुणिवि** मत्वा ज्ञात्वा **जिय** हे जीव । किं दुःखस्य कारणं ज्ञात्वा । **दव्वहं एहु सहाउ** द्रव्याणामिमं शरीरवाङ्मनःप्राणापाननिष्पत्त्यादिलक्षणं

[**द्रव्याणि**] द्रव्य [**देहिनां**] जीवोंके [**निजनिजकार्यं**] अपने २ कार्यको [**जनयंति**] उपजाते हैं [**तेन**] इस कारण [**चतुर्गतिदुःखं सहमानाः जीवाः**] नरकादि चारों गतियोंके दुःखोंको सहते हुए जीव [**संसारं**] संसारमें [**भ्रमंति**] भटकते हैं। **भावार्थ-** ये द्रव्य जो जीवका उपकार करते हैं उसको दिखलाते हैं । पुद्गल तो आत्मज्ञानसे विपरीत विभाव परिणामोंमें लीन हुए अज्ञानी जीवोंके व्यवहारनयकर शरीर वचन मन श्वासोश्वास इन चारोंकी उत्पत्ति करता है अर्थात् मिथ्यात्व अव्रत कषाय रागद्वेषादि विभाव परिणाम हैं इन विभावपरिणामोंके योगसे जीवके पुद्गलका संबंध है और पुद्गलके संबंधसे ये हैं, धर्मद्रव्य उपचरितासद्भूत व्यवहारनयकर गतिसहाई है. अधर्म द्रव्य स्थिति सहकारी है, व्यवहार नयकर आकाश द्रव्य अवकाश (जगह) देता है और कालद्रव्य शुभ अशुभ परिणामोंका सहाई है । इस तरह ये पांच द्रव्य सहकारी हैं। इनका सहाय पाकर ये जीव निश्चय व्यवहार रत्नत्रयकी भावनासे रहित भ्रष्ट होते हुए चारों गतियोंके दुःखोंको सहते हुए संसारमें भटकते हैं यह तात्पर्य हुआ ॥ १५२ ॥

आगे पर द्रव्योंका संबंध निश्चय नयसे दुःखका कारण है ऐसा जानकर हे जीव शुद्धात्माकी प्राप्तिरूप मोक्षमार्गमें स्थित हो ऐसा कहते हैं;—[**हे जीव**] हे जीव [**द्रव्याणां**

पूर्वोक्तस्वभावं पुद्गलादिपंचद्रव्यस्वभावं दुःखस्य कारणं ज्ञात्वा। किं क्रियते। **होयवि** भूत्वा। क। **मोक्खहं मग्गि** मोक्षस्य मार्गे **लहु** लघु शीघ्रं पश्चात् **गमिज्जइ** गम्यते। कः कर्मतापन्नः। **परलोउ** परलोको मोक्ष इति। तथाहि। वीतरागसदानंदैकस्वाभाविक-सुखविपरीतस्याकुलत्वोत्पादकस्य दुःखस्य कारणानि पुद्गलादिपंचद्रव्याणि ज्ञात्वा हे जीव भेदाभेदरत्नत्रयलक्षणे मोक्षस्य मार्गे स्थित्वा परः परमात्मा तस्यावलोकनमनुभवनं परमसम-रसीभावेन परिणमनं परलोको मोक्षस्तत्र गम्यत इति भावार्थः॥ १५३॥

अथेदं व्यवहारेण मया भणितं जीवद्रव्यादिश्रद्धानरूपं सम्यग्दर्शनमिदानीं सम्यग्ज्ञानं चारित्रं च हे प्रभाकरभट्ट शृणु त्वमिति मनसि धृत्वा सूत्रमिदं प्रतिपादयति;—

णियमिं कहियउ एहु मइं, ववहारेणवि दिट्ठि।
एवहिं णाणु चरित्तु सुणि, जिं पावहि परमेट्ठि॥ १५४॥

नियमेन कथिता एषा मया व्यवहारेणैव दृष्टिः।
इदानीं ज्ञानं चारित्रं शृणु येन प्राप्नोषि परमेष्ठिम्॥ १५४॥

णियमें नियमेन निश्चयेन **कहियउ** कथिता **एहु मइ** एषा कर्मतापन्ना मया। केनैव। **ववहारेणवि** व्यवहारनयेनैव। एषा का। **दिट्ठि** दृष्टिः। दृष्टिः कोर्थः सम्यक्त्वं **एवहिं** इदानीं **णाणु चरित्तु सुणि** हे प्रभाकरभट्ट क्रमेण ज्ञानचारित्रद्वयं शृणु। येन श्रुतेन किं भवति। **जें पावहि** येन सम्यग्ज्ञानचरित्रद्वयेन प्राप्नोषि। किं प्राप्नोषि। **परमेट्ठि** परमे-ष्ठिपदं मुक्तिपदमिति। अतो व्यवहारसम्यक्त्वविषयभूतानां द्रव्याणां चूलिकारूपेण व्याख्यानं

इमं स्वभावं] परद्रव्योंके ये स्वभाव [**दुःखस्य**] दुःखके [**कारणं मत्वा**] कारण जान-कर [**मोक्षस्य मार्गे**] मोक्षके मार्गमें [**भूत्वा**] लगकर [**लघु**] शीघ्र ही [**परलोकः गम्यते**] उत्कृष्ट लोक रूप मोक्षमें जाना चाहिये। **भावार्थ**—पहले कहेगये पुद्गलादि द्रव्योंके सहाय शरीर वचन मन श्वासोश्वास आदिक ये सब दुःखके कारण हैं क्योंकि वीतराग सदा आनंदरूप स्वभावकर उत्पन्न जो अतींद्री सुख उससे विपरीत आकुलताके उपजानेवाले हैं ऐसा जानकर हे जीव तू भेदाभेद रत्नत्रयस्वरूप मोक्षके मार्गमें लगकर परमात्माका अनुभव परमसमरसीभावसे परिणमन रूप मोक्ष उसमें गमन कर॥ १५३॥

आगे व्यवहारनयसे मैंने ये जीवादि द्रव्योंके श्रद्धानरूप सम्यग्दर्शन कहा है अब सम्यग्ज्ञान और सम्यक् चारित्रको हे प्रभाकर भट्ट तू सुन ऐसा मनमें रखकर यह दोहा-सूत्र कहते हैं;—हे प्रभाकर भट्ट [**मया**] मैंने [**व्यवहारेणैव**] व्यवहारनयसे तुझको [**एषा दृष्टिः**] ये सम्यग्दर्शनका स्वरूप [**नियमेन कथिता**] अच्छीतरह कहा [**इदानीं**] अब तू [**ज्ञानं चारित्रं**] ज्ञान और चारित्रको [**शृणु**] सुन [**येन**] जिसके धारण करनेसे [**परमेष्ठिं प्राप्नोषि**] सिद्धपरमेष्ठीके पदको पावै। **भावार्थ**—व्यवहार सम्यक्त्वके

क्रियते । तद्यथा । "परिणाम जीव मुत्तं सपदेसं एय खित्त किरिया य । णिच्चं कारण कत्ता सव्वगदं इदरह्मि यपवेसो" । परिणाम इत्यादि । 'परिणाम' परिणामिनौ जीवपुद्गलौ स्वभावविभावपरिणामाभ्यां शेषचत्वारि द्रव्याणि जीवपुद्गलवद्विभावव्यंजनपर्यायाभावात् मुख्यवृत्त्या पुनरपरिणामीनि इति, 'जीव' शुद्धनिश्चयनयेन विशुद्धज्ञानदर्शनस्वभावं शुद्धचैतन्यं प्राणशब्देनोच्यते तेन जीवतीति जीवः व्यवहारनयेन पुनः कर्मोदयजनितद्रव्यभावरूपैश्चतुर्भिः प्राणैर्जीवति जीविष्यति जीवितपूर्वो वा जीवः पुद्गलादिपंचद्रव्याणि पुनरजीवरूपाणि, 'मुत्तं' अमूर्तशुद्धात्मनो विलक्षणा स्पर्शरसगंधवर्णवती मूर्तिरुच्यते तत्सद्भावान्मूर्तः पुद्गलः जीवद्रव्यं पुनरनुपचरितासद्भूतव्यवहारेण मूर्तमपि शुद्धनिश्चयनयेनामूर्तं धर्माधर्माकाशकालद्रव्याणि चामूर्तानि, 'सपदेसं' लोकमात्रप्रमितासंख्येयप्रदेशलक्षणं जीवद्रव्यमादिं कृत्वा पंचद्रव्याणि पंचास्तिकायसंज्ञानि सप्रदेशानि कालद्रव्यं पुनर्बहुप्रदेशलक्षणकायत्वाभावादप्रदेशं, 'एय, द्रव्यार्थिकनयेन धर्माधर्माकाशद्रव्याण्येकानि भवंति जीवपुद्गलकालद्रव्याणि पुनरनेकानि भवंति, 'खेत्त' सर्वद्रव्याणामवकाशदानसामर्थ्यात् क्षेत्रमाकाशमेकं शेषपंचद्रव्याण्यक्षेत्राणि, 'किरिया य' क्षेत्रात्क्षेत्रांतरगमनरूपा परिस्पंदवती चलनवती क्रिया सा विद्यते ययोस्तौ क्रियावंतौ जीवपुद्गलौ धर्माधर्माकाशकालद्रव्याणि पुनर्निष्क्रियाणि, 'णिच्चं' धर्माधर्माकाशकालद्रव्याणि यद्यप्यर्थपर्यायत्वेनानित्यानि तथापि

कारण भूत छह द्रव्योंका सांगोपांग व्याख्यान करते हैं "परिणाम" इत्यादि गाथासे । इसका अर्थ यह है कि इन छह द्रव्योंमें विभावपरिणामके परिणमनेवाले जीव और पुद्गल दोही हैं अन्य चार द्रव्य अपने स्वभावरूप तो परिणमते हैं लेकिन जीव पुद्गलकी तरह विभाव व्यंजन पर्यायके अभावसे विभावपरिणमन नहीं है इसलिये मुख्यतासे परिणामी दो द्रव्य ही कहे हैं, शुद्ध निश्चय नयकर शुद्ध ज्ञान दर्शन स्वभाव जो शुद्ध चैतन्यप्राण उनसे जीवता है जीवेगा पहले जी आया और व्यवहार नयकर इंद्री बल आयुश्वासोश्वास रूप द्रव्यप्राणोंकर जीता है जीवेगा पहले जी चुका इसलिये जीवको ही जीव कहा गया है अन्य पुद्गलादि पांच द्रव्य अजीव हैं, स्पर्शरसगंधवर्णवाली मूर्ति सहित मूर्तीक एक पुद्गलद्रव्य ही है अन्य पांच अमूर्तीक हैं । उनमेंसे धर्म अधर्म आकाश काल ये चारों तो प्रत्यक्षमें अमूर्तीक हैं तथा जीवद्रव्य अनुपचरित असद्भूत व्यवहार नयकर मूर्तीक भी कहा जाता है क्योंकि शरीरको धारण कर रहा है तौभी शुद्धनिश्चयनयकर अमूर्तीक ही है, लोक प्रमाण असंख्यात प्रदेशी जीवद्रव्यको आदि लेकर पांच द्रव्य पंचास्तिकाय हैं वे सप्रदेशी हैं और कालद्रव्य बहुप्रदेशस्वभावकायपना न होनेसे अप्रदेशी है, धर्म अधर्म आकाश ये तीन द्रव्य एक एक हैं और जीव पुद्गल काल ये तीनों अनेक हैं । जीव तो अनंत हैं पुद्गल अनंतानंत हैं काल असंख्यात है

मुख्यवृत्त्या विभावव्यंजनपर्यायाभावात् नित्यानि । द्रव्यार्थिकनयेन च जीवपुद्गलद्रव्ये पुनर्यद्यपि द्रव्यार्थिकनयापेक्षया नित्ये तथाप्यगुरुलघुपरिणतिरूपस्वभावपर्यायापेक्षया विभावव्यंजनपर्यायापेक्षया चानित्ये, 'कारण' पुद्गलधर्माधर्माकाशकालद्रव्याणि व्यवहारनयेन जीवस्य शरीरवाङ्मनःप्राणापानादिगतिस्थित्यवगाहवर्तनाकार्याणि कुर्वंति इति कारणानि भवंति जीवद्रव्यं पुनर्यद्यपि गुरुशिष्यादिरूपेण परस्परोपग्रहं करोति तथापि पुद्गलादिपंचद्रव्याणां किमपि न करोतीत्यकारणं, 'कत्ता' शुद्धपारिणामिकपरमभावग्राहकेण शुद्धद्रव्यार्थिकनयेन यद्यपि बंधमोक्षद्रव्यभावरूपः पुण्यपापघटपटादीनामकर्ता जीवस्तथाप्यशुद्धनिश्चयेन शुभाशुभोपयोगाभ्यां परिणतःसन् पुण्यपापबंधयोःकर्ता तत्फलभोक्ता च भवति विशुद्धज्ञानदर्शनस्वभावनिजशुद्धात्मद्रव्यसम्यक्श्रद्धानज्ञानानुष्ठानरूपेण शुद्धोपयोगेन तत्परिणतः सन् मोक्षस्यापि कर्ता तत्फलभोक्ता च । शुभाशुभशुद्धपरिणामानां परिणमनमेव कर्तृत्वं सर्वत्र ज्ञातव्यमिति । पुद्गलादिपंचद्रव्याणां च स्वकीयस्वकीयपरिणामेन परिणमनमेव कर्तृत्वं । वस्तुवृत्त्या पुनः पुण्यपापादिरूपेणाकर्तृत्वमेव, 'सव्वगदं' लोकालोकव्याप्त्यपेक्षया सर्वगतमाकाशं भण्यते धर्माधर्मौ च लोकव्याप्त्यपेक्षया जीवद्रव्यं तु पुनरेकैकजीवापेक्षया लोकपू-

---

सब द्रव्योंको अवकाश देने समर्थ एक आकाश ही है इसलिये आकाश क्षेत्र कहागया है बाकी पांच द्रव्य अक्षेत्री हैं, एक क्षेत्रसे दूसरे क्षेत्रमें गमन करना वह चलन हलनवती क्रिया कही गई है यह क्रिया जीव पुद्गल दोनोंके ही है और धर्म, अधर्म आकाश काल चार द्रव्य निष्क्रिय हैं जीवोंमें भी संसारी जीव हलनचलनवाले हैं इसलिये क्रियावंत हैं और सिद्ध परमेष्ठी निःक्रिय हैं उनके हलन चलन क्रिया नहीं है, द्रव्यार्थिकनयसे विचारा जावे तो सभी द्रव्य नित्य हैं और अर्थपर्याय जो षट् गुणी हानि वृद्धिरूप स्वभावपर्याय है उसकी अपेक्षा सब ही अनित्य हैं तौभी विभावव्यंजनपर्याय जीव और पुद्गल इन दोनोंकी है इसलिये इन दोनोंको ही अनित्य कहा है अन्य चार द्रव्य विभावके अभावसे नित्य ही हैं इसकारण यह निश्चयसे जानना कि चार नित्य हैं दो अनित्य हैं तथा द्रव्यकर सब ही नित्य हैं कोई भी द्रव्य विनश्वर नहीं है, जीवको पांचों ही द्रव्य कारणरूप हैं पुद्गल तो शरीरादिकका कारण है धर्म अधर्मद्रव्य गति स्थिति के कारण हैं आकाशद्रव्य अवकाश देनेका कारण है और काल वर्तनाका सहाई है । ये पांचों द्रव्य जीवको कारण हैं और जीव उनको कारण नहीं है । यद्यपि जीवद्रव्य अन्य जीवोंको गुरु शिष्यादिरूप परस्पर उपकार करता है तौभी पुद्गलादि पांचद्रव्योंको अकारण है और ये पांचो कारण हैं, शुद्ध पारिणामिक परमभावग्राहक शुद्धद्रव्यार्थिक नयकर यह जीव यद्यपि बंध मोक्ष पुन्य पापका कर्ता नहीं है तौभी अशुद्ध निश्चयनयकर शुभ अशुभ उपयोगोंसे परिणत हुआ पुन्य पापके बंधका कर्ता होता है और उनके

रणावस्थां विहायासर्वगतं नानाजीवापेक्षया सर्वगतमेव भवतीति । पुद्गलद्रव्यं पुनर्लोकरूप-महास्कंधापेक्षया सर्वगतं शेषपुद्गलापेक्षया सर्वगतं न भवतीति । कालद्रव्यं पुनरेककालाणुद्रव्यापेक्षया सर्वगतं न भवति लोकप्रदेशप्रमाणनानाकालाणुविवक्षया लोके सर्वगतं भवति, 'इदरह्मि यपवेसो' यद्यपि सर्वद्रव्याणि व्यवहारेणैकक्षेत्रावगाहेनान्योन्यानुप्रवेशेन तिष्ठंति तथापि निश्चयनयेन चेतनादिस्वकीयस्वकीयस्वरूपं न त्यजंतीति । तथा चोक्तं । "अण्णोण्णं पविसंता दिंता उग्गासमण्णमण्णस्स । मेलंतावि य णिच्चं सगसब्भावं ण विजहंति" ॥ इदमत्र तात्पर्यं । व्यवहारसम्यक्त्वविषयभूतेषु षड्द्रव्येषु मध्ये वीतरागचिदानंदैकादिगुण-स्वभावं शुभाशुभमनोवचनकायव्यापाररहितं निजशुद्धात्मद्रव्यमेवोपादेयं ॥ १५४ ॥ एवमे-कोनविंशतिसूत्रप्रमितस्थले निश्चयव्यवहारमोक्षमार्गप्रतिपादकत्वेन पूर्वसूत्रत्रयं गतं । इदं पुनरंतरं स्थलं चतुर्दशसूत्रप्रमितं षड्द्रव्यध्येयभूतव्यवहारसम्यक्त्वव्याख्यानमुख्यत्वेन समाप्तमिति ।

फलका भोक्ता होता है तथा विशुद्ध ज्ञान दर्शनरूप निज शुद्धात्मद्रव्यका श्रद्धान ज्ञान आचरणरूप शुद्धोपयोगकर परिणत हुआ मोक्षका भी कर्ता होता है और अनंतसुखका भोक्ता होता है । इसलिये जीवको कर्ता भी कहाजाता है और भोक्ता भी कहा जाता है । शुभ अशुभ शुद्ध परिणमन ही सवजगह कर्तापना है और पुद्गलादि पांचद्रव्योंके अपने २ परिणामरूप जो परिणमन वही कर्तापना है पुन्य पापादिकका कर्तापना नहीं है, सर्वगत-पना लोकालोकव्यापकताकी अपेक्षा आकाशहीमें है धर्मद्रव्य अधर्मद्रव्य ये दोनों लोका-काशव्यापी हैं अलोकमें नहीं हैं और जीव द्रव्यमें एक जीवकी अपेक्षा केवलसमुद्धातमें लोक पूरण अवस्थामें लोकमें सर्वगतपना है तथा नाना जीवकी अपेक्षा सर्वगतपना नहीं है, पुद्गलद्रव्य लोकप्रमाण महास्कंधकी अपेक्षा सर्वगत है अन्य पुद्गलकी अपेक्षा सर्वगत नहीं है कालद्रव्य एक कालाणूकी अपेक्षा तो एकप्रदेशगत है सर्वगत नहीं है और नाना कालाणूकी अपेक्षा लोकाकाशके सब प्रदेशोंमें कालाणू हैं इसलिये सब कालाणुओंकी अपेक्षा सर्वगत कह सकते हैं । यह नयविवक्षासे सर्वगतपनेका व्याख्यान किया । और मुख्यवृत्तिसे विचाराजावे तो सर्वगतपना आकाशमें ही है अथवा ज्ञानकी अपेक्षा जीवमें भी है जीवका केवलज्ञान लोकालोक व्यापक है इसलिये सर्वगत कहा । ये सब द्रव्य यद्यपि व्यवहारनयकर एक क्षेत्रावगाही रहते हैं तौभी निश्चयनयकर अपने २ स्वभावको नहीं छोड़ते दूसरे द्रव्यमें जिनका प्रवेश नहीं है सभी द्रव्य निज २ स्वरूपमें हैं पररूप नहीं हैं कोई किसीका स्वभाव नहीं लेता । ऐसा ही कथन श्रीपंचास्तिकायमें कहा है । "अण्णोण्णं" इत्यादि । इसका अर्थ ऐसा है कि यद्यपि ये छहों द्रव्य परस्परमें प्रवेश करते हुए देखे जाते हैं तौभी कोई किसीमें प्रवेश नहीं करता, यद्यपि अन्यको अन्य

अथ संशयविपर्ययानध्यवसायरहितं सम्यग्ज्ञानं प्रकटयति;—

जं जह थक्कउ दव्वु जिय, तं तह जाणइ जो जि ।
अप्पहं केरउ भावडउ, णाणु मुणिज्जहि सो जि ॥ १५५ ॥

यत् यथा स्थितं द्रव्यं जीव तत् तथा जानाति य एव ।
आत्मनः संबंधि भावः ज्ञानं मन्यस्व स एव ॥ १५५ ॥

जं इत्यादि । **जं** यत् **जह** यथा **थक्कउ** स्थितं **दव्वु** द्रव्यं **जिय** हे जीव **तं** तत् **तह** तथा **जाणइ** जानाति **जो जि** य एव । य एव कः । **अप्पहं केरउ भावडउ** आत्मनः संबंधि भावः परिणामः **णाणु मुणिज्जहि** ज्ञानं मन्यस्व जानीहि **सो जि** स एव पूर्वोक्त आत्मपरिणाम इति । तथा च । यद्द्रव्यं यथा स्थितं सत्तालक्षणं उत्पादव्ययध्रौव्यलक्षणं वा गुणपर्यायलक्षणं वा सप्तभङ्ग्यात्मकं वा तत् तथा जानाति य आत्मसंबंधी स्वपरपरिच्छेदको भावः परिणामस्तत् संज्ञानं भवति । अयमत्र भावार्थः । व्यवहारेण सविकल्पावस्थायां तत्त्वविचारकाले स्वपरपरिच्छेदकं ज्ञानं भण्यते । निश्चयनयेन पुनर्वीतराग-

---

अवकाश देता है तौ भी अपना २ अवकाश आपमें ही है परमें नहीं है यद्यपि ये द्रव्य हमेशासे मिलरहे हैं तौभी अपने स्वभावको नहीं छोड़ते । यहां तात्पर्य यह है कि व्यवहारसम्यक्त्वके कारण छह द्रव्योंमें वीतराग चिदानंद अनंत गुणरूप जो शुद्धात्मा है वह शुभ अशुभ मन वचन कायके व्यापारसे रहित हुआ ध्यावने योग्य है ॥ १५४ ॥

इस प्रकार उन्नीस दोहाओंके स्थलमें निश्चय व्यवहार मोक्षमार्गके कथनकी मुख्यतासे तीन दोहा कहे । ऐसे चौदह दोहा तक व्यवहार सम्यक्त्वका व्याख्यान किया जिसमें छहद्रव्यका श्रद्धान मुख्य है ।

आगे संशय विमोह विभ्रम रहित जो सम्यग्ज्ञान है उसका स्वरूप प्रगट करते हैं;— [**हे जीव**] हे जीव [**यत्**] ये सबद्रव्य [**यथास्थितं**] जिस तरह अनादिकालके तिष्ठे हुए हैं जैसा इनका स्वरूप हैं [**तत् तथा**] उनको वैसा ही संशयादि रहित [**य एव जानाति**] जो जानता है [**स एव**] वही [**आत्मनः संबंधी भावः**] आत्माका निजस्वरूप [**ज्ञानं**] सम्यग्ज्ञान है ऐसा [**मन्यस्व**] तू मान । **भावार्थ**—जो द्रव्य है वह सत्ता लक्षण है उत्पाद व्यय ध्रौव्यरूप है और सभी द्रव्य गुणपर्यायको धारण करतो हैं गुणपर्यायके विना कोई नहीं है । अथवा सब ही द्रव्य सप्तभंगीस्वरूप हैं ऐसा द्रव्योंका स्वरूप जो निःसंदेह जाने आप परको पहचाने ऐसा जो आत्माका भाव (परिणाम) वह सम्यग्ज्ञान है। सारांश यह है कि व्यवहारनयकर विकल्प सहित अवस्थामें तत्त्वके विचारके समय आप परका जानपना ज्ञान कहा है और निश्चयनयकर वीतराग निर्विकल्प समाधिसमय पदार्थोंका जानपना मुख्य नहीं लिया केवल स्वसंवेदनज्ञान ही

निर्विकल्पसमाधिकाले बहिरुपयोगो यद्यप्यनीहितस्तथापीहापूर्वकविकल्पाभावाद्गौणत्वमिति कृत्वा स्वसंवेदनज्ञानमेव ज्ञानमुच्यते ॥ १५५ ॥

अथ स्वपरद्रव्यं ज्ञात्वा रागादिरूपपरद्रव्यविषयसंकल्पविकल्पत्यागेन स्वस्वरूपे अवस्थानं ज्ञानिनां चारित्रमिति प्रतिपादयति;—

जाणवि मण्णवि अप्पु परु, जो परभाउ चएइ ।
सो णिउ सुद्धउ भावडउ, णाणिहिं चरणु हवेइ ॥ १५६ ॥

ज्ञात्वा मत्वा आत्मानं परं यः परभावं त्यजति ।
स निजः शुद्धः भावः ज्ञानिनां चरणं भवति ॥ १५६ ॥

जाणवि इत्यादि । **जाणवि** सम्यग्ज्ञानेन ज्ञात्वा न केवलं ज्ञात्वा **मण्णवि** तत्त्वार्थश्रद्धानलक्षणपरिणामेन मत्त्वा श्रद्धाय । कं । **अप्पु परु** आत्मानं च परं च **जो** यः कर्ता **परभाउ** परभावं **चएइ** त्यजति **सो** स पूर्वोक्तः **णिउ** निजः **सुद्धउ भावडउ** शुद्धो भावः **णाणिहिं चरणु हवेइ** ज्ञानिनां पुरुषाणां चरणं भवतीति । तद्यथा । वीतरागसहजानंदैकस्वभावं स्वद्रव्यं तद्विपरीतं परद्रव्यं च संशयविपर्ययानध्यवसायरहितेन ज्ञानेन पूर्वं ज्ञात्वा शंकादिदोषरहितेन सम्यक्त्वपरिणामेन श्रद्धाय च यः कर्ता मायामिथ्यानिदानशल्यप्रभृतिसमस्तचिंताजालत्यागेन निजशुद्धात्मस्वरूपे परमानंदसुखरसास्वादतृप्तो भूत्वा तिष्ठति स पुरुष एवाभेदेन निश्चयचारित्रं भवतीति भावार्थः ॥ १५६ ॥ एवं मोक्षमोक्ष-

---

निश्चय सम्यग्ज्ञान है । व्यवहारसम्यग्ज्ञान तो परंपराय मोक्षका कारण है और निश्चय सम्यग्ज्ञान साक्षात् मोक्षका कारण है ॥ १५५ ॥

आगे निजपर द्रव्यको जानकर रागादिरूप जो परद्रव्यमें संकल्पविकल्प हैं उनके त्यागसे जो निजस्वरूपमें निश्चलता वही ज्ञानी जीवोंके सम्यक् चारित्र है ऐसा कहते हैं;—सम्यग्ज्ञानसे [**आत्मानं च परं**] आपको और परको [**ज्ञात्वा**] जानकर और सम्यग्दर्शनसे [**मत्त्वा**] आपपरकी प्रतीति करके [**यः**] जो [**परभावं**] परभावको [**त्यजति**] छोड़ता है [**सः**] वह [**निजः शुद्धः भावः**] आत्माका निज शुद्ध भाव [**ज्ञानिनां**] ज्ञानीपुरुषोंके [**चरणं**] चारित्र [**भवति**] होता है । **भावार्थ**—वीतराग सहजानंद अद्वितीय स्वभाव जो आत्मद्रव्य उससे विपरीत पुद्गलादि परद्रव्योंको सम्यग्ज्ञानसे पहले तो जानें वह सम्यग्ज्ञान संशय विमोह और विभ्रम इन तीनोंसे रहित है । तथा शंकादि दोषोंसे रहित जो सम्यग्दर्शन है उससे आप परकी श्रद्धा करै अच्छीतरह जानके प्रतीति करै और माया मिथ्या निदान इन तीन शल्योंको आदि देकर समस्त चिंतासमूहके त्यागसे निज शुद्धात्म स्वरूपमें तिष्ठै है, वह परम आनंद अतींद्रिय सुखरसके आस्वादसे तृप्त हुआ पुरुष ही अभेदनयसे निश्चय चारित्र है ॥ १५६ ॥

फलमोक्षमार्गादिप्रतिपादकद्वितीयमहाधिकारमध्ये निश्चयव्यवहारमोक्षमार्गमुख्यत्वेन सूत्रत्रयं षड्द्रव्यश्रद्धानलक्षणं व्यवहारसम्यक्त्वव्याख्यानमुख्यत्वेन सूत्राणि चतुर्दश, सम्यग्ज्ञानचारित्रमुख्यत्वेन सूत्रद्वयमिति समुदायेनैकोनविंशतिसूत्रस्थलं समाप्तं ।

अथानंतरमभेदरत्नत्रयव्याख्यानमुख्यत्वेन सूत्राष्टकं कथ्यते तत्रादौ तावत् रत्नत्रयभक्तभव्यजीवस्य लक्षणं प्रतिपादयति;—

जो भत्तउ रयणत्तयहं, तसु मुणि लक्खणु एउ ।
अप्पा मिल्लिवि गुणणिलउ, तासुवि अण्णु ण झेउ ॥ १५७ ॥

यः भक्तः रत्नत्रयस्य तस्य मन्यस्व लक्षणं इदम् ।
आत्मानं मुक्त्वा गुणनिलयं तस्यैव अन्यत् न ध्येयम् ॥ १५७ ॥

जो इत्यादि । **जो** यः **भत्तउ** भक्तः । कस्य । **रयणत्तयहं** रत्नत्रयसंयुक्तस्य जीवस्य **मुणि** मन्यस्व जानीहि हे प्रभाकरभट्ट । किं जानीहि । **लक्खणु** लक्षणं **एउ** इदमग्रे वक्ष्यमाणं । इदं किं । **अप्पा मिल्लिवि** आत्मानं मुक्त्वा । किं विशिष्टं । **गुणणिलउ** गुणनिलयं गुणगृहं **तासुवि** तस्यैव जीवस्य **अण्णु ण झेउ** निश्चयेनान्यद्बहिर्द्रव्यं ध्येयं न भवतीति । तथाहि । व्यवहारेण वीतरागसर्वज्ञप्रणीतशुद्धात्मतत्त्वप्रभृतिषड्द्रव्यपंचास्तिका-

---

इस प्रकार मोक्ष, मोक्षका फल, मोक्षका मार्ग इनको कहनेवाले दूसरे महाधिकारमें निश्चयव्यवहार रूप निर्वाणके पंथकी मुख्यतासे तीन दोहाओंमें व्याख्यान किया और चौदह दोहाओंमें छह द्रव्यकी श्रद्धारूप व्यवहार सम्यक्त्वका व्याख्यान किया तथा दो दोहाओंमें सम्यग्ज्ञान सम्यक् चारित्रकी मुख्यतासे वर्णन किया । इसप्रकार उन्नीस दोहाओंका स्थल पूरा हुआ ।

आगे अभेद रत्नत्रयके व्याख्यानकी मुख्यतासे आठ दोहासूत्र कहते हैं उनमेंसे पहले रत्नत्रयका भक्त भव्यजीव है उसका लक्षण कहते हैं;—[**यः**] जो जीव [**रत्नत्रयस्य भक्तः**] रत्नत्रयका भक्त है [**तस्य**] उसका [**इदं लक्षणं**] यह लक्षण [**मन्यस्व**] जानना हे प्रभाकर भट्ट रत्नत्रय धारकके ये लक्षण हैं कि [**गुणनिलयं**] गुणोंके समूह [**आत्मानं मुक्त्वा**] आत्माको छोड़कर [**तस्यैव अन्यत्**] आत्मासे अन्य बाह्य द्रव्यको [**न ध्येयं**] न ध्यावै निश्चयनयसे एक आत्मा ही ध्यावने योग्य है अन्य नहीं । **भावार्थ**—व्यवहार नयकर वीतराग सर्वज्ञके कहे हुए शुद्धात्म तत्त्व आदि छहद्रव्य सात तत्त्व नौ पदार्थ पंच अस्तिकायका श्रद्धान योग्य है जानना योग्य है और हिंसादि पाप त्यागना योग्य है व्रतशीलादि पालने योग्य हैं ये लक्षण व्यवहार रत्नत्रयके हैं सो व्यवहारका नाम भेद है वह भेदरत्नत्रय आराधने योग्य है उसके प्रभावसे निश्चयरत्नत्रयकी प्राप्ति है । वीतराग सदा आनंदरूप जो निज शुद्धात्मा आत्मीक सुखरूप सुधारसके आस्वाद

यसप्ततत्त्वनवपदार्थविषये सम्यक् श्रद्धानज्ञानाहिंसादिव्रतशीलपरिपालनरूपस्य भेदरत्नत्रयस्य निश्चयेन वीतरागसदानंदैकरूपसुखसुधारसास्वादपरिणतनिजशुद्धात्मतत्त्वसम्यक्श्रद्धानज्ञानानुचरणरूपस्याभेदरत्नत्रयस्य च योसौ भक्तस्तस्येदं लक्षणं जानीहि । इदं किं । यद्यपि व्यवहारेण सविकल्पावस्थायां चित्तस्थितिकरणार्थं देवेन्द्रचक्रवर्त्यादिविभूतिविशेषकारणं परंपरया शुद्धात्मप्राप्तिहेतुभूतं पंचपरमेष्ठिरूपस्तववस्तुस्तवगुणस्तवादिकं वचनेन स्तुत्यं भवति मनसा च तदक्षररूपादिकं प्राथमिकानां ध्येयं भवति तथापि पूर्वोक्तनिश्चयरत्नत्रयपरिणतिकाले केवलज्ञानाद्यनंतगुणपरिणतस्वशुद्धात्मैव ध्येय इति । अत्रेदं तात्पर्यं । योसावनंतज्ञानादिगुणः शुद्धात्मा ध्येयो भणितः स एव निश्चयेनोपादेय इति ॥ १५७ ॥

अथ ये ज्ञानिनो निर्मलरत्नत्रयमेवात्मानं मन्यंते शिवशब्दवाच्यं ते मोक्षपदाराधकाः संतो निजात्मानं ध्यायंतीति निरूपयति;—

जे रयणत्तउ णिम्मलओ, णाणिय अप्पु भणंति ।
ते आराहय सिवपयहं, णियअप्पा झायंति ॥ १५८ ॥

ये रत्नत्रयं निर्मलं ज्ञानिनः आत्मानं भणंति ।
ते आराधकाः शिवपदस्य निजात्मानं ध्यायंति ॥ १५८ ॥

जे इत्यादि । ये केचन **रयणत्तउ** रत्नत्रयं । कथंभूतं । **णिम्मलउ** निर्मलं रागादि-

---

कर परिणत हुआ । उसका सम्यक् श्रद्धान ज्ञान आचरणरूप अभेदरत्नत्रय है उसका जो भक्त (आराधक) उसके ये लक्षण हैं यह जानो । वे कौनसे लक्षण हैं—यद्यपि व्यवहार नयकर सविकल्प अवस्थामें चित्तके स्थिर करनेके लिये पंचपरमेष्ठीका स्तवन करता है जो पंचपरमेष्ठीका स्तवन देवेंद्र चक्रवर्ती आदि विभूतिका कारण है और परंपराय शुद्ध आत्मतत्त्वकी प्राप्तिका कारण है सो प्रथम अवस्थामें भव्यजीवोंको पंच परमेष्ठी ध्यावने योग्य हैं उनके आत्माका स्तवन गुणोंकी स्तुति वचनसे उनकी अनेक तरहकी स्तुति करनी और मनसे उनके नामके अक्षर तथा उनका रूपादिक ध्यावने योग्य है तौ भी पूर्वोक्त निश्चयरत्नत्रयकी प्राप्तिके समय केवलज्ञानादि अनंत गुणरूप परिणत जो निजशुद्धात्मा वही आराधने योग्य है अन्य नहीं । तात्पर्य यह है कि ध्यान करने योग्य या तो निज आत्मा या पंचपरमेष्ठी हैं अन्य नहीं सो प्रथम अवस्थामें तो पंच परमेष्ठीका ध्यान करना योग्य है और निर्विकल्पदशामें निजस्वरूप ही ध्यावने योग्य है निजरूप ही उपादेय है ॥ १५७ ॥

आगे जो ज्ञानी निर्मलरत्नत्रयको ही आत्मस्वरूप मानते हैं और अपनेको ही शिव जानते हैं वे ही मोक्षपदके धारक हुए निज आत्माको ध्यावते हैं ऐसा निरूपण करते हैं;—[**ये ज्ञानिनः**] जो ज्ञानी [**निर्मलं रत्नत्रयं**] निर्मल रागादि दोषरहित रत्न-

दोषरहितं। कथंभूता ये। **णाणिय** ज्ञानिनः। किं कुर्वंति। **अप्पु भणंति** पूर्वोक्तरत्नत्रयस्वरूपमेवात्मानं आत्मस्वरूपं कर्मतापन्नं **भणंति** मन्यंते **ते आराहय** ते पूर्वोक्ताः पुरुषाः आराधका भवंति। कस्य। **सिवपयहं** शिवपदस्य शिवशब्दवाच्यमोक्षस्य। मोक्षपदाराधका संतः किं कुर्वंति। **णियअप्पा झायंति** निजात्मानं कर्मतापन्नं ध्यायंति इति। तथा च ये केचन वीतरागस्वसंवेदनज्ञानिनः परमात्मानं सम्यक्श्रद्धानज्ञानानुष्ठानलक्षणं निश्चयरत्नत्रयमेवाभेदनयेन निजशुद्धात्मानं मन्यंते ते शिवशब्दवाच्यमोक्षपदाराधका भवंति। आराधकाः संतः किं ध्यायंति। विशुद्धज्ञानदर्शनं स्वशुद्धात्मस्वरूपं निश्चयनयेन ध्यायंति भावयंतीत्यभिप्रायः॥ १५८॥

अथात्मानं गुणस्वरूपं रागादिदोषरहितं ये ध्यायंति ते शीघ्रं नियमेन मोक्षं लभंत इति प्रकटति;—

अप्पा गुणमउ णिम्मलउ, अणुदिणु जे झायंति।
ते पर णियमें परममुणि, लहु णिव्वाणु लहंति॥ १५९॥

आत्मानं गुणमयं निर्मलं अनुदिनं ये ध्यायंति।
ते परं नियमेन परममुनयः लघु निर्वाणं लभंते॥ १५९॥

अप्पा इत्यादि। **अप्पा** आत्मानं कर्मतापन्नं। कथंभूतं। **गुणमउ** गुणमयं केवलज्ञानाद्यनंतगुणनिर्वृत्तं। पुनरपि कथंभूतं। **णिम्मलउ** निर्मलं भावकर्मद्रव्यकर्मनोकर्ममलरहितं **अणुदिणु** दिनं दिनं प्रति अनुदिनमनवरतमित्यर्थः। इत्थंभूतमात्मानं **जे झायंति** ये केचन ध्यायंति **ते पर** ते एव नान्ये **णियमें** निश्चयेन। किं विशिष्टास्ते। **परममुणि** परममुनयः **लहु** लघु शीघ्रं **लहंति** लभंते। किं लभंते। **णिव्वाणु** निर्वाणमिति। अत्राह

यको [**आत्मानं**] आत्मा [**भणंति**] कहते हैं [**ते**] वे [**शिवपदस्य आराधकाः**] शिवपदके आराधक हैं और वे ही [**निजात्मानं**] मोक्षपदके आराधक हुए अपने आत्माको [**ध्यायंति**] ध्यावते हैं। **भावार्थ**—जो कोई वीतराग स्वसंवेदन ज्ञानी सम्यग्दर्शन सम्यग्ज्ञान सम्यक् चारित्ररूप आत्माको मानते हैं वे ही मोक्षपदके आराधक हुए निश्चयनयकर केवल निजरूपको ही ध्यावते हैं॥ १५८॥

आगे अनंत गुणरूप रागादिदोष रहित निज आत्माको ध्यावते हैं वे निश्चयसे शीघ्र ही मोक्षको पाते हैं यह व्याख्यान करते हैं;—[**ये**] जो पुरुष [**गुणमयं**] केवलज्ञानादि अनंत गुणरूप [**निर्मलं**] भाव कर्म द्रव्यकर्म नोकर्म मलरहित निर्मल [**आत्मानं**] आत्माको [**अनुदिनं**] निरंतर [**ध्यायंति**] ध्यावते हैं [**ते परं**] वे ही [**परममुनयः**] परममुनि [**नियमेन**] निश्चयकर [**निर्वाणं**] निर्वाणको [**लघु**]

प्रभाकरभट्टः । अत्रोक्तं भवद्भिः य एव शुद्धात्मध्यानं कुर्वंति त एव मोक्षं लभंते नचान्ये । चारित्रसारादौ पुनर्भणितं द्रव्यपरमाणुं भावपरमाणुं वा ध्यात्वा केवलज्ञानमुत्पादयंतीत्यत्र विषये अस्माकं संदेहोस्ति । अत्र श्रीयोगींद्रदेवाः परिहारमाहुः । तत्र द्रव्यपरमाणुशब्देन द्रव्यसूक्ष्मत्वं भावपरमाणुशब्देन भावसूक्ष्मत्वं ग्राह्यं न च पुद्गलद्रव्यपरमाणुः । तथाचोक्तं सर्वार्थसिद्धिटिप्पणिके । द्रव्यपरमाणुशब्देन द्रव्यसूक्ष्मत्वं भावपरमाणुशब्देन भावसूक्ष्मत्वमिति । तद्यथा । द्रव्यमात्मद्रव्यं तस्य परमाणुशब्देन सूक्ष्मावस्था ग्राह्या । सा च रागादिविकल्पोपाधिरहिता तस्य सूक्ष्मत्वं कथमिति चेत्, निर्विकल्पसमाधिविषयत्वेनेंद्रियमनोविकल्पातीतत्वात् । भावशब्देन स्वसंवेदनपरिणामः तस्य भावस्य परमाणुशब्देन सूक्ष्मावस्था ग्राह्या । सूक्ष्मा कथमिति चेत् । वीतरागनिर्विकल्पसमरसीभावविषयेन पंचेंद्रियमनोविषयातीतत्वादिति । पुनरप्याह । इदं परद्रव्यावलंबनं ध्यानं निषिद्धं किल भवद्भिः निजशुद्धात्मध्यानेनैव मोक्षः कुत्रापि भणितमास्ते । परिहारमाह— "अप्पा झायहि णिम्मलउ" इत्यत्रैव ग्रंथे निरंतरं भणितमास्ते, ग्रंथांतरे च समाधिशतकादौ पुनश्चोक्तं तैरेव पूज्यपादस्वामिभिः । "आत्मानमात्मा आत्मन्येवात्मनासौ क्षणमु-

---

शीघ्र [लभंते] पाते हैं । **भावार्थ**—यह कथन श्रीगुरुने कहा तब प्रभाकरभट्टने पूछा कि हे प्रभो तुमने कहा कि जो शुद्धात्माका ध्यान करते हैं वे ही मोक्षको पाते हैं दूसरा नहीं । तथा चारित्रासारादिक ग्रंथोंमें ऐसा कहा है जो द्रव्यपरमाणू और भावपरमाणूका ध्यानकर केवल ज्ञानको पाते हैं । इस विषयमें मुझको संदेह है । तब श्रीयोगीन्द्रदेव समाधान कहते हैं । द्रव्यपरमाणुसे द्रव्यकी सूक्ष्मता और भावपरमाणूसे भावकी सूक्ष्मता कही गई है । उसमें पुद्गल परमाणूका कथन नहीं है । तत्त्वार्थसूत्रकी सर्वार्थसिद्धि टीकामें भी ऐसा ही कथन है जो द्रव्य परमाणू द्रव्यकी सूक्ष्मता और भावपरमाणू भावकी सूक्ष्मता समझना अन्यद्रव्यका कथन न लेना । यहां निजद्रव्य तथा निजगुणपर्यायका ही कथन है अन्य द्रव्यका प्रयोजन नहीं है । द्रव्य अर्थात् आत्मद्रव्य उसकी सूक्ष्मता वह द्रव्यपरमाणू कहा जाता है । वह रागादि विकल्पकी उपाधि से रहित है उसको सूक्ष्मपना कैसे हो सकता है ऐसा शिष्यने प्रश्न किया । उसका समाधान इस तरह है कि मन और इंद्रीओंके अगोचर होनेसे सूक्ष्म कहा जाता है तथा भाव (स्वसंवेदनपरिणाम) भी परमसूक्ष्म हैं वीतराग निर्विकल्प परमसमरसीभावरूप हैं वहां मन और इंद्रियोंकी गम्य नहीं है इसलिये सूक्ष्म है । ऐसा कथन सुनकर फिर शिष्यने पूछा कि तुमने परद्रव्यके आलंबनरूप ध्यानका निषेध किया और निजशुद्धात्माके ध्यानसे ही मोक्ष कही । ऐसा कथन किसजगह कहा है । उसका समाधान । "अप्पा झायहि णिम्मलउ" निर्मल आत्माको ध्यावो ऐसा कथन इस ग्रंथमें पहले कहा है और समाधिशतकमें भी श्रीपूज्यपादस्वामीने

पजनयन् स स्वयंभूः प्रवृत्तः” अस्यार्थः । आत्मानं कर्मतापन्नं आत्मा कर्ता आत्मन्येवाधिकरणभूते असौ पूर्वोक्तात्मा आत्मना करणभूतेन क्षणमंतर्मुहूर्तमात्रं उपजनयन् निर्विकल्पसमाधिनाराधयन् स स्वयंभूः प्रवृत्तः सर्वज्ञो जात इत्यर्थः । ये च तत्र द्रव्यभावपरमाणुध्येयलक्षणे शुक्लध्याने द्व्यधिकचत्वारिंशद्विकल्पा भणितास्तिष्ठंति ते पुनरनीहितवृत्त्या ग्राह्याः । केन दृष्टांतेनेति चेत् । यथा प्रथमौपशमिकसम्यक्त्वग्रहणकाले परमागमप्रसिद्धानधाप्रवृत्तिकरणादिविकल्पान् जीवः करोति न चात्रेहादि पूर्वकत्वेन स्मरणमस्ति तथात्र शुक्लध्याने चेति । इदमत्र तात्पर्यं । प्राथमिकानां चित्तस्थितिकरणार्थं विषयकषायदुर्ध्यानवंचनार्थं च परंपरया मुक्तिकारणमर्हदादिपरद्रव्यं ध्येयं पश्चात् चित्ते स्थिरे भूते साक्षान्मुक्तिकारणं स्वशुद्धात्मतत्त्वमेव ध्येयं नास्त्येकांतः । एवं साध्यसाधकभावं ज्ञात्वा ध्येयविषये विवादो न कर्तव्यः इति ॥ ॥ १५९ ॥

अथ सामान्यग्राहकं निर्विकल्पं सत्तावलोकदर्शनं कथयति;—

सयलपयत्थहं जं गहणु, जीवहं अग्गिमु होइ ।
वत्थुविसेसविवज्जियउ, तं णियदंसणु जोइ ॥ १६० ॥

सकलपदार्थानां यत् ग्रहणं जीवानां अग्रिमं भवति ।
वस्तुविशेषविवर्जितं तत् निजदर्शनं पश्य ॥ १६० ॥

सयल इत्यादि । **सयलपयत्थहं** सकलपदार्थानां **जं गहणु** यद्ग्रहणमवलोकनं । कस्य ।

कहा है “आत्मानम्” इत्यादि । अर्थात् जीवपदार्थ अपने स्वरूपको अपनेमें ही अपने करके एक क्षणमात्र भी निर्विकल्प समाधिकर आराधता हुआ वह सर्वज्ञवीतराग हो जाता है । जिस शुक्ल ध्यानमें द्रव्य परमाणुकी सूक्ष्मता और भावपरमाणुकी सूक्ष्मता ध्यान करने योग्य है ऐसे शुक्ल ध्यानमें निजवस्तु और निजभावका ही सहारा है पर वस्तुका नहीं । सिद्धांतमें शुक्ल ध्यानके ब्यालीस भेद कहे हैं वे अवांछीक वृत्तिसे गौणरूप जानना मुख्यवृत्तिसे न जानना । उसका दृष्टांत । जैसे उपशमसम्यक्त्वके ग्रहणके समय परमागममें प्रसिद्ध जो अधाकरणादि भेद हैं उनको जीव करता है वे वांछापूर्वक नहीं होते सहजही होते हैं वैसे ही शुक्ल ध्यानमें भी ऐसेही जानना । तात्पर्य यह है कि प्रथम अवस्थामें चित्तके थिर करनेके लिये और विषयकषायरूप खोटे ध्यानके रोकनेके लिये परंपराय मुक्तिके कारणरूप अरहंत आदि पंच परमेष्ठी ध्यान करने योग्य हैं बादमें चित्तके स्थिर होनेपर साक्षात् मुक्तिका कारण जो निज शुद्धात्मतत्त्व है वही ध्यावने योग्य है । इस प्रकार साध्य साधकभावको जानकर ध्यावने योग्य वस्तुमें विवाद नहीं करना पंचपरमेष्ठीका ध्यान साधक है और आत्मध्यान साध्य है यह निःसंदेह जानना ॥ १५९ ॥

आगे सामान्य ग्राहक निर्विकल्प सत्तावलोकन रूप दर्शनको कहते हैं;—[यत्] जो

जीवहं जीवस्य अथवा बहुवचनपक्षे "जीवहं" जीवानां । कथंभूतमवलोकनं । **अग्गिमु** अग्रिमं सविकल्पज्ञानात्पूर्वं **होइ** भवति । पुनरपि कथंभूतं । **वत्थुविसेसविवज्जियउ** वस्तुविशेषविवर्जितं शुक्लमिदमित्यादिविकल्परहितं **तं** तत्पूर्वोक्तलक्षणं **णियदंसणु** निज आत्मा तस्य दर्शनमवलोकनं **जोइ** पश्य जानीहीति । अत्राह प्रभाकरभट्टः । निजात्मा तस्य दर्शनमवलोकनं दर्शनमिति व्याख्यातं भवद्भिरिदं तु सत्तावलोकदर्शनं मिथ्यादृष्टीनामप्यस्ति तेषामपि मोक्षो भवतु । परिहारमाह । चक्षुरचक्षुरवधिकेवलभेदेन चतुर्धा दर्शनं । अत्र चतुष्टयमध्ये मानसमचक्षुर्दर्शनमात्माग्राहकं भवति तच्च मिथ्यात्वादिसप्तप्रकृत्युपशमक्षयोपशमक्षयजनिततत्त्वार्थश्रद्धानलक्षणसम्यक्त्वाभावात् शुद्धात्मतत्त्वमेवोपादेयमिति श्रद्धानाभावे सति तेषां मिथ्यादृष्टीनां न भवत्येवेति भावार्थः ॥ १६० ॥

अथ छद्मस्थानां सत्तावलोकदर्शनपूर्वकं ज्ञानं भवतीति प्रतिपादयति;—

दंसणु पुव्वु हवेइ फुडु, जं जीवहं विण्णाणु ।
वत्थुविसेसु मुणंतु जिय, तं मुणि अविचलु णाणु ॥ १६१ ॥

दर्शनपूर्वं भवति स्फुटं यत् जीवानां विज्ञानं ।
वस्तुविशेषं जानन् जीव तत् मन्यस्व अविचलं ज्ञानं ॥ १६१ ॥

[**जीवानां**] जीवोंके [**अग्रिमं**] ज्ञानके पहले [**सकलपदार्थानां**] सब पदार्थोंका [**वस्तुविवर्जितं**] यह सफेद है इत्यादि भेदरहित [**ग्रहणं**] सामान्यरूप देखना [**तत्**] वह [**निजदर्शनं**] दर्शन है [**पश्य**] उसको तू जान । **भावार्थ**—यहां प्रभाकर भट्ट पूछता है कि आपने जो कहा कि निजात्माका देखना वह दर्शन है ऐसा बहुतवार तुमने कहा है अब सामान्य अवलोकनरूप दर्शन कहते है । ऐसा दर्शन तो मिथ्या दृष्टियोंके भी होता है उनकोभी मोक्ष कहनी चाहिये । उसका समाधान । चक्षुदर्शन अचक्षुदर्शन अवधिदर्शन केवलदर्शन ये दर्शनके चार भेद हैं । इन चारोंमें मनकर जो देखना वह अचक्षुदर्शन है जो आंखोंसे देखना वह चक्षुदर्शन है । इन चारोंमेंसे आत्माका अवलोकन छद्मस्थ अवस्थामें मनसे होता है और वह आत्मदर्शन मिथ्यात्व आदि सातप्रकृतियोंके उपशम क्षयोपशम तथा क्षयसे होता है । सो सम्यग्दृष्टिके तो यह दर्शन तत्त्वार्थ श्रद्धानरूप होनेसे मोक्षका कारण है जिसमें शुद्ध आत्मतत्त्व ही उपादेय है और मिथ्यादृष्टियोंके तत्त्वश्रद्धान नहीं होनेसे आत्माका दर्शन नहीं होता । मिथ्यादृष्टियोंके स्थूलरूप परद्रव्यका देखना जानना मन इंद्रियोंके द्वारा होता है वह सम्यग्दर्शन नहीं है इसलिये मोक्षका कारण भी नहीं है । सारांश यह है कि तत्त्वार्थ श्रद्धानके अभावसे सम्यक्त्वका अभाव है और सम्यक्त्वके अभावसे मोक्षका अभाव है ॥ १६० ॥

दंसणु पुव्वु इत्यादि । **दंसणपुव्वु** सामान्यग्राहकनिर्विकल्पसत्तावलोकदर्शनपूर्वकं **हवेइ** भवति **फुडु** स्फुटं **जं** यत् **जीवहं** जीवानां । किं भवति । **विण्णाणु** विज्ञानं । किं कुर्वन् । सन् । **वत्थुविसेसु मुणंतु** वस्तुविशेषं वर्णसंस्थानादिविकल्पपूर्वकं जानन् **जिय** हे जीव **तं** तत् **मुणि** मन्यस्व जानीहि । किं जानीहि । **अविचलु णाणु** अविचलं संशयविपर्ययानध्यवसायरहितं ज्ञानमिति । तत्रेदं दर्शनपूर्वकं ज्ञानं व्याख्यातं । यद्यपि शुद्धात्मभावनाव्याख्यानकाले प्रस्तुतं न भवति तथापि भणितं भगवता । कस्मादिति चेत् । चक्षुरचक्षुरवधिकेवलभेदेन दर्शनोपयोगश्चतुर्विधो भवति । तत्र चतुष्टयमध्ये द्वितीयं यदचक्षुर्दर्शनं मानसरूपं निर्विकल्पं यथा भव्यजीवस्य दर्शनमोहोपशमक्षयोपशमक्षयलाभे सति शुद्धात्मानुभूतिरुचिरूपं वीतरागसम्यक्त्वं भवति तथैव च शुद्धात्मानुभूतिस्थिरतालक्षणं वीतरागचरित्रं भवति तदा काले तत्पूर्वोक्तं सत्तावलोकलक्षणं मानसं निर्विकल्पदर्शनं कर्तृ पूर्वोक्तनिश्चयसम्यक्त्वचारित्रबलेन निर्विकल्पनिजशुद्धात्मानुभूतिध्यानेन सहकारिकारणं भवति पूर्वोक्तभव्यजीवस्य नचाभव्यस्य । कस्मात् । निश्चयसम्यक्त्वचारित्राभावादिति भावार्थः ॥ १६१ ॥

आगे केवल ज्ञानके पहले छद्मस्थोंके पहले दर्शन होता है उसके वाद ज्ञान होता है और केवली भगवानके दर्शन और ज्ञान एक साथ ही होते हैं आगे पीछे नहीं होते यह कहते हैं;—[**यत्**] जो [**जीवानां**] जीवोंके [**विज्ञानं**] ज्ञान है वह [**स्फुटं**] निश्चयकरके [**दर्शनपूर्वं**] दर्शनके वादमें [**भवति**] होता है [**तत् ज्ञानं**] वह ज्ञान [**वस्तुविशेषं जानन्**] वस्तुकी विस्तीर्णता को जाननेवाला है उस ज्ञानको [**जीव**] हे जीव [**अविचलं**] संशय विमोह विभ्रमसे रहित [**मन्यस्व**] तू जान । **भावार्थ**—जो सामान्यको ग्रहण करै विशेष न जानै वह दर्शन है तथा जो वस्तुका विशेषवर्णन आकार जानै वह ज्ञान है । यह दर्शन ज्ञानका व्याख्यान किया । यद्यपि यह व्यवहार सम्यग्ज्ञान शुद्धात्माकी भावनाके व्याख्यान समय प्रशंसा योग्य नहीं है तौभी प्रथम अवस्थामें प्रशंसा योग्य है ऐसा भगवानने कहा है । क्योंकि चक्षु अचक्षु अवधि केवलके भेदसे दर्शनोपयोग चारतरहका होता है । उन चार भेदोंमें दूसरा भेद अचक्षुदर्शन मन संबंधी निर्विकल्प भव्यजीवोंके दर्शनमोह चारित्रमोहके उपशम क्षयोपशम तथा क्षयके होनेपर शुद्धात्मानुभूति रुचिरूप वीतराग सम्यक्त्व होता है और शुद्धात्मानुभूतिमें स्थिरतारूप वीतराग चारित्र होता है उस समय पूर्वोक्त सत्ताके अवलोकनरूप मनसंबंधी निर्विकल्पदर्शन निश्चयचारित्रके बलसे विकल्परहित निज शुद्धात्मानुभूतिके ध्यानकर सहकारी कारण होता है । इसलिये व्यवहारसम्यग्दर्शन और व्यवहारसम्यग्ज्ञान भव्यजीवके ही होता है अभव्यके सर्वथा नहीं क्योंकि अभव्यजीव मुक्तिका पात्र नहीं है ।

अथ परमध्यानारूढो ज्ञानी समभावेन दुःखं सहमानः स एवाभेदेन निर्जराहेतुर्भण्यते इति दर्शयति;—

दुक्खुवि सुक्खु सहंतु जिय, णाणिउं झाणणिलीणु ।
कम्महं णिज्जरहेउ तउ वुच्चइ संगविहीणु ।। १६२ ।।

दुःखमपि सुखं सहमानः जीव ज्ञानी ध्याननिलीनः ।
कर्मणः निर्जराहेतुः तपः उच्यते संगविहीनः ।। १६२ ।।

दुक्खुवि इत्यादि । **दुक्खुवि सुक्खु सहंतु** दुःखमपि सुखमपि समभावेन सहमानः सन् **जिय** हे जीव । कोसौ कर्ता । **णाणिउ** वीतरागस्वसंवेदनज्ञानी । किंविशिष्टः । **झाणणिलीणु** वीतरागचिदानंदैकाग्र्यध्याननिलीनो रतः स एवाभेदेन **कम्महं णिज्जरहेउ** शुभाशुभकर्मणो निर्जराहेतुरुच्यते न केवलं ध्यानपरिणतपुरुषो निर्जराहेतुरुच्यते **तउ** परद्रव्येच्छानिरोधरूपबाह्याभ्यंतरलक्षणं द्वादशविधं तपश्च । किंविशिष्टः स तपोधनस्तत्तपश्च । **संगविहीणु** संगविहीनो बाह्याभ्यंतरपरिग्रहरहित इति । अत्राह प्रभाकर भट्टः । ध्यानेन निर्जरा भणिता भवद्भिः उत्तमसंहननस्यैकाग्रचिंतानिरोधो ध्यानमिति ध्यानलक्षणं

जो मुक्तिका पात्र होता है उसीके व्यवहार रत्नत्रयकी प्राप्ति होती है । व्यवहार रत्नत्रय है वह परंपराय मोक्षका कारण है और निश्चयरत्नत्रय साक्षात् मुक्तिका कारण है ऐसा तात्पर्य हुआ ।। १६१ ।।

आगे परमध्यानमें आरूढ ज्ञानी जीव समभावसे दुःख सुखको सहता हुआ अभेदनयसे निर्जराका कारण होता है ऐसा दिखाते हैं;—[**जीव**] हे जीव [**ज्ञानी**] वीतरागस्वसंवेदनज्ञानी [**ध्याननिलीनः**] आत्मध्यानमें लीन [**दुःखं अपि सुखं**] दुःख और सुखको [**सहमानः**] समभावोंसे सहता हुआ अभेद नयसे [**कर्मणो निर्जराहेतुः**] शुभ अशुभ कर्मोंकी निर्जराका कारण है ऐसा भगवानने [**उच्यते**] कहा है और [**संगविहीनः तपः**] बाह्य आभ्यंतर परिग्रह रहित परद्रव्यकी इच्छाके निरोधरूप बाह्य अभ्यंतर अनशनादि बारह प्रकारके तपरूप भी वह ज्ञानी है । **भावार्थ**—यहां प्रभाकर भट्टने प्रश्न किया कि हे प्रभो आपने ध्यानसे निर्जरा कही वह ध्यान एकाग्र चित्तका निरोधरूप उत्तमसंहननवाले मुनिके होता है जहां उत्तमसंहननही नहीं है वहां ध्यान किस तरहसे हो सकता है । उसका समाधान श्रीगुरु कहते हैं । उत्तमसंहननवाले मुनिके जो ध्यान कहा है वह आठवें गुणस्थानसे लेकर उपशम क्षपक श्रेणीवालोंके जो शुक्लध्यान होता है उसकी अपेक्षा कहा गया है । उपशमश्रेणी वज्रऋषभनाराच वज्रनाराच नाराच इन तीन संहननवालोंके होती है उनके शुक्लध्यानका पहला पाया है वे ग्यारवें गुणस्थानसे नीचे आते हैं और क्षपक श्रेणी एक वज्रवृषभनाराच संहननवालेके ही होती है वे आठवें

उत्तमसंहननाभावे कथं ध्यानमिति । भगवानाह । उत्तमसंहनेन यद्ध्यानं भणितं तदपूर्वगुणस्थानादिषूपशमक्षपकश्रेण्योर्यत् शुक्लध्यानं तदपेक्षया भणितम् अपूर्वगुणस्थानादधस्तनगुणस्थानेषु धर्मध्यानस्य निषेधकं न भवति । तथाचोक्तं तत्त्वानुशासने ध्यानग्रंथे । "यत्पुनर्वज्रकायस्य ध्यानमित्यागमे वचः । श्रेण्योर्ध्यानं प्रतीत्योक्तं तन्नाधस्तान्निषेधकं" । किं च । रागद्वेषाभावलक्षणं परमं यथाख्यातरूपं स्वरूपे चरणं निश्चयचारित्रं भणंति इदानीं तदभावेन्यच्चारित्रमाचरंतु तपोधनाः । तथाचोक्तं तत्रेदं । "चरितारो न संत्यद्य यथाख्यातस्य संप्रति । तत्किमन्ये यथाशक्तिमाचरंतु तपस्विनः" । पुनश्चोक्तं श्रीकुंदकुंदाचार्यदेवैः मोक्षप्राभृते । "अज्जवि तिरयणसुद्धा अप्पा झाऊण लहहि इंदत्तं । लोयंतियदेवत्तं तत्थ चुदा

गुणस्थानमें क्षपक श्रेणी मांडते (प्रारंभ करते) हैं उनके आठवें गुणस्थानमें शुक्लध्यानका पहला पाया (भेद) होता है वह आठवें नवमें दशवें तथा दशवेंसे बारवें गुणस्थानमें स्पर्श करते हैं ग्यारवेंमें नहीं तथा बारवेंमें शुक्लध्यानका दूसरा पाया होता है उसके प्रसादसे केवलज्ञान पाता है और उसी भवमें मोक्ष को जाता है । इसलिये उत्तमसंहननका कथन शुक्लध्यानकी अपेक्षा है । आठवें गुणस्थानसे नीचेके चौथेसे लेकर सातवें तक शुक्लध्यान नहीं होता धर्मध्यान ही है वह धर्मध्यान छहों संहननवालोंके है श्रेणीके नीचे धर्मध्यान ही है उसका निषेध किसी संहननमें नहीं है । ऐसा ही कथन तत्त्वानुशासन नामा ग्रंथमें कहा है "यत्पुनः" इत्यादि । उसका अर्थ ऐसा है कि जो वज्रकायके ही ध्यान होता है ऐसा आगममें वचन कहा है वह दोनों श्रेणियोंमें शुक्लध्यान होनेकी अपेक्षा है और श्रेणीके नीचे जो धर्मध्यान है उसका निषेध (न होना) किसी संहननमें नहीं कहा है यह निश्चयसे जानना । रागद्वेषके अभावरूप उत्कृष्ट यथाख्यातस्वरूप स्वरूपाचरण निश्चय चारित्र है वह इस समय पंचमकालमें भरतक्षेत्रमें नहीं है इसलिये साधुजन अन्य चारित्रको आचरण करौ । चारित्रके पांच भेद हैं सामायिक छेदोपस्थापना परिहारविशुद्धि सूक्ष्मसांपराय यथाख्यात । उनमें इस समय इस क्षेत्रमें सामायिक छेदोपस्थापना ये दोही चारित्र होते हैं अन्य नहीं इसलिये इनको ही आचरौ । तत्त्वानुशासनमें भी कहा है "चारितारो इत्यादि । इसका अर्थ ऐसा है कि इस समय यथाख्यात चारित्रके आचरण करनेवाले मौजूद नहीं है तो क्या हुआ अपनी शक्तिके अनुसार तपस्वीजन सामायिक छेदोपस्थापनाका आचरण करौ । फिर श्रीकुंदकुंदाचार्यने भी मोक्षपाहुड़में ऐसा ही कहा है "अज्जवि" इत्यादि । उसका तात्पर्य यह है कि अब भी इस पंचमकालमें मन वचन कायकी शुद्धतासे आत्माका ध्यान करके यह जीव इंद्र पदको पाता है अथवा लौकांतिकदेव होता है और वहांसे च्युत होकर मनुष्य भव धारण करके मोक्षको पाता है । अर्थात् जो इस समय पहलेके तीन संहनन तो नहीं हैं

णिव्वुदिं जंति" । अयमत्र भावार्थः । यथादित्रिकसंहननलक्षणवीतरागयथाख्यातचारित्राभावेपीदानीं शेषसंहननेनापि संसारस्थितिछेदकारणं परंपरया मुक्तिकारणं च धर्मध्यानमाचरंतीति ॥ १६२ ॥

अथ सुखदुःखं सहमानः सन् येन कारणेन समभावं करोति मुनिस्तेन कारणेन पुण्यपापद्वयं संवरहेतुर्भवतीति दर्शयति;—

विण्णिवि जेण सहंतु मुणि, मणि समभाउ करेइ ।
पुण्णहं पावहं तेण जिय, संवरहेउ हवेइ ॥ १६३ ॥

द्वे अपि येन सहमानः मुनिः मनसि समभावं करोति ।
पुण्यस्य पापस्य तेन जीव संवरहेतुः भवति ॥ १६३ ॥

विण्णिवि इत्यादि । **विण्णिवि** द्वे अपि सुखदुःखे **जेण** येन कारणेन **सहंतु** सहमानः सन् । कोसौ कर्ता । **मुणि** मुनिः स्वसंवेदनप्रत्यक्षज्ञानी **मणि** अविक्षिप्तमनसि **समभाउ** समभावं सहजशुद्धज्ञानानंदैकरूपं रागद्वेषमोहरहितं परिणामं कर्मतापन्नं **करेइ** करोति परिणमति **पुण्णहं पावहं** पुण्यस्य पापस्य संबंधी **तेण** तेन कारणेन **जिय** हे जीव **संवरहेउ** संवरहेतुः कारणं **हवेइ** भवतीति । अयमत्र तात्पर्यार्थः । कर्मोदयवशात् सुखदुःखे

परंतु अर्धनाराच कीलक सृपाटिका ये आगेके तीन हैं इन तीनोंसे सामायिक छेदोपस्थापनाका आचरण करो तथा धर्मध्यानको आचरो । धर्मध्यानका अभाव छहों संहननोंमें नहीं है शुक्लध्यान पहलेके तीन संहननोंमें ही होता है उनमें भी पहला पाया (भेद) उपशम श्रेणीसंबंधी तीनों संहननोंमें है और दूसरा तीसरा चौथा पाया प्रथमसंहननवाले हीके होता है ऐसा नियम है । इसलिये अब शुक्लध्यानके अभावमें भी हीन संहननवाले इस धर्मध्यानको आचरो । यह धर्मध्यान परंपराय मुक्तिका मार्ग है संसारकी स्थितिका छेदनेवाला है । जो कोई नास्तिक इस समय धर्मध्यानका अभाव मानते हैं वे झूठ बोलनेवाले हैं इस समय धर्मध्यान है शुक्लध्यान नहीं है ॥ १६२ ॥

आगे जो मुनिराज सुखदुःखको सहते हुए समभाव रखते हैं अर्थात् सुखमें तो हर्ष नहीं करते और दुःखमें खेद नहीं करते जिनके सुख दुःख दोनों ही समान हैं वे ही साधु पुन्यकर्म पापकर्मके संवर (रोकने) के कारण हैं आनेवाले कर्मोंको रोकते हैं ऐसा दिखलाते हैं;—[**येन**] जिस कारण [**द्वे अपि सहमानः**] सुख दुःख दोनों को ही सहता हुआ [**मुनिः**] स्वसंवेदनप्रत्यक्षज्ञानी [**मनसि**] निश्चित मनमें [**समभावं**] समभावोंको [**करोति**] धारण करता है अर्थात् रागद्वेषमोहरहित स्वाभाविक शुद्धज्ञानानंद स्वरूप परिणमन करता है विभाव रूप नहीं परिणमता [**तेन**] इसी कारण [**हे जीव**] हे जीव वह मुनि [**पुण्यस्य पापस्य संवरहेतुः**] सहजमें ही पुण्य और पाप इन दोनोंके

जातेपि योसौ रागादिरहितमनसि विशुद्धज्ञानदर्शनस्वभावनिजशुद्धात्मसंवित्तिं न त्यजति स पुरुष एवाभेदनयेन द्रव्यभावरूपपुण्यपापसंवरस्य हेतुः कारणं भवतीति ॥ १६३ ॥

अथ यावंतं कालं रागादिरहितपरिणामेन स्वशुद्धात्मस्वरूपे तन्मयो भूत्वा तिष्ठति तावंतं कालं संवरनिर्जरां करोतीति प्रतिपादयति;—

अत्थइ जित्तिउ कालु मुणि, अप्पसरूवि णिलीणु ।
संवरणिज्जर जाणि तुहुं, सयलविअप्पविहीणु ॥ १६४ ॥

तिष्ठति यावंतं कालं मुनिः आत्मस्वरूपे निलीनः ।
संवरनिर्जरां जानीहि त्वं सकलविकल्पविहीनं ॥ १६४ ॥

अत्थइ इत्यादि । **अत्थइ** तिष्ठति । किंकृत्वा तिष्ठति । **जित्तिउ कालु** यावंतं कालं प्राप्य । क्व तिष्ठति । **अप्पसरूवि** निजशुद्धात्मस्वरूपे । कथंभूतः सन् । **णिलीणु** निश्चयेन लीनो द्रवीभूतो वीतरागनित्यानंदैकपरमसमरसीभावेन परिणतः हे प्रभाकर इत्थंभूतपरिणामपरिणतं तपोधनमेवाभेदेन **संवरणिज्जर जाणि तुहुं** संवरनिर्जरास्वरूपं जानीहि त्वं । पुनरपि कथंभूतं । **सयलवियप्पविहीणु** सकलविकल्पहीनं ख्यातिपूजालाभप्रभृतिविकल्पजालावलीरहितमिति । अत्र विशेषव्याख्यानं यदेव पूर्वसूत्रद्वयभणितं तदेव ज्ञातव्यं । कस्मात् । तस्यैव निर्जरासंवरव्याख्यानस्योपसंहारोयमित्यभिप्रायः ॥ १६४ ॥ एवं मोक्षमोक्षमार्गमोक्षफलादिप्रतिपादकद्वितीयमहाधिकारोक्तसूत्राष्टकेनाभेदरत्नत्रयव्याख्या-

---

संवरका कारण [**भवति**] होता है । **भावार्थ**—कर्मके उदयसे सुख दुःख उत्पन्न होनेपर भी जो मुनीश्वर रागादिरहितमनमें शुद्ध ज्ञान दर्शनस्वरूप अपने निज शुद्धस्वरूपको नहीं छोड़ता है वही पुरुष अभेदनयकर द्रव्य भावरूप पुण्य पापके संवरका कारण है ॥१६३॥

आगे जिस समय जितने काल तक रागादि रहित परिणामोंकर निज शुद्धात्मस्वरूपमें तन्मय हुआ ठहरता है तब तक संवर और निर्जराको करता है ऐसा कहते हैं;—[**मुनिः**] मुनिराज [**यावंतं कालं**] जब तक [**आत्मस्वरूपे निलीनः**] आत्मस्वरूपमें लीन हुआ [**तिष्ठति**] रहता है अर्थात् वीतराग नित्यानंद परम समरसीभावकर परिणमता हुआ अपने स्वभावमें तल्लीन होता है, उस समय हे प्रभाकर भट्ट [**त्वं**] तू [**सकलविकल्पविहीनं**] समस्त विकल्पसमूहोंसे रहित अर्थात् ख्याति (अपनी बड़ाई) पूजा (अपनी प्रतिष्ठा) लाभको आदि देकर विकल्पोंसे रहित उस मुनिको [**संवरनिर्जरां**] संवर निर्जरा स्वरूप [**जानीहि**] जान । यहांपर भावार्थरूप विशेष व्याख्यान जोकि पहले दो सूत्रोंमें कहा था वही जानो । इस प्रकार संवर निर्जराका व्याख्यान संक्षेपरूप कहा गया है ॥ १६४ ॥ इस तरह मोक्ष मोक्षमार्ग और मोक्षफलका निरूपण करनेवाले दूसरे

नमुख्यत्वेन स्थलं समाप्तं । अत ऊर्ध्वं चतुर्दशसूत्रपर्यंतं परमोपशमभावमुख्यत्वेन व्याख्यानं करोति ।

तथाहि;—

कम्मु पुरक्किउ सो खवइ, अहिणव पेसु ण देइ ।
संगु मुएविणु जो सयलु, उवसमभाउ करेइ ॥ १६५ ॥

कर्म पुराकृतं स क्षपयति अभिनवं प्रवेशं न ददाति ।
संगं मुक्त्वा यः सकलं उपशमभावं करोति ॥ १६५ ॥

कम्मु इत्यादि । **कम्मु पुरक्किउ** कर्म पुराकृतं **सो खवइ** स एव वीतरागस्वसंवेदनतत्त्वज्ञानी क्षपयति । पुनरपि किं करोति । **अहिणव पेसु ण देइ** अभिनव कर्म प्रवेशं न ददाति । स कः । **संगु मुएविणु जो सयलु** संगं बाह्याभ्यंतरपरिग्रहं मुक्त्वा यः कर्ता समस्तं । पश्चात्किं करोति । **उवसमभाउ करेइ** जीवितमरणलाभालाभसुखदुःखादिसमताभावलक्षणसमभावं करोति । तद्यथा । स एव पुराकृतकर्म क्षपयति नवतरं संवृणोति य एव बाह्याभ्यंतरपरिग्रहं मुक्त्वा सर्वशास्त्रं पठित्वा च शास्त्रफलभूतं वीतरागपरमानंदैकसुखरसास्वादरूपं समभावं करोतीति भावार्थः । तथा चोक्तं । "साम्यमेवादराद्भाव्यं किमन्यैर्ग्रंथविस्तरैः । प्रक्रियामात्रमेवेदं वाङ्मयं विश्वमस्य हि" ॥ १६५ ॥

महाधिकारमें आठ दोहा सूत्रोंसे अभेदरत्नत्रयके व्याख्यानकी मुख्यतासे अंतरस्थल पूरा हुआ ।

आगे चौदह दोहा तक परम उपशम भावकी मुख्यतासे व्याख्यान करते हैं;— [**स एव**] वही वीतराग स्वसंवेदन ज्ञानी [**पुराकृतं कर्म**] पूर्व उपार्जित कर्मोंको [**क्षपयति**] क्षय करता है और [**अभिनवं**] नवे कर्मोंको [**प्रवेशं**] प्रवेश [**न ददाति**] नहीं होने देता [**यः**] जो कि [**सकलं**] सब [**संगं**] बाह्य अभ्यंतर परिग्रहको [**मुक्त्वा**] छोडकर [**उपशमभावं**] परम शांत भावको [**करोति**] करता है अर्थात् जीवन मरण लाभ अलाभ सुख दुःख शत्रु मित्र तृण कंचन इत्यादि वस्तुओंमें एकसा परिणाम रखता है । **भावार्थ—**जो मुनिराज सकल परिग्रहको छोड़कर सब शास्त्रोंका रहस्य जानके वीतराग परमानंद सुखरसका आस्वादी हुआ समभाव करता है वही साधु पूर्वके कर्मोंका क्षय करता है और नवीन कर्मोंको रोकता है । ऐसा ही कथन पद्मनंदि पचीसीमें भी कहा है । "साम्यमेव" इत्यादि । इसका तात्पर्य यह है कि आदरसे समभावको ही धारण करना चाहिये अन्य ग्रंथके विस्तारोंसे क्या, समस्त पंथ तथा सकल द्वादशांग इस समभावरूप सूत्रकी ही टीका है ॥ १६५ ॥

अथ यः समभावं करोति तस्यैव निश्चयेन सम्यग्दर्शनज्ञानचारित्राणि नान्यस्येति दर्शयति;—

दंसणु णाणु चरित्तु तसु जो समभाउ करेइ ।
इयरहं एक्कुवि अत्थि णवि, जिणवरु एउ भणेइ ॥ १६६ ॥

दर्शनं ज्ञानं चारित्रं तस्य यः समभावं करोति ।
इतरस्य एकमपि अस्ति नैव जिनवरः एवं भणति ॥ १६६ ॥

दंसणु इत्यादि । **दंसणु णाणु चरित्तु** सम्यग्दर्शनज्ञानचरित्रत्रयं **तसु** निश्चयनयेन तस्यैव भवति । कस्य । **जो समभाउ करेइ** यः कर्ता समभावं करोति **इयरहं** इतरस्य समभावरहितस्य **एक्कुवि अत्थि णवि** रत्नत्रयमध्ये नास्त्येकमपि **जिणवरु एउ भणेइ** जिनवरो वीतरागः सर्वज्ञ एवं भणतीति । तथाहि । निश्चयनयेन निजशुद्धात्मैवोपादेय इति रुचिरूपं सम्यग्दर्शनं तस्यैव निजशुद्धात्मसंवित्तिसमुत्पन्नवीतरागपरमानंदमधुररसास्वादोयमात्मा निरंतराकुलत्वोत्पादकत्वात् कटुकरसास्वादाः कामक्रोधादय इति भेदज्ञानं तस्यैव भवति स्वरूपे चरणं चारित्रमिति वीतरागचारित्रं तस्यैव भवति । तस्य कस्य । वीतरागनिर्विकल्पपरमसामायिकभावनानुकूलं निर्दोषिपरमात्मसम्यक्श्रद्धानज्ञानानुचरणरूपं यः समभावं करोतीति भावार्थः ॥ १६६ ॥

अथ यदा ज्ञानी जीव उपशाम्यति तदा संयतो भवति कामक्रोधादिकषायसंगतः पुनरसंयतो भवतीति निश्चिनोति;—

आगे जो जीव समभावको करता है उसीके निश्चयसे सम्यग्दर्शन सम्यग्ज्ञान सम्यक् चारित्र होते हैं अन्यके नहीं ऐसा दिखलाते हैं;—[**दर्शनं ज्ञानं चारित्रं**] सम्यग्दर्शन ज्ञान चारित्र [**तस्य**] उसीके निश्चयसे होते हैं [**यः**] जो यति [**समभावं**] समभाव [**करोति**] करता है [**इतरस्य**] दूसरे समभाव रहित जीवके [**एकं अपि**] तीन रत्नोंमेंसे एक भी [**नैव अस्ति**] नहीं है [**एवं**] इस प्रकार [**जिनवरः**] जिनेन्द्रदेव [**भणति**] कहते हैं । **भावार्थ**—निश्चय नयसे निजशुद्धात्मा ही उपादेय है ऐसी रुचिरूप सम्यग्दर्शन उस समभावके धारकके होता है । और निजशुद्धात्माकी भावनासे उत्पन्न हुआ जो वीतराग परमानंद मधुररसका आस्वाद उस स्वरूप आत्मा है तथा हमेशा आकुलताके उपजाने वाले काम क्रोधादिक हैं वे महा कटुकरसरूप अत्यंत विरस हैं ऐसा जानना वह सम्यग्ज्ञान और स्वरूपके आचरणरूप वीतराग चारित्र भी उसी समभावके धारण करनेवालेके ही होता है जो मुनीश्वर वीतराग निर्विकल्प परम सामायिक भावकी भावनाके अनुकूल (सन्मुख) निर्दोष परमात्माके यथार्थ श्रद्धान यथार्थ ज्ञान और स्वरूपका यथार्थ आचरणरूप अखंड भाव धारण करता है उसीके परमसमाधिकी सिद्धि होती है ॥ १६६ ॥

जावइ णाणिउं उवसमइं, तामइं संजदु होइ ।
होइ कसायहं वसिगयउ, जीउ असंजदु सोइ ॥ १६७ ॥

यदा ज्ञानी उपशाम्यति तदा संयतो भवति ।
भवति कषायानां वशंगतः जीवः असंयतः स एव ॥ १६७ ॥

जांवइ इत्यादि । **जांवइ** यदा काले **णाणिउ** ज्ञानी जीवः **उवसमइ** उपशाम्यति **तामइ** तदा काले **संजदु होइ** संयतो भवति। **होइ** भवति **कसायहं वसिगयउ** कषायवशगतः **जीउ** जीवः । कथंभूतो भवति । **असंजदु** असंयतः । कोसौ । **सोइ** स एव पूर्वोक्तजीव इति । अयमत्र भावार्थः । अनाकुलत्वलक्षणस्य स्वशुद्धात्मभावनोत्थपारमार्थिकसुखस्यानुकूलपरमोपशमो यदा ज्ञानी तिष्ठति तदा संयतो भवति तद्विपरीतं परमात्माकुलत्वोत्पादककामक्रोधादौ परिणतः पुनरसंयतो भवतीति । तथा चोक्तं । "अकसायं तु चरित्तं कसायवसगद असंजदो होदि । उपसमइ जम्हि काले तक्काले संजदो होदि" ॥ १६७ ॥

अथ येन कषाया भवंति मनसि तं मोहं त्यजेति प्रतिपादयति;—

जेण कसाय हवंति मणि, सो जिय मिल्लहि मोहु ।
मोहकसायविवज्जियउ, पर पावहिं समबोहु ॥ १६८ ॥

येन कषाया भवंति मनसि तं जीव मुंच मोहम् ।
मोहकषायविवर्जितः परं प्राप्नोषि समबोधम् ॥ १६८ ॥

घर वासउ इत्यादि । **घरवासउ** गृहवासं अत्र गृहशब्देन वासमुख्यभूता स्त्री ग्राह्या । तथाचोक्तं । "न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते" । **मा जाणि जिय** हे जीव त्वमात्महितं मा जानीहि । कथंभूतो गृहवासः । **दुक्कियवासउ एहु** समस्तदुःकृतानां पापानां वासः स्थानमेषः **पासु कयंतें मंडियउ** अज्ञानिजीवबंधनार्थं पासो मंडितः । केन । कृतांतनाम्ना कर्मणा । कथंभूतं । **अविचलु** शुद्धात्मतत्त्वभावनाप्रतिपक्षभूतेन मोहबंधनेनाबंधत्वादचलः **णिस्संदेहु** संदेहो न कर्तव्य इति । अयमत्र भावार्थः । विशुद्धज्ञानदर्शनस्वभावपरमात्मपदार्थभावनाप्रतिपक्षभूतैः कषायेन्द्रियैः व्याकुलीक्रियते मनः मनःशुद्ध्यभावे गृहस्थानां तपोधनवत् शुद्धात्मभावना कर्तुं नायातीति । तथा चोक्तं । "कषायैरिंद्रियैर्दुष्टैः व्याकुलीक्रियते मनः । यतः कर्तुं न शक्येत भावना गृहमेधिभिः" ॥ २७५ ॥

आगे शुद्धात्मज्ञानका साधक जो तपश्चरण उसके शत्रुरूप गृहवासको दोष देते हैं;—[**जीव**] हे जीव तू इसको [**गृहवासं**] घर वास [**मा जानीहि**] मत जाने [**एषः**] यह [**दुष्कृतवासः**] पापका निवासस्थान है [**कृतांतेन**] यमराजने (कालने) अज्ञानी जीवोंको बांधनेकेलिये यह [**पाशः मंडितः**] अनेक फांसोंसे मंडित [**अविचलं**] बहुत मजबूत बंदीखाना बनाया है इसमें [**निस्संदेहं**] संदेह नहीं है । **भावार्थ**—यहां घर शब्दसे मुख्यरूप स्त्री जानना स्त्री ही घरका मूल है स्त्री विना गृह वास नहीं कहलाता । ऐसा ही दूसरे शास्त्रोंमें भी कहा है कि घरको घर मत जानो स्त्री ही घर है जिन पुरुषोंने स्त्रीका त्याग किया उन्होंने घरका त्याग किया । यह घर मोहके बंधनकर अति दृढ बंधा हुआ है इसमें संदेह नहीं है । यहां तात्पर्य ऐसा है कि शुद्धात्म ज्ञान दर्शन शुद्ध भावरूप जो परमात्म पदार्थ उसकी भावनासे विमुख जो विषय कषाय हैं उनसे यह मन व्याकुल होता है । इसलिये मनकी शुद्धिके विना गृहस्थके यतीकी तरह शुद्धात्माका ध्यान नहीं होता । इसकारण घरका त्याग करना योग्य है घरके विना त्यागे मन शुद्ध नहीं होता । ऐसा दूसरी जगह भी कहा है कि कषायोंसे और इन दुष्ट इंद्रियोंसे मन व्याकुल होता है इसलिये गृहस्थ लोग आत्मभावना कर नहीं सकते ॥ २७५ ॥

अथ गृहममत्वत्यागानंतरं देहममत्वत्यागं दर्शयति;—

देहुवि जित्थु ण अप्पणउ, तहिं अप्पणउ किं अण्णु ।
परकारणि मण गुरुव तुहुं, सिवसंगमु अवगण्णु ॥ २७६ ॥

देहोपि यत्र नात्मीयः तत्रात्मीयः किमन्ये ।
परकारणे मा मुह्य त्वं शिवसंगमं अवगण्य ॥ २७६ ॥

देहुवि इत्यादि । **देहुवि जित्थु ण अप्पणउं** देहोपि यत्र नात्मीयः **तहिं अप्पणउ किं अण्णु** तत्रात्मीयः किमन्ये पदार्था भवंति किं तु नैव । एवं ज्ञात्वा **परकारणि** परस्य देहस्य बहिर्भूतस्य स्त्रीवस्त्राभरणोपकरणादिपरिग्रहनिमित्तेन **मण गुरुव तुहुं सिवसंगमु अवगण्णु** हे तपोधन शिवशब्दवाच्यशुद्धात्मभावनात्यागं मा कार्षीरिति । तथाहि । अमूर्तेन वीतरागस्वभावेन निजशुद्धात्मना सह व्यवहारेण क्षीरनीरवदेकीभूत्वा तिष्ठति योसौ देहः सोपि जीवस्वरूपं न भवति इति ज्ञात्वा बहिःपदार्थे ममत्वं त्यक्त्वा शुद्धात्मानुभूतिलक्षण-वीतरागनिर्विकल्पसमाधौ स्थित्वा च सर्वतात्पर्येण भावना कर्तव्येत्यभिप्रायः ॥ २७६ ॥

अथ तमेवार्थं पुनरपि प्रकारांतरेण व्यक्तिं करोति;—

करि सिवसंगमु एक्कु पर, जहिं पाविज्जइ सुक्खु ।
जोइय अण्णु म चिंति तुहुं, जेण ण लब्भइ मुक्खु ॥ २७७ ॥

कुरु शिवसंगमं एकं परं यत्र प्राप्यते सुखं ।
योगिन् अन्यं मा चिंतय त्वं येन न लभ्यते मोक्षः ॥ २७७ ॥

करि इत्यादि । **करि** कुरु । कं । **सिवसंगमु** शिवशब्दवाच्यशुद्धबुद्धैकस्वभावनिजशु-

---

आगे घरकी ममता छुड़ाकर शरीरका ममत्व छुड़ाते हैं;—[**यत्र**] जिस संसारमें [**देहोपि**] शरीर भी [**आत्मीयः न**] अपना नहीं है [**तत्र**] उसमें [**अन्ये**] अन्य [**आत्मीयः किं**] कौंन अपना होसकता है [**त्वं**] इसकारण तू [**शिवसंगमं**] मोक्षका संगम [**अवगण्य**] छोड़कर [**परकारणे**] पुत्र स्त्री वस्त्र आभूषण आदि उपकरणोंमें [**मा मुह्य**] ममत्व मत कर । **भावार्थ**—अमूर्त वीतराग भावरूप जो निजशुद्धात्मा उससे व्यवहार नयकर दूधपानीकी तरह यह देह एकमेक हो रहा है ऐसा देह, जीवका स्वरूप नहीं है तो पुत्र कलत्रादि धन धान्यादि अपने किस तरह हो सकेंगे । ऐसा जानकर बाह्यपदार्थोंमें ममता छोडकर शुद्धात्माकी अनुभूतिरूप जो वीतराग निर्विकल्प समाधि उसमें ठहर कर सब प्रकारसे शुद्धोपयोगकी भावना करनी चाहिये ॥ २७६ ॥

आगे इसी अर्थको फिर भी दूसरी तरह प्रगट करते हैं;—[**योगिन्**] हे योगी हंस [**त्वं**] तू [**एकं शिवसंगमं**] एक निजशुद्धात्माकी ही भावना [**परं**] केवल

द्धात्मभावनासंसर्गं **एक्कु पर** तमेवैकं **जहिं पाविज्जइ सोक्खु** यत्र स्वशुद्धात्मसंसर्गे प्राप्यते। किं। अक्षयानंतसुखं **जोइय अण्णु म चिंति तुहुं** हे योगिन् स्वभावत्वादन्यचिंतां मा कार्षीस्त्वं **जेण ण लब्भइ** येन कारणेन बहिश्चिंतया न लभ्यते । कोसौ। **मुक्खु** अव्याबाधसुखादिलक्षणो मोक्ष इति तात्पर्यं ॥ २७७ ॥

अथ भेदाभेदरत्नत्रयभावनारहितं मनुष्यजन्म निस्सारमिति निश्चिनोति;—

बलि किउ माणुसजम्मडा, देक्खंतहं पर सारु ।
जइ उट्टब्भइ तो कुहइ, अह डज्झइ तो छारु ॥ २७८ ॥

बलिः क्रियते मनुष्यजन्म पश्यतां परं सारं ।
यदि अवष्टभ्यते ततः कुत्सयते अथ दह्यते तर्हि क्षारः ॥ २७८ ॥

बलि किउ इत्यादि । **बलि किउ** बलिः क्रियते मस्तकस्योपरितनभागेनावतारणं क्रियते। किं। **माणुसजम्मडा** मनुष्यजन्म । किं विशिष्टं । **देखंतहं पर सारु** बहिर्भागे व्यवहारेण पश्यतामेव सारभूतं । कस्मात् । **जइ उट्टब्भइ तो कुहइ** यद्यवष्टभ्यते भूमौ निक्षिप्यते ततः कुत्सितरूपेण परिणमति अह **डज्झइ तो छारु** अथवा दह्यते तर्हि भस्म भवति । तद्यथा। हस्तिशरीरे दंताश्चमरीशरीरे केशा इत्यादि सारत्वं तिर्यक् शरीरे दृश्यते, मनुष्यशरीरे किमपि सारत्वं नास्तीति ज्ञात्वा घुणभक्षितेक्षुदंडवत्परलोकबीजं कृत्वा निस्सारमपि सारं क्रियते। कथमिति चेत् । यथा घुणभक्षितेक्षुदंडे वीते कृते सति विशिष्टेक्षूणां

[**कुरु**] कर [**यत्र**] जिसमें कि [**सुखं प्राप्येत**] अतींद्रिय सुख पावै [**अन्यं मा**] अन्य कुछ भी मत [**चिंतय**] चिंतवन कर [**येन**] जिससे कि [**मोक्षः न लभ्यते**] मोक्ष न मिले । **भावार्थ**—हे जीव तू शुद्धबुद्ध अखंड स्वभाव निज शुद्धात्माका चिंतवन कर यदि तू शिवसंग करेगा तो अतींद्रिय सुख पायेगा । जो अनंतसुखको प्राप्त हुए वे केवल आत्मध्यानसे ही प्राप्त हुए दूसरा कोई उपाय नहीं है । इसलिये हे योगी तू अन्य कुछ भी चिंतवन मत कर परके चिंतवनसे अव्याबाध अनंतसुखरूप मोक्षको नहीं पावेगा इसलिये निज स्वरूपका ही चिंतन कर ॥ २७७ ॥

आगे भेदाभेद रत्नत्रयकी भावनासे रहित जीवका मनुष्यजन्म निष्फल है ऐसा कहते हैं;—[**मनुष्यजन्म**] इस मनुष्यजन्मको [**बलिः क्रियते**] मस्तकके ऊपर वार डालो जो कि [**पश्यतां परं सारं**] देखनेमें केवल सार दीखता है [**यदि अवष्टभ्यते**] जो इस मनुष्यदेहको भूमिमें गाढ दिया जावे [**ततः**] तो [**कुत्सयते**] सड़कर दुर्गंधरूप परिणवे [**अथ**] और जो [**दह्यते**] जलाइये [**तर्हि**] तो [**क्षारः**] राख हो जाता है । **भावार्थ**—इस मनुष्यकदेहको व्यवहार नयसे बाहरसे देखो तो सार मालूम

लाभो भवति तथा निःसारशरीराधारेण वीतरागसहजानंदैकस्वशुद्धात्मस्वभावसम्यक्श्रद्धानज्ञानानुचरणरूपनिश्चयरत्नत्रयभावनाबलेन तत्साधकव्यवहाररत्नत्रयभावनाबलेन स्वर्गापवर्गफलं गृह्यत इति तात्पर्यं ॥ २७८ ॥

अथ देहस्याशुचित्वानित्यत्वादिप्रतिपादनरूपेण व्याख्यानं करोति षट्कलेन तथाहि;—

उव्वलि चोप्पडि चिट्ठ करि, देहि सुमिट्ठाहार ।
देहहं सयल णिरत्थ गय, जिमु दुज्जणि उवयार ॥ २७९ ॥

उद्वर्तय म्रक्षय चेष्टां कुरु देहि सुमृष्टाहारान् ।
देहस्य सकलं निरर्था गताः यथा दुर्जने उपकाराः ॥ २७९ ॥

उव्वलि इत्यादि पदखंडनारूपेण व्याख्यानं क्रियते । **उव्वलि** उद्वर्तनं कुरु **चोप्पडि** तैलादिम्रक्षणं कुरु **चिट्ठ करि** मंडनरूपां चेष्टां कुरु **देहि सुमिट्ठाहार** देहि सुमृष्टाहारान् । कस्य । **देहहं** देहस्य **सयल णिरत्थ गय** सकलमपि विशिष्टाहारादयो निरर्थका गताः । केन दृष्टांतेन । **जिमु दुज्जणि उवयार** दुर्जने यथोपकारा इति । तद्यथा । यद्यप्ययं कायः खलस्तथापि किमपि ग्रासादिकं दत्वा अस्थिरेणापि स्थिरं मोक्षसौख्यं

होता है यदि विचार करो तो कुछ भी सार नहीं है । तिर्यंचोंके शरीरमें तो कुछ सार भी दीखता है जैसे हाथीके शरीरमें दांत सार है सुरह गौके शरीरमें बाल सार हैं इत्यादि । परंतु मनुष्यदेहमें सार नहीं है घुणसे खाये हुए गन्नेकी तरह मनुष्यदेहको असार जानकर परलोकका बीज करके सार करना चाहिये । जैसे घुणोंका खाया हुआ ईख किसी कामका नहीं है एक बीजके कामका है सो उसको बोकर असारसे सार किया जाता है उसी प्रकार मनुष्यदेह किसी कामका नहीं परंतु परलोकका बीजकर असारको सार करना चाहिये । इस देहसे परलोक सुधारना ही श्रेष्ठ है । जैसे घुणसे खाये गये ईखको बोनेसे अनेक ईखोंका लाभ होता है वैसे ही इस असार शरीरके आधारसे वीतराग परमानंद शुद्धात्मस्वभावका सम्यक् श्रद्धान ज्ञान आचरणरूप निश्चयरत्नत्रयकी भावनाके बलसे मोक्ष प्राप्त की जाती है और निश्चयरत्नत्रयका साधक जो व्यवहार रत्नत्रय उसकी भावनाके बलसे स्वर्ग मिलता है तथा परंपरासे मोक्ष होती है । यह मनुष्यशरीर परलोक सुधारनेकेलिये होवे तभी सार है नहीं तो सर्वथा असार है ॥ २७८ ॥

आगे देहको अशुचि अनित्य आदि दिखानेका छह गाथाओंसे व्याख्यान करते हैं;— [**देहस्य**] इस देहका [**उद्वर्तय**] उबटना करो [**म्रक्षय**] तैलादिकका मर्दन करो [**चेष्टां कुरु**] शृंगार आदिसे अनेक प्रकार सजाओ [**सुमृष्टाहारान्**] अच्छे २ मिष्ट आहार [**देहि**] दे लेकिन [**सकलं**] ये सब [**निरर्था गताः**] यत्न व्यर्थ हैं [**यथा**] जैसे [**दुर्जने**] दुर्जनोंका [**उपकाराः**] उपकार करना वृथा है । **भावार्थ**—जैसे

गृह्यते । सप्तधातुमयत्वेनाशुचिभूतेनापि शुचिभूतं शुद्धात्मस्वरूपं गृह्यते निर्गुणेनापि केवलज्ञानादिगुणसमूहः साध्यत इति भावार्थः । तथा चोक्तं । "अथिरेण थिरा मलिणेण णिम्मला णिग्गुणेण गुणसारं । काएण जावि ढप्पइ सा किरिया किण्ण कायव्वा" ॥

अथ;—

जेहउ जज्जरु णरय घरु, तेहउ जोइय काउ ।
णरइ णिरंतरु पूरियउ, किम किज्जइ अणुराउ ॥ २८० ॥

यथा जर्जरं नरकगृहं तथा योगिन् कायः ।
नरके निरंतरं पूरितं किं क्रियते अनुरागः ॥ २८० ॥

जेहउ इत्यादि । **जेहउ जज्जरु** यथा जर्जरं शतजीर्णं **णरयघरु** नरकगृहं **तेहउ जोइय काउ** तथा हे योगिन् कायः । यतः किं । **णरइ णिरंतरु पूरियउ** नरके निरंतरं पूरितं एवं ज्ञात्वा **किम किज्जइ अणुराउ** कथं क्रियते अनुरागो न कथमपीति । तद्यथा–यथा नरकगृहं शतजीर्णं तथा कायगृहमपि नवद्वारछिद्रितत्वात् शतजीर्णं, परमात्मा तु जन्मजरामरणादिछिद्रदोषरहितः । कायस्तु गूथमूत्रादिनरकपूरितः, भगवान् शुद्धात्मा तु भावकर्म-

---

दुर्जनपर अनेक उपकार करो वे सब वृथा जाते हैं दुर्जनसे कुछ फायदा नहीं उसीतरह शरीरके अनेक यत्न करो इसको अनेक तरहसे पोषण करो परंतु यह अपना नहीं हो सकता । इसलिये यही सार है कि इसको अधिक पुष्ट नहीं करना । कुछ थोड़ासा ग्रासादि देकर स्थिर करके मोक्ष साधन करना, सात धातुमई यह अशुचि शरीर है इससे पवित्र शुद्धात्मस्वरूपका आराधन करना । इस महानिर्गुण शरीरसे केवलज्ञानादि गुणोंका समूह साधना चाहिये । यह शरीर भोगकेलिये नहीं है इससे योगका साधनकर अविनाशीपदकी सिद्धि करनी । ऐसा कहा भी है कि इस क्षणभंगुर शरीरसे स्थिरपद मोक्षकी सिद्धि करनी चाहिये, यह शरीर मलीन है इससे निर्मल वीतरागकी सिद्धि करना और यह शरीर ज्ञानादिगुणोंसे रहित है इसके निमित्तसे सारभूत ज्ञानादिगुण सिद्ध करने योग्य हैं । इस शरीरसे तपसंयमादिका साधन होता है और तप संयमादि क्रियासे सार भूत गुणोंकी सिद्धि होती है । जिस क्रियासे ऐसे गुण सिद्ध हों वह क्रिया क्यों नहीं करना, अवश्य करनी चाहिये ॥ २७९ ॥

आगे शरीरको अशुचि दिखलाकर ममत्व छुडाते हैं;—[**हे योगिन्**] हे योगी [**यथा**] जैसा [**जर्जरं**] सैंकड़ों छेदोंवाला [**नरकगृहं**] नरकघर है [**तथा**] वैसा यह [**कायः**] शरीर [**नरके**] मलमूत्रादिसे [**निरंतरं**] हमेशा [**पूरितं**] भरा हुआ है । ऐसे शरीरसे [**अनुरागः**] प्रीति [**किं क्रियते**] कैसे की जावे किसी तरह भी यह प्रीतिके योग्य नहीं है । **भावार्थ**—जैसे नरकका घर अति जीर्ण जिसके सैकडों छिद्र हैं

द्रव्यकर्मनोकर्ममलरहित इति । अयमत्र भावार्थः । एवं देहात्मनोः भेदं ज्ञात्वा देहममत्वं त्यक्त्वा वीतरागनिर्विकल्पसमाधौ स्थित्वा च निरंतरं भावना कर्तव्येति ॥ २८० ॥

अथ;—

दुक्खइं पावइं असुचियइं, तिहुयणि सयलइ लेवि ।
एयहिं देहु विणिम्मियउ, विहिणा वइरु मुणेवि ॥ २८१ ॥

दुःखानि पापानि अशुचीनि त्रिभुवने सकलानि लात्वा ।
एतैः देहः विनिर्मितः विधिना वैरं मत्वा ॥ २८१ ॥

दुक्खइं इत्यादि । **दुक्खइं** दुःखानि **पावइं** पापानि **असुचियइं** अशुचिद्रव्याणि **तिहुयणि सयलइ लेवि** भुवनत्रयमध्ये समस्तानि गृहीत्वा **एयहिं देहु विणिम्मियउ** एतैर्देहो विनिर्मितः । केन कर्तृभूतेन । **विहिणा** विधिशब्दवाच्येन कर्मणा । कस्मादेवंभूतो देहः कृतः । **वइरु मुणेवि** वैरं मत्वेति । तथाहि । त्रिभुवनस्थदुःखैर्निर्मितत्वात् दुःखरूपोऽयं देहः, परमात्मा तु व्यवहारेण देहस्थोपि निश्चयेन देहाद्भिन्नत्वादनाकुलत्वलक्षणसुखस्वभावः । त्रिभुवनस्थपापैर्निर्मितत्वात् पापरूपोऽयं देहः शुद्धात्मा तु व्यवहारेण देहस्थोपि निश्चयेन पापरूपदेहाद्भिन्नत्वादत्यंतपवित्रः । त्रिभुवनस्थाशुचिद्रव्यैर्निर्मितत्वादशुचिरूपोऽयं देहः

वैसे यह कायरूपी घर साक्षात् नरकका मंदिर है नवद्वारोंसे अशुचि वस्तु झरती है । और आत्माराम जन्म मरणादि छिद्रदोष रहित है भगवान शुद्धात्मा भावकर्म द्रव्यकर्म नोकर्ममलसे रहित है, यह शरीर मलमूत्रादि नरकसे भरा हुआ है । ऐसा शरीरका और जीवका भेद जानकर देहसे ममता छोड़के वीतराग निर्विकल्प समाधिमें ठहरके निरंतर भावना करनी चाहिये ॥ २८० ॥

आगे फिर भी देहकी मलीनता दिखलाते हैं;—[**त्रिभुवने**] तीन लोकमें [**दुःखानि पापानि अशुचीनि**] जितने दुःख हैं पाप हैं और अशुचिवस्तुयें हैं [**सकलानि**] उन सबको [**लात्वा**] लेकर [**एतैः**] इन मिले हुओंसे [**विधिना**] विधाताने [**वैरं**] वैर [**मत्वा**] मानकर [**देहः**] शरीर [**निर्मितः**] बनाया है । **भावार्थ**—तीन लोकमें जितने दुःख हैं उनसे यह देह रचा गया है इससे दुःखरूप है और आत्मद्रव्य व्यवहारनयकर देहमें स्थित है तौभी निश्चयनयकर देहसे भिन्न निराकुलस्वरूप सुखरूप है, तीन लोकमें जितने पाप हैं उन पापोंसे यह शरीर बनाया गया है इसलिये यह देह पापरूप ही है इससे पाप ही उत्पन्न होता है और चिदानंद चिद्रूप जीव पदार्थ व्यवहार नयसे देहमें स्थित है तौभी देहसे भिन्न अत्यंत पवित्र है, तीन जगतमें जितने अशुचि पदार्थ हैं उनको इकट्ठेकर यह शरीर निर्माण किया है इसलिये महा अशुचिरूप है और आत्मा व्यवहारनयकर देहमें विराजमान है तौभी देहसे जुदा

शुद्धात्मा तु व्यवहारेण देहस्थोपि निश्चयेन देहात्पृथग्भूतत्वादत्यंतनिर्मल इति । अत्रैवं देहेन सह शुद्धात्मनो भेदं ज्ञात्वा निरंतरं भावना कर्तव्येति तात्पर्यं ॥ २८१ ॥

अथ;—

जोइय देहु घिणावणउ, लज्जहि किं ण रमंतु ।
णाणिय धम्मिं रइ करहि, अप्पा विमलु करंतु ॥ २८२ ॥

योगिन् देहः घृणास्पदः लज्जसे किं न रममाणः ।
ज्ञानिन् धर्मेण रतिं कुरु आत्मानं विमलं कुर्वन् ॥ २८२ ॥

जोइय इत्यादि । **जोयइ** ये योगिन् **देहु घिणावणउ** देहो घृणया दुगुंछया सहितः **लज्जहि किं ण रमंतु** दुगुंछारहितं परमात्मानं मुक्त्वा देहं रम्यमाणो लज्जां किं न करोषि । तर्हि किं करोमीति प्रश्ने प्रत्युत्तरं ददाति । **णाणिय** हे विशिष्टभेदज्ञानिन् **धम्मइं** निश्चयधर्मशब्दवाच्येन वीतरागचारित्रेण कृत्वा **रइ करहि** रतिं प्रीतिं कुरु । किंकुर्वन् सन् । **अप्पा** वीतरागसदानंदैकस्वभावपरमात्मानं **विमलु करंतु** आर्तरौद्रादिसमस्तविकल्पत्यागेन विमलं निर्मलं कुर्वन्निति तात्पर्यम् ॥ २८२ ॥

अथ;—

जोइय देहु परिच्चयहि, देहु ण भल्लउ होइ ।
देहविभिण्णउ णाणमउ, सो तुहुं अप्पा जोइ ॥ २८३ ॥

योगिन् देहं परित्यज देहो न भद्रः भवति ।
देहविभिन्नं ज्ञानमयं तं त्वं आत्मानं पश्य ॥ २८३ ॥

जोइय इत्यादि । **जोइय** हे योगिन् **देहु परिच्चयहि** शुचिदेहान्नित्यानंदैकस्वभावात्

परम पवित्र है । इस प्रकार देहका और जीवका अत्यंत भेद जानकर निरंतर आत्माकी भावना करनी चाहिये ॥ २८१ ॥

आगे फिर भी देहको अपवित्र दिखलाते हैं;—[**योगिन्**] हे योगी [**देहः**] यह शरीर [**घृणास्पदं**] घिनावना है [**रममाणः**] इस देहसे रमता हुआ तू [**किं न लज्जसे**] क्यों नहीं शरमाता । [**ज्ञानिन्**] हे ज्ञानी तू [**आत्मानं**] आत्माको [**विमलं कुर्वन्**] निर्मल करता हुआ [**धर्मेण**] धर्मसे [**रतिं**] प्रीति [**कुरु**] कर । **भावार्थ—** हे जीव तू सब विकल्प छोड़कर वीतरागचारित्ररूप निश्चयधर्ममें प्रीतिकर । आर्तरौद्र आदि समस्त विकल्पोंको छोड़कर आत्माको निर्मल करता हुआ वीतरागभावोंसे प्रीति कर ॥ २८२ ॥

आगे देहसे स्नेह छुड़ाते हैं;—[**योगिन्**] हे योगी [**देहं**] इस शरीरसे [**परि-**

शुद्धात्मद्रव्याद्विलक्षणं देहं परित्यज । कस्मात् । **देहु ण भल्लउ होइ** देहो भद्रः समीचीनो न भवति । तर्हि किं करोमीति प्रश्ने कृते प्रत्युत्तरं ददाति । **देहविभिण्णउ** देहविभिन्नं **णाणमउ** ज्ञानेन निर्वृत्तं ज्ञानमयं केवलज्ञानाविनाभूतानंतगुणमयं **सो तुहुं अप्पा जोइ** तं पूर्वोक्तलक्षणमात्मानं त्वं कर्ता पश्येति । अयमत्र भावार्थः । "चंडो ण मुयइ वेरं भंडणसीलो य धम्मदयरहिओ । दुट्ठो ण य एदि वसं लक्खणमेयं तु किण्हस्स" इति गाथाकथितलक्षणा कृष्णलेश्या, धनधान्यादितीव्रमूर्छाविषयाकांक्षादिरूपा नीललेश्या, रणे मरणं प्रार्थयति स्तूयमानः संतोषं करोतीत्यादि लक्षणा कापोतलेश्या चैवं लेश्यात्रयप्रभृति-समस्तविभावत्यागेन देहाद्भिन्नमात्मानं भावय इति ॥ २८३ ॥

अथ;—

दुक्खहं कारणु मुणिवि मणि, देहु वि एहु चयंति ।
जित्थु ण पावहिं परमसुहु, तित्थु किं संत वसंति ॥ २८४ ॥

दुःखस्य कारणं मत्वा मनसि देहमपि इमं त्यजंति ।
यत्र न प्राप्नुवंति परमसुखं तत्र किं संतः वसंति ॥ २८४ ॥

त्यज] प्रीति छोड़ क्योंकि [**देहः**] यह देह [**भद्रः न भवति**] अच्छा नहीं है इसलिये [**देहविभिन्नं**] देहसे भिन्न [**ज्ञानमयं**] ज्ञानादि गुणमई [**तं आत्मानं**] ऐसे आत्माको [**त्वं**] तू [**पश्य**] देख । **भावार्थ**—नित्यानंद अखंडस्वभाव जो शुद्धात्मा उससे जुदा और दुःखका मूल तथा महान अशुद्ध जो शरीर उससे भिन्न आत्माको पहचान और कृष्ण नील कापोत इन तीन अशुभलेश्याओंको आदि लेकर सब विभावभावोंको त्यागकर निजस्वरूपका ध्यानकर । ऐसा कथन सुनकर शिष्यने पूछा कि हे प्रभो इन खोटी लेश्याओंका क्या स्वरूप है । तब श्रीगुरु कहते हैं । कृष्ण लेश्याका धारक वह है जो अधिक क्रोधी होवे कभी वैर न छोडै उसका वैर पत्थरकी लकीरकी तरह हो, महा विषयी हो, पर जीवोंकी हंसी उड़ानेमें जिसके शंका न हो अपनी हंसी होनेका जिसको भय न हो जिसका स्वभाव लज्जारहित हो दया धर्मसे रहित हो और अपनेसे बलवानके वशमें हो गरीबको सतानेवाला हो, ऐसा कृष्णलेश्यावालेका लक्षण कहा । नीललेश्यावालेके लक्षण कहते हैं वो सुनों—जिसके धनधान्यादिककी अति ममता हो और सदा विषयाभिलाषी हो इंद्रियोंके विषय सेवता हुआ तृप्त न हो । कापोतलेश्याका धारक रणमें मरना चाहता है स्तुति करनेसे अति प्रसन्न होता है । ये तीनों कुलेश्याके लक्षण कहे गये हैं इनको छोडकर पवित्र भावोंसे देहसे जुदे जीवको जानकर अपने स्वरूपका ध्यान कर । यही कल्याणका कारण है ॥ २८३ ॥

दुक्खहं इत्यादि । **दुक्खहं कारणु** वीतरागतात्त्विकानंदरूपात् शुद्धात्मसुखाद्विलक्षणस्य नारकादिदुःखस्य कारणं **मुणिवि** मत्वा । क । **मणि** मनसि । कं । **देहुवि** देहमपि **एहु** इमं प्रत्यक्षीभूतं **चयंति** देहममत्वं त्यजंति शुद्धात्मनि स्थित्वा **जित्थु ण पावहिं** यत्र देहे न प्राप्नुवंति । किं । **परमसुहु** पंचेंद्रियविषयातीतं शुद्धात्मानुभूतिसंपन्नं परमसुखं **तित्थु किं संत वसंति** तत्र देहे संतः सत्पुरुषाः किं वसंति शुद्धात्मसुखसंतोषं मुक्त्वा तत्र किं रतिं कुर्वंति इति भावार्थः ॥ २८४ ॥

अथात्मायत्तसुखे रतिं कुर्विति दर्शयति;—

अप्पायत्तउ जं जि सुहु, तेण जि करि संतोसु ।
पर सुहु वढ चिंतंताहं, हियइ ण फिट्टइ सोसु ॥ २८५ ॥

आत्मायत्तं यदेव सुखं तेनैव कुरु संतोषम् ।
परं सुखं वत्स चिंतयतां हृदये न नश्यति शोषः ॥ २८५ ॥

अप्पायत्तउ इत्यादि । **अप्पायत्तउ** अन्यद्रव्यनिरपेक्षत्वेनात्माधीनं **जं जि सुहु** यदेव शुद्धात्मसंवित्तिसमुत्पन्नं सुखं **तेण जि करि संतोसु** तेनैव तदनुभवेनैव संतोषं कुरु **पर**

आगे फिर भी देहको दुःखका कारण दिखलाते हैं;—[**दुःखस्य कारणं**] नरकादिदुःखका कारण [**इमं देहमपि**] इस देहको [**मनसि**] मनमें [**मत्वा**] जानकर ज्ञानी जीव [**त्यजंति**] इसका ममत्व छोड देते हैं क्योंकि [**यत्र**] जिस देहमें [**परमसुखं**] उत्तमसुख [**न प्राप्नुवंति**] नहीं पाते [**तत्र**] उसमें [**संतः**] सत्पुरुष [**किं वसंति**] कैसे रह सकते हैं । **भावार्थ**—वीतराग परमानंदरूप जो आत्मसुख उससे विपरीत नरकादिके दुःख उनका कारण यह शरीर उसको बुरा समझकर ज्ञानी जीव देहकी ममता छोड़ देते हैं और शुद्धात्म स्वरूपका सेवन करते हैं निज स्वरूपमें ठहर कर देहादि पदार्थोंमें प्रीति छोड़ देते हैं । इस देहमें कभी सुख नहीं पाते सदा आधि व्याधिसे पीडित ही रहते हैं । पंचेंद्रियोंके विषयसे रहित जो शुद्धात्मानुभूतिरूप परमसुख वह देहके ममत्व करनेसे कभी नहीं मिलसकता । महा दुःखके कारण इस शरीरमें सत्पुरुष कभी नहीं रहसकते । देहसे उदास होके संसारकी आशा छोड़ सुखका निवास जो सिद्धपद उसको प्राप्त होते हैं । और जो आत्म भावनाको छोड़कर संतोषसे रहित होके देहादिकमें राग करते हैं वे अनंत भव धारण करते हैं संसारमें भटकते फिरते हैं ॥ २८४ ॥

आगे यह उपदेश करते हैं कि तू आत्मसुखमें प्रीतिकर;—[**वत्स**] हे शिष्य [**यदेव**] जो [**आत्मायत्तं सुखं**] पर द्रव्यसे रहित आत्माधीन सुख है [**तेनैव**]

सुहु वढ चिंतंताहं इंद्रियाधीनं परमसुखं चिंतयंतं वत्स मित्र **हियइ ण फिट्टइ सोसु** हृदये न नश्यति शोषोन्तर्दाह इति । अत्राध्यात्मरतिस्वाधीनाविच्छेदविघ्नौघरहिता च, भोगरतिस्तु पराधीना वह्नेरिंधनैरिव समुद्रस्य नदीसहस्रैरिवातृप्तिकरा च । एवं ज्ञात्वा भोगसुखं त्यक्त्वा "एदह्मि रदो णिच्चं संतुट्ठो होदि णिच्चमेदह्मि । एदेण होहि तित्तो तो होहदि उत्तमं सुक्खं" इति गाथाकथितलक्षणे अध्यात्मसुखे स्थित्वा च भावना कर्तव्येति तात्पर्यं । तथा चोक्तं । "तिणकट्ठेण व अग्गी लवणसमुद्दो णदीसहस्सेहिं । ण इमो जीवो सक्को तिप्पेदुं कामभोगेहिं" ।। अध्यात्मशब्दस्य व्युत्पत्तिः क्रियते—मिथ्यात्वविषयकषायादि-बहिर्द्रव्ये निरालंबनत्वेनात्मन्यनुष्ठानमध्यात्मं ।। २८५ ।।

अथात्मनो ज्ञानस्वभावं दर्शयति;—

अप्पहं णाणु परिच्चयवि, अण्णु ण अत्थि सहाउ ।
इउ जाणेविणु जोइयहु, परहं म बंधउ राउ ।। २८६ ।।

आत्मनः ज्ञानं परित्यज्य अन्यो न अस्ति स्वभावः ।
इदं ज्ञात्वा योगिन् परस्मिन् मा बधान रागम् ।। २८६ ।।

उसीमें [**संतोषं**] संतोष [**कुरु**] कर [**परं सुखं**] इंद्रियाधीन सुखको [**चिंतयतां**] चिंतवन करनेवालोंके [**हृदये**] चित्तका [**शोषः**] दाह [**न नश्यति**] नहीं मिटता । **भावार्थ**—आत्माधीन सुख आत्माके जाननेसे उत्पन्न होता है इसलिये तू आत्माके अनुभवसे संतोष कर भोगोंकी वांछा करनेसे चित्त शांत नहीं होता । जो अध्यात्मकी प्रीति है वह स्वाधीनता है इसमें कोई विघ्न नहीं है और भोगोंका अनुराग वह पराधी-नता है । भोगोंको भोगते कभी तृप्ति नहीं होती । जैसे अग्नि ईंधनसे तृप्त नहीं होती और सैकड़ों नदियोंसे समुद्र तृप्त नहीं होता उसीतरह इंद्रियसुखोंसे कभी तृप्ति नहीं होती एक आत्मसुखसे ही तृप्ति होती है । ऐसा ही समयसारमें कहा है कि हंस (जीव) तू इस आत्मस्वरूपमें ही सदा लीन हो और सदा इसीमें संतुष्ट हो । इसीसे तू तृप्त होगा और इसीसे ही तुझे उत्तम सुखकी प्राप्ति होगी । इस कथनसे अध्यात्मसुखमें ठहरकर निजस्वरूपकी भावना करनी चाहिये और कामभोगोंसे कभी तृप्ति नहीं हो सकती । ऐसा कहा भी है कि जैसे तृण काठ आदि ईंधनसे अग्नि तृप्त नहीं होती और हजारों नदियोंसे लवणसमुद्र तृप्त नहीं होता उसीतरह यह जीव काम भोगोंसे तृप्त नहीं होता । इसलिये विषयसुखोंको छोड़कर अध्यात्मसुखका सेवन करना चाहिये । आत्म-सुखका शब्दार्थ करते हैं—मिथ्यात्वविषय कषाय आदि बाह्य पदार्थोंका अवलंबन (सहारा) छोड़ना और आत्मामें तल्लीन होना वह अध्यात्म है ।। २८५ ।।

अप्पहं इत्यादि । **अप्पहं** शुद्धात्मनः **णाणु परिच्चयवि** वीतरागस्वसंवेदनज्ञानं त्यक्त्वा **अण्णु ण अत्थि सहाउ** अन्यो ज्ञानाद्भिन्नः स्वभावो नास्ति **इउ जाणेविणु** इदमात्मनः शुद्धात्मज्ञानं स्वभावं ज्ञात्वा **जोइयहु** योगिन् **परहं म बंधउ राउ** परस्मिन् शुद्धात्मनो विलक्षणे देहे रागादिकं मा कुरु तस्मात् । अत्रात्मनः शुद्धात्मनः शुद्धात्मज्ञानस्वरूपं ज्ञात्वा रागादिकं त्यक्त्वा च निरंतरं भावना कर्तव्येत्यभिप्रायः ॥ २८६ ॥

अथ स्वात्मोपलंभनिमित्तं चित्तस्थितीकरणरूपेण परमोपदेशं पंचकलेन दर्शयति;—

विसयकसायहि मण सलिलु, ण वि डहुलिज्जइ जासु ।
अप्पा णिम्मलु होइ लहु, वढ पच्चक्खु वि तासु ॥ २८७ ॥

विषयकषायैः मनःसलिलं नैव क्षुभ्यते यस्य ।
आत्मा निर्मलो भवति लघु वत्स प्रत्यक्षोपि तस्य ॥ २८७ ॥

विसय इत्यादि । **विसयकसायहिं मण सलिलु** ज्ञानावरणाद्यष्टकर्मजलचराकीर्णसंसारसागरे निर्विषयकषायरूपात् शुद्धात्मतत्त्वात् प्रतिपक्षभूतैर्विषयकषायमहावातैर्मनःप्रचुरसलिलं **णवि डहुलिज्जइ** नैव क्षुभ्यते **जासु** यस्य भव्यवरपुंडरीकस्य **अप्पा णिम्मलु होइ लहु** आत्मा रत्नविशेषो अनादिकालरूपमहापाताले पतितः सन् रागादिमलपरिहारेण लघु शीघ्रं निर्मलो भवति **वढ** वत्स । न केवलं निर्मलो भवति **पच्चक्खुवि** शुद्धात्मा परम इत्युच्यते तस्य परमस्य कला अनुभूतिः परमकला एव दृष्टिः परमकलादृष्टिः तया परम-

---

आगे आत्माका ज्ञानस्वभाव दिखलाते हैं;—[**आत्मनः**] आत्माका निजस्वभाव [**ज्ञानं परित्यज्य**] वीतरागस्वसंवेदन ज्ञानके सिवाय [**अन्यः स्वभावः**] दूसरा स्वभाव [**न अस्ति**] नहीं है आत्मा केवलज्ञानस्वभाव है [**इति ज्ञात्वा**] ऐसा जानकर [**योगिन्**] हे योगी [**परस्मिन्**] पर वस्तुसे [**रागं**] प्रीति [**मा बधान**] मत बांधै मतकर । **भावार्थ**—पर जो शुद्धात्मासे भिन्न देहादिक उनमें राग मतकर आत्माका ज्ञानस्वरूप जानकर रागादिक छोडके निरंतर आत्माकी भावना करनी चाहिये ॥ २८६ ॥

आगे आत्माकी प्राप्तिकेलिये चित्तको स्थिर करना ऐसा परम उपदेश श्रीगुरु दिखलाते हैं;—[**यस्य**] जिसका [**मनःसलिलं**] मनरूपी जल [**विषयकषायैः**] विषयकषायरूप प्रचंडपवनसे [**नैव क्षुभ्यते**] नहीं चलायमान होता है [**तस्य**] उसी भव्य जीवका [**आत्मा**] आत्मा [**वत्स**] हे वच्चे [**निर्मलो भवति**] निर्मल होता है और [**लघु**] शीघ्र ही [**प्रत्यक्षोपि**] प्रत्यक्ष हो जाता है । **भावार्थ**—ज्ञानावरणादि अष्ट कर्म रूपी जलचर मगरमच्छादि जलके जीव उनसे भरा जो संसारसागर उसमें विषयकषायरूप प्रचंड पवन जो कि शुद्धात्मतत्त्वसे सदा पराङ्मुख हैं उस प्रचंड पवनसे जिसका चित्त चलायमान नहीं हुआ उसीका आत्मा निर्मल होता है । आत्मा रत्नके

कलादृष्ट्या यावदवलोकनं सूक्ष्मनिरीक्षणं तेन प्रत्यक्षोपि स्वसंवेदनग्राह्योपि भवति । कस्य । तासु यस्य पूर्वोक्तप्रकारेण निर्मलं मनस्तस्येति भावार्थः ॥ २८७ ॥

अथ; —

अप्पा परहं ण मेलयउ, मणु मारिवि सहसत्ति ।
सो वढ जोएं किं करइ, जासु ण एही सत्ति ॥ २८८ ॥

आत्मा परस्य न मेलितः मनो मारयित्वा सहसेति ।
स वत्स योगेन किं करोति यस्य न ईदृशी शक्तिः ॥ २८८ ॥

अप्पा इत्यादि । **अप्पा** अयं प्रत्यक्षीभूतः सविकल्प आत्मा **परहं** ख्यातिपूजालाभप्रभृतिसमस्तमनोरथरूपविकल्पजालरहितस्य विशुद्धज्ञानदर्शनस्वभावस्य परमात्मनः **ण मेलविउ** न योजितः । किं कृत्वा । **मणु मारिवि** मिथ्यात्वविषयकषायादिविकल्पसमूहपरिणतं मनो वीतरागनिर्विकल्पसमाधिशस्त्रेण मारयित्वा **सहसत्ति** झटिति **सो वढ जोएं किं करइ** स पुरुषः वत्स योगेन किं करोति । स कः । **जासु ण एही सत्ति** यस्येदृशी मनोमारणशक्तिर्नास्तीति तात्पर्यम् ॥ २८८ ॥

समान है अनादिकालका अज्ञानरूपी पातालमें पड़ा है सो रागादिमलके छोड़नेसे शीघ्र ही निर्मल हो जाता है हे वच्चे आत्मा उन भव्य जीवोंका निर्मल होता है और प्रत्यक्ष उनको आत्माका दर्शन होता है । परमकला जो आत्माकी अनुभूति वही हुई निश्चयदृष्टि उससे आत्मस्वरूपका अवलोकन होता है । आत्मा स्वसंवेदन ज्ञान करके ही ग्रहण करने योग्य है । जिसका मन विषयसे चंचल न हो उसीको आत्माका दर्शन होता है ॥ २८७ ॥

आगे यह कहते हैं कि जिसने शीघ्र ही मनको वसकर आत्माको परमात्मासे नहीं मिलाया जिसमें ऐसी शक्ति नहीं है वह योगसे क्या करसकता है कुछ भी नहीं करसकता;—[**सहसा मनो मारयित्वा**] जिसने शीघ्र ही मनको वशमें करके [**आत्मा**] यह आत्मा [**परस्य न मेलितः**] परमात्मामें नहीं मिलाया [**वत्स**] हे शिष्य [**यस्य**] जिसकी [**ईदृशी**] ऐसी [**शक्तिः**] शक्ति [**न**] नहीं है [**सः**] वह [**योगेन**] योगसे [**किं करोति**] क्या करसकता है । **भावार्थ**—यह प्रत्यक्षरूप संसारी जीव विकल्पसहित है दशा जिसकी उसको समस्त विकल्पजाल रहित निर्मल ज्ञान-दर्शन स्वभाव परमात्मासे नहीं मिलाया । मिथ्यात्व विषय कषायादि विकल्पोंके समूहकर परिणत हुआ जो मन उसको वीतराग निर्विकल्पसमाधिरूपशस्त्रसे शीघ्र ही मारकर आत्माको परमात्मासे नहीं मिलाया वह योगी योगसे क्या करसकता है कुछ भी नहीं करसकता । जिसमें मन मारनेकी शक्ति नहीं हैं वह योगी कैसा । योगी तो उसे कहते हैं कि जो बड़ाई, पूजा (अपनी महिमा) और लाभ आदि सब मनोरथरूप विकल्पजा-

अथ;—

अप्पा मिल्लिवि णाणमउ, अण्णु जि झायहि झाणु ।
वढ अण्णाणवियंभियहं, कउ तहं केवलणाणु ॥ २८९ ॥

आत्मानं मुक्त्वा ज्ञानमयं अन्यदेव ध्यायंति ध्यानं ।
वत्स अज्ञानविजृंभितानां कथं तेषां केवलज्ञानम् ॥ २८९ ॥

अप्पा इत्यादि । **अप्पा** स्वशुद्धात्मानं **मिल्लिवि** मुक्त्वा । कथंभूतमात्मानं । **णाणमउ** सकलविमलकेवलज्ञानाद्यनंतगुणनिर्वृत्तं **अण्णु** अन्यद्बहिर्द्रव्यालंबनं **जे** ये केचन **झायहिं** ध्यायंति । किं । **झाणु** ध्यानं **वढ** वत्स मित्र **अण्णाणवियंभियहं** शुद्धात्मानुभूतिविलक्षणाज्ञानविजृंभितानां परिणतानां **कउ तहं केवलणाणु** कथं तेषां केवलज्ञानं किं तु नैवेति। अत्र यद्यपि प्राथमिकानां सविकल्पावस्थायां चित्तस्थितिकरणार्थं विषयकषायरूपदुर्ध्यानवंचनार्थं च जिनप्रतिमाक्षरादिकं ध्येयं भवतीति तथापि निश्चयध्यानकाले स्वशुद्धात्मैव इति भावार्थः ॥ २८९ ॥

अथ;—

सुण्णउं पउं झायंताहं, वलि वलि जोइयडाहँ ।
समरसिभाउ परेण सहु, पुण्णुवि पाउ ण जाहँ ॥ २९० ॥

शून्यं पदं ध्यायतां बलिं बलिं योगिनाम् ।
समरसीभावं परेण सह पुण्यमपि पापं न येषां ॥ २९० ॥

लोंसे रहित निर्मल ज्ञान दर्शनमई परमात्माको देखै जानें अनुभव करै । सो ऐसा मनके मारे विना नहीं होसकता यह निश्चय जानना ॥ २८८ ॥

आगे ज्ञानमई आत्माको छोड़कर जो अन्य पदार्थका ध्यान करते हैं वे अज्ञानी हैं उनको केवलज्ञान कैसे उत्पन्न होसकता है ऐसा निरूपण करते हैं;—[**ज्ञानमयं**] जो महा निर्मल केवल ज्ञानादि अनंतगुणरूप [**आत्मानं**] आत्मद्रव्यको [**मुक्त्वा**] छोड़कर [**अन्यदेव**] जड़ पदार्थ परद्रव्य उनका [**ध्यानं ध्यायंति**] ध्यान लगाते हैं [**वत्स**] हे वत्स वे अज्ञानी हैं [**तेषां अज्ञानविजृंभितानां**] उन शुद्धात्माके ज्ञानसे विमुख कुमति कुश्रुत कुअवधिरूप अज्ञानसे परिणत हुए जीवोंको [**केवलज्ञानं कथं**] केवल ज्ञानकी प्राप्ति कैसे होसकती है कभी नहीं होसकती । **भावार्थ**—यद्यपि विकल्प सहित अवस्थामें शुभोपयोगियोंको चित्तकी स्थिरताकेलिये और विषयकषायरूप खोटे ध्यानके रोकनेकेलिये जिनप्रतिमा तथा नमोकार मंत्रके अक्षर ध्यावने योग्य हैं तौभी निश्चयध्यानके समय शुद्ध आत्मा ही ध्यावने योग्य है अन्य नहीं ॥ २८९ ॥

सुण्णउं पउं इत्यादि । सुण्णउं शुभाशुभमनोवचनकायव्यापारैः शून्यं पउं वीतरागपरमानंदैकसुखामृतरसास्वादरूपा स्वसंवित्तिमयी या सा परमकला तया भरितावस्थपदं निजशुद्धात्मस्वरूपं झायंताहं वीतरागत्रिगुप्तिसमाधिबलेन ध्यायतां वलि वलि जोइयडाहं श्रीयोगींद्रदेवाः स्वकीयाभ्यंतरगुणानुरागं प्रकटयंति, वलि क्रियेऽहमिति परमयोगिनां प्रशंसां कुर्वंति । येषां किं । समरस भाउ वीतरागपरमाह्लादसुखेन परमसमरसीभावं । केन सह । परेण सहु स्वसंवेद्यमानपरमात्मना सह । पुनरपि किं येषां । पुण्णुवि पाउ ण जाहं शुद्धबुद्धैकस्वभावपरमात्मनो विलक्षणं पुण्यपापद्वयमिति न येषामित्यभिप्रायः ॥२९०॥

अथ;—

उव्वस वसिया जो करइ, वसिया करइ जु सुण्णु ।
वलि किज्जउं तसु जोइयहिं, जासु ण पाउ ण पुण्णु ॥ २९१ ॥

उद्वसान् वसितान् यः करोति वसितान् करोति यः शून्यान् ।
बलिं कुर्वेऽहं तस्य योगिनः यस्य न पापं न पुण्यम् ॥ २९१ ॥

आगे शुभाशुभविकल्पसे रहित जो निर्विकल्प(शून्य) ध्यान उसको जो ध्याते हैं उन योगियोंकी मैं वलिहारी करता हूं ऐसा कहते हैं;—[**शून्यं पदं ध्यायतां**] विकल्प रहित ब्रह्मपदको ध्यावनेवाले [**योगिनां**] योगियोंकी मैं [**बलिं बलिं**] वार वार मस्तक नमाकर पूजा करता हूं [**येषां**] जिन योगियोंके [**परेण सह**] अन्यपदार्थोंके साथ [**समरसीभावं**] समरसीभाव है और [**पुण्यं पापं अपि न**] जिनके पुण्य और पाप दोनों ही उपादेय नहीं हैं । **भावार्थ**—शुभ अशुभ मनवचनकायके व्यापार रहित जो वीतराग परमआनंदमई सुखामृत रसका आस्वाद वही जिसका स्वरूप है ऐसी आत्मज्ञानमई परमकलाकर भरपूर जो ब्रह्मपद-शून्यपद-निजशुद्धात्मस्वरूप उसको ध्यानी रागरहित तीन गुप्तिरूप समाधिके बलसे ध्यावते हैं उन ध्यानी योगियोंकी मैं वार बार बलिहारी करता हूं ऐसे श्रीयोगींद्रदेव अपना अंतरंगका धर्मानुराग प्रगट करते हैं और परम योगीश्वरोंकी प्रशंसा करते हैं । जिन योगीश्वरोंके परम स्वसंवेदन ज्ञानसहित महा समरसीभाव है । समरसी भावका लक्षण ऐसा है कि जिनके इंद्र और कीट दोनों समान, चिंतामणिरत्न और कंकड़ दोनों समान हों । अथवा ज्ञानादि गुण और गुणी निज शुद्धात्मद्रव्य इन दोनोंका एकीभावरूप परिणमन वह समरसीभाव है उसकर सहित हैं । जिनके पुण्य पाप दोनों ही नहीं हैं । ये दोनों शुद्धबुद्ध चैतन्य स्वभाव परमात्मासे भिन्न हैं सो जिन मुनियोंने दोनोंको हेय समझलिया है परमध्यानमें आरूढ हैं उनकी मैं बार बार बलिहारी जाता हूं ॥ २९० ॥

उव्वस इत्यादि । **उव्वस** उद्वसान् शून्यान् । कान् । वीतरागतात्त्विकचिदानंदोच्छलननिर्भरानंदशुद्धात्मानुभूतिपरिणामान् परमानंदनिर्विकल्पस्वसंवेदनज्ञानबलेनेदानीं विशिष्टज्ञानकाले **वसिया करइ** तेनैव स्वसंवेदनज्ञानेन वसितान् भरितावस्थान् करोति **जो** यः परमयोगी **सुण्णु** निश्चयनयेन शुद्धचैतन्यनिश्चयप्राणस्य हिंसकत्वान्मिथ्यात्वविकल्पजालमेव निश्चयहिंसा तत्प्रभृतिसमस्तविभावपरिणामान् स्वसंवेदनज्ञानालाभात्पूर्वं वसितानिदानीं शून्यान् करोतीति **बलि किज्जउं तसु जोइयहिं** बलिर्मस्तकस्योपरेणावतारणं क्रियेहमिति तस्य योगिनः । एवं श्रीयोगींद्रदेवाः गुणप्रशंसां कुर्वंति । पुनरपि किं यस्य योगिनः । **जासु ण** यस्य न । किं । **पाउ ण पुण्णु** वीतरागशुद्धात्मतत्त्वाद्विपरीतं पुण्यपापद्वयमिति तात्पर्यं ॥ २९१ ॥

अथैकसूत्रेण प्रश्नं कृत्वा सूत्रचतुष्टयेनोत्तरं दत्वा च तमेव पूर्वसूत्रपंचकेनोक्तं निर्विकल्पसमाधिरूपं परमोपदेशं पुनरपि विवृणोति पंचकलेन;—

तुट्टइ मोहु तडित्ति जहिं, मणु अत्थवणहं जाइ ।
सो सामिय उवएसु कहि, अण्णें देविं काइं ॥ २९२ ॥

त्रुट्यति मोहः झटिति यत्र मनः अस्तमनं याति ।
तं स्वामिन् उपदेशं कथय अन्येन देवेन किं ॥ २९२ ॥

आगे फिर भी योगीश्वरोंकी प्रशंसा करते हैं;—[**यः**] जो [**उद्वसान्**] ऊजड हैं अर्थात् पहले कभी नहीं हुए ऐसे शुद्धोपयोगरूप परिणामोंको [**वसितान्**] स्वसंवेदन ज्ञानके बलसे वसाता है अर्थात् अपने हृदयमें स्थापन करता है और [**यः**] जो [**वसितान्**] पहलेके वसे हुए मिथ्यात्वादि परिणाम हैं उनको [**शून्यान्**] ऊजड़ करता है उनको निकाल देता है [**तस्य योगिनः**] उस योगीकी [**अहं**] मैं [**बलिं**] पूजा [**कुर्वे**] करता हूं [**यस्य**] जिसके [**न पापं न पुण्यं**] न तो पाप है और न पुण्य है । **भावार्थ**—जो प्रगटरूप नहीं वसते हैं अनादिकालके वीतरागचिदानंदस्वरूप शुद्धात्मानुभूतिरूप शुद्धोपयोगपरिणाम उनको अब निर्विकल्पस्वसंवेदन ज्ञानके बलसे वसाता है निज स्वादनरूप स्वाभाविक ज्ञानकर शुद्धपरिणामोंकी वस्ती निजघटरूपी नगरमें भर पूर करता है । और अनादिकालके जो शुद्धचैतन्यरूप निश्चयप्राणोंके घातक ऐसे मिथ्यात्वरागादिरूप विकलपजाल हैं उनको निजस्वरूप नगरसे काढ देता है उनको ऊजड़ करदेता है ऐसे परमयोगीकी मैं बलिहारी अर्थात् उसके मस्तकपर मैं अपनेको वारता हूं । इस प्रकार श्री योगींद्रदेव परमयोगियोंकी प्रशंसा करते हैं । जिन योगियोंके वीतरागशुद्धात्मतत्त्वसे विपरीत पुण्य पाप दोनों ही नहीं हैं ॥ २९१ ॥

तुट्टइ इत्यादि । तुट्टइ नश्यति । कोसौ । **मोहु** निर्मोहशुद्धात्मद्रव्यप्रतिपक्षभूतो मोहः **तडित्ति** झटिति **जहिं** मोहोदयोत्पन्नसमस्तविकल्परहिते यत्र परमात्मपदार्थे । पुनरपि किं यत्र । **मणु अत्थवणहं जाइ** निर्विकल्पात् शुद्धात्मस्वभावाद्विपरीतं नानाविकल्पजालरूपं मनो वास्तं गच्छति **सो सामिय उवएसु कहि** हे स्वामिन् तदुपदेशं कथयेति प्रभाकरभट्टः श्रीयोगींद्रदेवान् पृच्छति **अण्णें देविं काइं** निर्दोषिपरमात्मनः परमाराध्यात्सकाशादन्येन देवेन किं प्रयोजनमित्यर्थः ॥ २९२ ॥ इति प्रभाकरभट्टप्रश्नसूत्रमेकं गतं ।

अथोत्तरं;—

णासविणिग्गउ सासडा, अंबरि जेत्थु विलाइ ।
तुट्टइ मोहु तडत्ति तहिं, मणु अत्थवणहं जाइ ॥ २९३ ॥

नासाविनिर्गतः उच्छ्वासः अंबरे यत्र विलीयते ।
त्रुट्यति मोहः झटिति तत्र मनः अस्तं याति ॥ २९३ ॥

णासविणिग्गउ इत्यादि । **णासविणिग्गउ** नासिकाविनिर्गतः **सासडा** उच्छ्वासः **अंबरि** मिथ्यात्वरागादिविकल्पजालरहिते शून्ये अंबरशब्दवाच्ये **जित्थु** यत्र तात्त्विकपरमानंदभरितावस्थेति निर्विकल्पसमाधौ **विलाइ** पूर्वोक्तः श्वासो विलयं गच्छति नासिकाद्वारं विहाय तालुरंध्रेण गच्छतीत्यर्थः । **तुट्टइ** त्रुट्यति नश्यति । कोसौ । **मोहु** मोहो-

---

आगे एक दोहामें शिष्यका प्रश्न और चार दोहाओंमें प्रश्नका उत्तर देकर निर्विकल्प समाधिरूप परम उपदेश फिर भी विस्तारसे करते हैं;—[**स्वामिन्**] हे स्वामी मुझे [**तं उपदेशं**] उस उपदेशको [**कथय**] कहो [**यत्र**] जिससे [**मोहः**] मोह [**झटिति**] शीघ्र [**त्रुट्यति**] छूट जावे [**मनः**] और चंचल मन [**अस्तमनं**] स्थिरताको [**याति**] प्राप्त हो जावे [**अन्येन देवेन किं**] दूसरे देवतासे क्या प्रयोजन है । **भावार्थ**—प्रभाकरभट्ट श्रीयोगींद्रदेवसे प्रश्न करता है कि हे स्वामी वह उपदेश कहो कि जिससे निर्मोह शुद्धात्मद्रव्यसे पराङ्मुख मोह शीघ्र जुदा हो जावे अर्थात् मोहके उदयसे उत्पन्न समस्त विकल्पजालोंसे रहित जो परमात्मपदार्थ उसमें मोहजालका लेश भी न रहे और निर्विकल्प शुद्धात्मभावनासे विपरीत नाना विकल्प जालरूपी चंचल मन वह अस्त हो जावे । हे स्वामी निर्दोष परमाराध्य जो परमात्मा उससे अन्य जो मिथ्याती देव उनसे मेरा क्या मतलब है । ऐसा शिष्यने श्री गुरूसे प्रश्न किया उसका एक दोहासूत्र कहा ॥ २९२ ॥

आगे श्रीगुरू उत्तर देते हैं;—[**नासाविनिर्गतः**] नाकसे निकला जो श्वास वह [**यत्र**] जिस [**अंबरे**] निर्विकल्प समाधिमें [**विलीयते**] मिल जावे [**तत्र**] उसी जगह [**मोहः**] मोह [**झटिति**] शीघ्र [**त्रुट्यति**] नष्ट होजाता है [**मनः**] और मन

दयेनोत्पन्नरागादिविकल्पजालः तडत्ति झटिति तर्हिं तत्र बहिर्बोधशून्ये निर्विकल्पसमाधौ मणु मनः पूर्वोक्तरागादिविकल्पाधारभूतं तन्मयं वा अत्थवणहं जाइ अस्तं विनाशं गच्छति स्वस्वभावेन तिष्ठति इति । अत्र यदायं जीवो रागादिपरभावशून्यनिर्विकल्पसमाधौ तिष्ठति तदायमुच्छ्वासरूपो वायुर्नासिकाछिद्रद्वयं वर्जयित्वा स्वयमेवानीहितवृत्त्या तालुप्रदेशे यत् केशात् शेषाष्टमभागप्रमाणं छिद्रं तिष्ठति तेन क्षणमात्रं दशमद्वारेण तदनंतरं क्षणमात्रं नासिकया तदनंतरं कृत्वा रंध्रेण निर्गच्छतीति । न च परकल्पितवायुधारणारूपेण श्वासनाशो ग्राह्यः । कस्मादिति चेत् । वायुधारणा तावदीहापूर्विका ईहा च मोहकार्यरूपो विकल्पः । स च मोहकारणं न भवतीति इति न च परकल्पितवायुः । किं च । कुंभकपूरकरेचकादिसंज्ञा वायुधारणा क्षणमात्रं भवत्येवात्र किं तु अभ्यासवशेन घटिकाप्रहरदिवसादिष्वपि भवति तस्य वायुधारणस्य च कार्यं देहारोगत्वलघुत्वादिकं न च मुक्तिरिति । यदि मुक्तिरपि भवति तर्हि वायुधारणाकारकाणामिदानींतनपुरुषाणां मोक्षो किं न भवतीति भावार्थः ॥ २९३ ॥

[अस्तं याति] स्थिर होजाता है । भावार्थ—नासिकासे निकले जो श्वासोच्छ्वास हैं वे अंबर अर्थात् आकाश समान निर्मल मिथ्यात्वविकल्पजालरहित शुद्धभावोंमें विलीन हो जाते हैं अर्थात् तत्त्वस्वरूप परमानंदकर पूर्ण निर्विकल्पसमाधिमें स्थिर चित्त हो जाता है तव श्वासोच्छ्वासरूप पवन रुक जाती है नासिकाके द्वारको छोड़कर तालुवारंध्ररूपी दशवें द्वारमें होके निकले तव मोह टूटता है उसी समय मोहके उदयकर उत्पन्न हुए रागादिविकल्पजाल नाश हो जाते हैं बाह्य ज्ञानसे शून्य निर्विकल्पसमाधिमें विकल्पोंका आधारभूत जो मन वह अस्त हो जाता है अर्थात् निज स्वभावमें मनकी चंचलता नहीं रहती । जव यह जीव रागादि परभावोंसे शून्य निर्विकल्प समाधिमें होता है तव यह श्वासोच्छ्वासरूप पवन नासिकाके दोनों छिद्रोंको छोड़कर स्वयमेव अवांछीक वृत्तिसे तालुवाके वालकी अनीके आठवें भाग प्रमाण अति सूक्ष्म छिद्रमें (दशवें द्वारमें) होकर वारीक निकलती है नासाके छेदको छोडकर तालुरंध्रमें (छेदमें) होकर निकलती है । और पातंजलमतवाले वायुधारणारूप श्वासोच्छ्वास मानते हैं वह ठीक नहीं हैं क्योंकि वायुधारणा वांछापूर्वक होती है और वांछा है वह मोहसे उत्पन्न विकल्परूप है वांछाका कारण मोह है । वह संयमीके वायुका निरोध वांछापूर्वक नहीं होता है स्वाभाविक ही होता है। जिनशासनमें ऐसा कहा है कि कुंभक (पवनको खेंचना) पूरक (पवनको थांभना) रेचक (पवनको निकालना) ये तीन भेद प्राणायामके हैं इसीको वायुधारणा कहते हैं । यह क्षणमात्र होती है परंतु अभ्यासके वशसे घड़ी पहर दिवस आदितक भी होती है । उस वायुधारणाका फल ऐसा कहा है कि देहकी आरोग्यता होती है देहके सब रोग मिट

अथ;—

मोहु विलिज्जइ मणु मरइ, तुट्टइ सासुणिसासु ।
केवलणाणुवि परिणवइ, अंबरि जाहं णिवासु ॥ २९४ ॥

मोहो विलीयते मनो म्रियते त्रुट्यति श्वासोच्छ्वासः ।
केवलज्ञानमपि परिणमति अंबरे येषां निवासः ॥ २९४ ॥

मोहु विलिज्जइ इत्यादि । **मोहु** मोहो ममत्वादिविकल्पजालं **विलिज्जइ** विलयं गच्छति **मणु मरइ** इहलोकपरलोकाशाप्रभृतिविकल्पजालरूपं मनो म्रियते **तुट्टइ** नश्यति । कोसौ । **सासुणिसासु** अनीहितवृत्त्या नासिकाद्वारं विहाय क्षणमात्रं तालुरंध्रेण गच्छति पुनरप्यंतरं कृत्वा नासिकया निर्गच्छति पुनरपि रंध्रेणेत्युच्छ्वासनिःश्वासलक्षणो वायुः । पुनरपि किं भवति । **केवलणाणुवि परिणमइ** केवलज्ञानमपि परिणमति समुत्पद्यते । येषां किं । **अंबरि जाहं णिवासु** रागद्वेषमोहरूपविकल्पजालशून्यं अंबरे अंबरशब्दवाच्ये शुद्धात्मसम्यक्श्रद्धानज्ञानानुचरणरूपे निर्विकल्पत्रिगुप्तिगुप्तपरमसमाधौ येषां निवास इति । अयमत्र

जाते हैं शरीर हलका हो जाता है परंतु मुक्ति इस वायुधारणासे नहीं होती, क्योंकि वायुधारणा शरीरका धर्म है आत्माका स्वभाव नहीं है । शुद्धोपयोगियोंके सहज ही विना यत्नके मन भी रुक जाता है और श्वास भी स्थिर हो जाते हैं । शुभोपयोगियोंके मनके रोकनेकेलिये प्राणायामका अभ्यास है मनके अचल होनेपर कुछ प्रयोजन नहीं है । जो आत्मस्वरूप है वह केवल चेतनामई ज्ञान दर्शनस्वरूप है सो शुद्धोपयोगी तो स्वरूपमें अतिलीन हैं और शुभोपयोगी कुछ एक मनकी चपलतासे आनंदघनमें अडोल अवस्थाको नहीं पाते तवतक मनके वश करनेकेलिये श्री पंच परमेष्ठीका ध्यान स्मरण करते हैं और ओंकारादि मंत्रोंका ध्यान करते हैं । और प्राणायामका अभ्यास कर मनको रोकके चिद्रूपमें लगाते हैं जब वह लगगया तव मन और पवन सब स्थिर हो जाते हैं । शुभोपयोगियोंकी दृष्टि एक शुद्धोपयोगपर है पातंजलिमतकी तरह थोथी वायुधारणा नहीं है । जो वायुधारणाकर ही मुक्ति होवे तो वायुधारणाके करनेवालोंको इस दुःषमकालमें मोक्ष क्यों न होवे कभी नहीं होती । मोक्ष तो केवल स्वभावमई है ॥ २९३ ॥

आगे फिर भी परमसमाधिका कथन करते हैं;—[**येषां**] जिन मुनीश्वरोंका [**अंबरे**] परमसमाधिमें [**निवासः**] निवास है उनका [**मोहः**] मोह [**विलीयते**] नाशको प्राप्त हो जाता है [**मनः**] मन [**म्रियते**] मरजाता है [**श्वासोच्छ्वासः**] श्वासोच्छ्वास [**त्रुट्यति**] रुक जाता है [**अपि**] और [**केवलज्ञानं**] केवलज्ञान [**परिणमति**] उत्पन्न होता है । **भावार्थ**—दर्शनमोह और चारित्रमोह आदि कल्पनाजाल सब विलय हो जाता है, इस लोक परलोक आदिकी वांछा आदि विकल्प जालरूप मन स्थिर हो

भावार्थः । अंबरशब्देन शुद्धाकाशं न ग्राह्यं किंतु विषयकषायविकल्पशून्यः परमसमाधिर्ग्राह्यः, वायुशब्देन च कुंभकरेचकपूरकादिरूपो वायुनिरोधो न ग्राह्यः किं तु स्वयमनीहितवृत्त्या निर्विकल्पसमाधिबलेन दशमद्वारसंज्ञेन ब्रह्मरंध्रसंज्ञेन सूक्ष्माभिधानरूपेण च तालुरंध्रेण योसौ गच्छति स एव ग्राह्यः तत्र । यदुक्तं केनापि । "मणु मरइ पवणु जहिं खयहं जाइ । सव्वंगइ तिहुवणु तहि जे ठाइ मूढा अंतरालु परियाणहि तुट्टइ मोहजालु जइ जाणहि" । अत्र पूर्वोक्तलक्षणमेव मनोमरणं ग्राह्यं पवनक्षयोपि पूर्वोक्तलक्षण एव त्रिभुवनप्रकाशक आत्मा तत्रैव निर्विकल्पसमाधौ तिष्ठतीत्यर्थः । अंतरालशब्देन तु रागादिपरभावशून्यत्वं ग्राह्यं न चाकाशे ज्ञाते सति मोहजालं नश्यति न चान्यादृशं परिकल्पितं ग्राह्यमित्यभिप्रायः ॥ २९४ ॥

जाता है और श्वासोच्छ्वासरूप वायु रुक जाती है श्वासोच्छ्वास अवांछीकपनेसे नासिकाके द्वारको छोड़कर तालुछिद्रमें होके निकलते हैं तथा कुछ देरके वाद नासिकासे निकलते हैं । इस प्रकार श्वासोच्छ्वासरूप पवन वश हो जाता है । चाहे जिस द्वारसे निकालो । केवलज्ञान भी शीघ्र ही उन ध्यानी मुनियोंके उत्पन्न होता है कि जिन मुनियोंका राग-द्वेषमोहरूप विकल्पजालसे रहित शुद्धात्माका सम्यक् श्रद्धान ज्ञान आचरणरूप निर्विकल्प त्रिगुप्तिमई परमसमाधिमें निवास है । यहां अंबर नाम आकाशका अर्थ नहीं समझना किंतु समस्तविषयकषायरूप विकल्पजालोंसे शून्य परमसमाधि लेना । और यहां वायु शब्दसे कुंभक पूरक रेचकादिरूप वांछापूर्वक वायुनिरोध न लेना किंतु स्वयमेव अवांछीक वृत्तिकर निर्विकल्पसमाधिके बलसे ब्रह्मद्वार नामा सूक्ष्म छिद्र जिसको तालु-वेका रंध्र कहते हैं उसके द्वारा अवांछीक वृत्तिसे पवन निकलता है वह लेना । ध्यानी मुनियोंके पवन रोकनेका यत्न नहीं होता है विना ही यत्नके सहज ही पवन रुक जाता है और मन भी अचल हो जाता है ऐसा समाधिका प्रभाव है । ऐसा दूसरी जगह भी कहा है कि, जो मूढ हैं वे तो अंबरका अर्थ आकाशको जानते हैं और जो ज्ञानी जन हैं वे अंबरका अर्थ परमसमाधिरूप निर्विकल्प जानते हैं । सो निर्विकल्प ध्यानमें मन मरजाता है पवनका सहज ही निरोध होता है और सब अंग तीन भुवनके समान हो जाता है । जो परम समाधिको जानै तो मोह टूट जावे । मनके विकल्पोंका मिटना वही मनका मरना है और वही श्वासका रुकना है जो कि सब द्वारोंसे रुककर दशवें द्वारमेंसे होकर निकले । तीन लोकका प्रकाशक आत्माको निर्विकल्प समाधिमें स्थापित करता है । अंतराल शब्दका अर्थ रागादि भावोंसे शून्य दशा लेना आकाशका अर्थ न लेना । आकाशके जाननेसे मोहजाल नहीं मिटता आत्मस्वरूपके जाननेसे मोहजाल मिटता है । जो पातंजलि आदि परमसमयमें शून्यरूप समाधि कही है वह अभिप्राय नहीं लेना, क्योंकि जब विभावोंकी शून्यता हो जावेगी तब वस्तुका ही अभाव हो जाइगा ॥ २९४ ॥

अथ;—

जो आयासइं मणु धरइ, लोयालोयपमाणु।
तुट्टइ मोहु तडत्ति तसु, पावइ परह पवाणु ॥ २९५ ॥

यः आकाशे मनो धरति लोकालोकप्रमाणम् ।
त्रुट्यति मोहो झटिति तस्य प्राप्नोति परस्य प्रमाणम् ॥ २९५ ॥

जो इत्यादि । **जो** यो ध्याता पुरुषः **आयासइं मणु धरइ** यथा परद्रव्यसंबंधरहितत्वेनाकाशमंबरशब्दवाच्यं शून्यमित्युच्यते तथा वीतरागचिदानंदैकस्वभावेन भरितावस्थोपि मिथ्यात्वरागादिपरभावरहितत्वान्निर्विकल्पसमाधिराकाशमंबरशब्दवाच्यं शून्यमित्युच्यते । तत्राकाशसंज्ञे निर्विकल्पसमाधौ मनो धरति स्थिरं करोति । कथंभूतं मनः । **लोयालोयपमाणु** लोकालोकप्रमाणं लोकालोकव्याप्तिरूपं अथवा प्रसिद्धलोकालोकाकाशे व्यवहारेण ज्ञानापेक्षया न च प्रदेशापेक्षया लोकालोकप्रमाणं मनो मानसं ज्ञानं धरति **तुट्टइ मोहु तडत्ति तसु** त्रुट्यति नश्यति । कोसौ । **मोहु** मोहः । कथं । झटिति तस्य ध्यानात् । न केवलं मोहो नश्यति । **पावइ** प्राप्नोति । किं । **परहं पवाणु** परस्य परमात्मस्वरूपस्य प्रमाणं । कीदृशं तत्प्रमाणमितिचेत् । व्यवहारेण रूपग्रहणविषये चक्षुरिव सर्वगतः । यदि पुनर्निश्चयेन सर्वगतो भवति तर्हि चक्षुषो अग्निस्पर्शदाहः प्राप्नोति न च तथा, । तथात्मनोपि परकीयसुखदुःखविषये तन्मयपरिणामत्वेन परकीयसुखदुःखानुभवं प्राप्नोति न च तथा ।

आगे फिर भी निर्विकल्पसमाधिका कथन करते हैं;—[**यः**] जो ध्यानी पुरुष [**आकाशे**] निर्विकल्पसमाधिमें [**मनः**] मन [**धरति**] स्थिर करता है [**तस्य**] उसीका [**मोहः**] मोह [**झटिति**] शीघ्र [**त्रुट्यति**] टूट जाता है और ज्ञानकरके [**परस्य प्रमाणं**] लोकालोकप्रमाण आत्माको [**प्राप्नोति**] प्राप्त होजाता है । **भावार्थ**— आकाश अर्थात् वीतरागचिदानंद स्वभाव अनंत गुणरूप और मिथ्यात्वरागादिपरभावरहितस्वरूप निर्विकल्पसमाधि यहां समझना । जैसे आकाशद्रव्य सब द्रव्योंसे भरा हुआ है परंतु सबसे शून्य अपने स्वरूप है उसीप्रकार चिद्रूप आत्मा रागादि सब उपाधियोंसे रहित है शून्यरूप है इसलिये आकाश शब्दका अर्थ यहां शुद्धात्मस्वरूप लेना । व्यवहारनयकर ज्ञान लोकालोकका प्रकाशक है और निश्चयनयकर अपने स्वरूपका प्रकाशक है । आत्माका केवलज्ञान लोकालोकको जानता है इसकारण ज्ञानकी अपेक्षा लोकालोकप्रमाण कहा जाता है प्रदेशोंकी अपेक्षा लोकालोकप्रमाण नहीं है । ज्ञानगुण लोकालोकमें व्याप्त है परंतु परद्रव्योंसे भिन्न है । परवस्तुसे जो तन्मयी हो जावे तो वस्तुका अभाव हो जावे । इसलिये यह निश्चय हुआ कि ज्ञानगुणकर लोकालोकप्रमाण जो आत्मा उसे आकाश भी कहते हैं उसमें जो मन लगावे तब जगतसे मोह दूर हो और परमात्माको पावे ।

निश्चयेन पुनर्लोकमात्रासंख्येयप्रदेशोपि सन् व्यवहारेण पुनः शरीरकृतोपसंहारविस्तारवशाद्विवक्षितभाजनस्थप्रदीपवत् देहमात्र इति भावार्थः ॥ २९५ ॥

अथ;—

देहि वसंतुवि णवि मुणिउ, अप्पा देउ अणंतु ।
अंबरि समरसि मणु धरिवि, सामिय णट्ठु णिभंतु ॥ २९६ ॥

देहे वसन्नपि नैव मतः आत्मा देवः अनंतः ।
अंबरे समरसे मनः धृत्वा स्वामिन् नष्टो निर्भ्रांतः ॥ २९६ ॥

देहि वसंतुवि इत्यादि । **देहि वसंतुवि** व्यवहारेण देहे वसन्नपि **णवि मुणिउ** नैव ज्ञातः । कोसौ । **अप्पा** निजशुद्धात्मा । किं विशिष्टः । **देउ** आराधनायोग्यः केवलज्ञानाद्यनंतगुणाधारत्वेन देवः परमाराध्यः । पुनरपि किंविशिष्टः । **अणंतु** अनंतपदार्थपरिच्छित्तिकारणत्वादविनश्वरत्वादनंतः । किं कृत्वा । **मणु धरिवि** मनो धृत्वा । क । **अंबरि** अंबरशब्दवाच्ये पूर्वोक्तलक्षणे रागादिशून्ये निर्विकल्पसमाधौ । कथंभूते । **समरसि** वीतरागतात्त्विकमनोहरानंदस्यंदिनि समरसीभावे साध्ये **सामिय** हे स्वामिन् । प्रभाकरभट्टः पश्चात्तापमनुशयं कुर्वन्नाह । किं ब्रूते । **णट्ठु णिभंतु** इयंतं कालमित्थंभूतं परमात्मोपदेश-

---

व्यवहारनयकर आत्मा ज्ञानकर सबको जानता है इसलिये सब जगतमें हैं । जैसे व्यवहारनयकर नेत्र रूपीपदार्थको जानता है परंतु उन पदार्थोंसे भिन्न है । जो निश्चयकर सर्वगत होवे तो परपदार्थोंसे तन्मयी हो जावे जो उनसे तन्मयी होवे तो नेत्रोंको अग्निका दाह होना चाहिये इसकारण तन्मयी नहीं है । उसीप्रकार आत्मा जो पदार्थोंको तन्मयी होके जाने तो परके सुख दुःखसे तन्मई होनेसे इसको भी दूसरेका सुख दुःख मालूम होना चाहिये ऐसा होता नहीं है । इसलिये निश्चयसे आत्मा असर्वगत है और व्यवहारनयसे सर्वगत है प्रदेशोंकी अपेक्षा निश्चयसे लोकप्रमाण असंख्यात प्रदेशी है और व्यवहारनयकर पात्रमें रखे हुए दीपककी तरह देह प्रमाण है जैसा शरीर धारणकरे वैसा प्रदेशोंका संकोच विस्तार हो जाता है ॥ २९५ ॥

आगे फिर भी शिष्य प्रश्न करता है;—[**स्वामिन्**] हे स्वामी [**देहे वसन्नपि**] व्यवहारनयकर देहमें रहता हुआ भी [**आत्मा देवः**] आराधने योग्य आत्मा [**अनंतः**] अनंत गुणोंका आधार [**नैव मतः**] मैंने अज्ञानतासे नहीं जाना । क्या करके । [**समरसे**] समानभावरूप [**अंबरे**] निर्विकल्प समाधिमें [**मनः धृत्वा**] मन लगाकर । इसलिये अब तक [**नष्टो निर्भ्रांतः**] निस्संदेह नष्ट हुआ । **भावार्थ**—प्रभाकरभट्ट पछताता हुआ श्री योगींद्रदेवसे वीनती करता है कि हे स्वामिन् मैंने अबतक रागादि विभावरहित निर्विकल्पसमाधिमें मन लगाकर आत्म देव नहीं जाना इसीलिये इतने

मलभमानःसन् निर्भ्रांतो नष्टोऽहमित्यभिप्रायः ॥ २९६ ॥ एवं परमोपदेशकथनमुख्यत्वेन सूत्रदशकं गतं ।

अथ परमोपशमभावसहितेन सर्वसंगपरित्यागेन संसारविच्छेदं भवतीति युग्मेन निश्चिनोति;—

सयलवि संग ण मिल्लिया, णवि किउ उवसमभाउ ।
सिवपयमग्गुवि मुणिउ णवि, जहिं जोइहिं अणुराउ ॥ २९७ ॥
घोरु ण चिण्णउ तवचरणु, जं णियबोहहं सारु ।
पुण्णुवि पाउवि दड्ढु णवि, किमु छिज्जइ संसारु ॥ २९८ ॥

सकला अपि संगा न मुक्ताः नैव कृत उपशमभावः ।
शिवपदमार्गोपि मतो नैव यत्र योगिनां अनुरागः ॥ २९७ ॥
घोरं न चीर्णं तपश्चरणं यत् निजबोधेन सारम् ।
पुण्यमपि पापमपि दग्धं नैव किं छिद्यते संसारः ॥ २९८ ॥

सयलवि इत्यादि । **सयलवि** समस्ता अपि **संग** मिथ्यात्वादिचतुर्दशभेदभिन्ना अभ्यंतराः क्षेत्रवास्त्वादिबहुभेदभिन्ना बाह्या अपि संगाः परिग्रहा **ण मिल्लिया** न मुक्ताः । पुनरपि किं न कृतं । **णवि किउ उवसमभाउ** जीवितमरणलाभालाभसुखदुःखादिसमताभावलक्षणो नैव कृतः उपशमभावः । पुनश्च किं न कृतं । **सिवपयमग्गुवि मुणिउ णवि** "शिवं परमकल्याणं निर्वाणं शांतमक्षयं । प्राप्तं मुक्तिपदं येन स शिवः परिकीर्तितः" इति वचनात् शिवशब्दवाच्यो योसौ मोक्षस्तस्य मार्गोपि न ज्ञातः । कथंभूतो मार्गः । स्वशुद्धात्मसम्यक्श्रद्धानज्ञानानुचरणरूपः । यत्र मार्गे किं । **जहिं जोइहिं अणुराउ** यत्र निश्चयमोक्षमार्गे परमयोगिनामनुरागस्तात्पर्यं । न केवलं मोक्षमार्गोपि न ज्ञातः । **घोरु ण चिण्णउ तवचरणु** घोरं दुर्धरं परीषहोपसर्गजयरूपं नैव चीर्णं न कृतं । किं तत् । अनशनादिद्वाद-

---

कालतक संसारमें भटका । निजस्वरूपकी प्राप्तिके विना मैं नष्ट हुआ । अव ऐसा उपदेश कहो कि जिससे भ्रम मिट जावे ॥ २९६ ॥ इस प्रकार परमोपदेशके कथनकी मुख्यतासे दस दोहा कहे हैं ।

आगे परमोपदेश भाव सहित सव परिग्रहका त्याग करनेसे संसारका विच्छेद होता है ऐसा दो दोहाओंमें निश्चय करते हैं;—[**सकला अपि संगाः**] सव परिग्रह भी [**न मुक्ताः**] नहीं छोड़े [**उपशमभावः नैव कृतः**] समभाव भी नहीं किया [**यत्र योगिनां अनुरागः**] और जहां योगीश्वरोंका प्रेम है ऐसा [**शिवमार्गोपि**] मोक्ष पद भी [**नैव मतः**] नहीं जाना [**घोरं तपश्चरणं**] महा दुर्धर तप [**न चीर्णं**] नहीं

शविधं तपश्चरणं । यत्कथंभूतं । **जं णियबोहहं सारु** यत्तपश्चरणं वीतरागनिर्विकल्पस्वसंवेदनलक्षणेन निजबोधेन सारभूतं । पुनश्च किं न कृतं । **पुण्णुवि पाउवि** निश्चयनयेन शुभाशुभनिगलद्वयरहितस्य संसारिजीवस्य व्यवहारेण सुवर्णलोहनिगलद्वयसदृशं पुण्यपापद्वयमपि **दड्ढ णवि** शुद्धात्मद्रव्यानुभवरूपेण ध्यानाग्निना दग्धं नैव **किमु छिज्जइ संसारु** कथं छिद्यते संसार इति । अत्रेदं व्याख्यानं ज्ञात्वा निरंतरं शुद्धात्मद्रव्यभावना कर्तव्येति तात्पर्यं ॥ २९७ ॥ २९८ ॥

अथ दानपूजापंचपरमेष्ठिवंदनादिरूपं परंपरया मुक्तिकारणं श्रावकधर्मं कथयति;—

दाणु ण दिण्णउ मुणिवरहं, णवि पुज्जिउ जिणणाहु ।
पंच ण वंदिय परमगुरु, किमु होसइ सिवलाहु ॥ २९९ ॥

दानं न दत्तं मुनिवराणां नापि पूजितः जिननाथः ।
पंच न वंदिता परमगुरवः किं भविष्यति शिवलाभः ॥ २९९ ॥

किया [**यत्**] जो कि [**निजबोधेन सारं**] आत्मज्ञानकर शोभायमान है [**पुण्यमपि पापमपि**] और पुण्य तथा पाप ये दोनों [**नैव दग्धं**] नहीं भस्म किये तो [**संसारः**] संसार [**किं छिद्यते**] कैसे छूट सकता है । **भावार्थ**—मिथ्यात्व (अतत्वश्रद्धा) राग (प्रीतिभाव) दोष (वैरभाव) वेद (स्त्री पुरुष नपुंसक) क्रोध मान माया लोभरूप चार कषाय और हास्य रति अरति शोक भय ग्लानि—ये चौदह अंतरंग परिग्रह, क्षेत्र (ग्रामादिक) वास्तु (गृहादिक) हिरण्य (रुपय्या मौहर आदि) सुवर्ण (गहने आदि) धन (हाथी घोड़ा आदि) धान्य (अन्नादि) दासीदास, कुप्य (वस्त्र तथा सुगंधादिक) भांड (वर्तन आदि) ये दस तरहके बाहरके परिग्रह, इस प्रकार बाह्य अभ्यंतर परिग्रहके चौवीस भेद हुए इनको नहीं छोड़ा । जीवित मरण सुख दुःख लाभ अलाभादिमें समान भाव कभी नहीं किया कल्याणरूप मोक्षका मार्ग सम्यग्दर्शन ज्ञान चरित्र भी नहीं जाने । निजस्वरूपका श्रद्धान निजस्वरूपका ज्ञान और निजस्वरूपका आचरणरूप निश्चयरत्नत्रय तथा नव पदार्थोंका श्रद्धान नव पदार्थोंका ज्ञान और अशुभक्रियाका त्यागरूप व्यवहाररत्नत्रय-ये दोनों ही मोक्षके मार्ग हैं इन दोनोंमेंसे निश्चयरत्नत्रय तो साक्षात् मोक्षका मारग है और व्यवहाररत्नत्रय परंपराय मोक्षका मार्ग है । ये दोनों मैंने कभी नहीं जाने संसारका ही मार्ग जाना । अनशनादि बारहप्रकारका तप नहीं किया बाईस परीषह नहीं सहन कीं । तथा पुण्य सुवर्णकी वेड़ी पाप लोहेकी वेड़ी सो ये दोनों बंधन निर्मल आत्मध्यानरूपी अग्निसे भस्म नहीं किये । इन वातोंके विना किये संसारका विच्छेद नहीं होता संसारसे मुक्त होनेके येही कारण है । ऐसा व्याख्यान जानकर हमेशां शुद्धात्मस्वरूपकी भावना करनी चाहिये ॥ २९७ ॥ २९८ ॥

दाणु इत्यादि । **दाणु ण दिण्णउ** आहाराभयभैषज्यशास्त्रभेदेन चतुर्विधदानं भक्तिपूर्वकं न दत्तं । केषां । **मुणिवरहं** निश्चयव्यवहाररत्नत्रयाराधकानां मुनिवरादिचतुर्विधसंघस्थितानां पात्राणां **णवि पुज्जिउ** जलधारया सह गंधाक्षतपुष्पाद्यष्टविधपूजया न पूजितः । कोसौ । **जिणणाहु** देवेंद्रधरणेंद्रनरेंद्रपूजितः केवलज्ञानाद्यनंतगुणपरिपूर्णः पूज्यपदस्थितो जिननाथः **पंच ण वंदिय** पंच न वंदिताः । के ते । **परमगुरु** त्रिभुवनाधीशवंद्यपदस्थिता अर्हत्सिद्धाः त्रिभुवनेशवंद्यमोक्षपदाराधकाः आचार्योपाध्यायसाधवश्चेति पंचगुरवः **किमु होसइ सिव-लाहु** शिवशब्दवाच्यमोक्षपदस्थितानां तदाराधकानामाचार्यादीनां च यथायोग्यं दानपूजावं-दनादिकं न कृतं कथं शिवशब्दवाच्यमोक्षसुखस्य लाभो भविष्यति न कथमपीति । अत्रेदं व्याख्यानं ज्ञात्वा उपासकाध्ययनशास्त्रकथितमार्गेण विधिद्रव्यदातृपात्रलक्षणविधानेन दातव्यं पूजावंदनादिकं च कर्तव्यमिति भावार्थः ॥ २९९ ॥

अथ निश्चयेन चिंतारहितध्यानमेव मुक्तिकारणमिति प्रतिपादयति चतुष्कलेन;—

अद्धुम्मीलियलोयणिहिं, जोउ किं झंपियएहिं ।
एमुइ लब्भइ परमगइ, णिच्चिंति ठियएहिं ॥ ३०० ॥

आगे दानपूजा और पंच परमेष्ठीकी वंदना आदि परंपरा मुक्तिका कारण जो श्राव-कधर्म उसे कहते हैं;—[**दानं**] आहारादि दान [**मुनिवराणां**] मुनीश्वर आदि पात्रोंको [**न दत्तं**] नहीं दिया [**जिननाथः**] जिनेन्द्र भगवानको भी [**नापि पूजितः**] नहीं पूजा [**पंच परमगुरवः**] अरहंत आदिक पांच परमेष्ठी [**न वंदिताः**] भी नहीं पूजे तब [**शिवलाभः**] मोक्षकी प्राप्ति [**किं भविष्यति**] कैसे हो सकती है । **भावार्थ**—आहार औषध शास्त्र और अभयदान-ये चार प्रकारके दान भक्तिपूर्वक पात्रोंको नहीं दिये अर्थात् निश्चय व्यवहाररत्नत्रयके आराधक जो यती आदि चार प्रकार संघ उनको चार प्रकारका दान भक्तिकर नहीं दिया, और दुःखी भूंखे जीवोंको करुणाभावसे दान नहीं दिया । इंद्र नागेंद्र नरेन्द्र आदिकर पूज्य केवलज्ञानादि अनंतगुणोंकर पूर्ण जिनना-थकी पूजा नहीं की-जल चंदन अक्षत पुष्प नैवेद्य दीप धूप फलसे पूजा नहीं की और तीनलोककर वंदने योग्य ऐसे अरहंत सिद्ध आचार्य उपाध्याय साधु इन पांच परमेष्ठि-योंकी आराधना नहीं की । सो हे जीव इन कार्योंके विना तुझे मुक्तिका लाभ कैसे होगा । क्योंकि मोक्षकी प्राप्तिके ये ही उपाय हैं कि जिन पूजा पंचपरमेष्ठीकी वंदना और चारसंघको चारप्रकार दान इन विना मुक्ति नही हो सकती । ऐसा व्याख्यान जानकर सातवें उपासकाध्ययन अंगमें कही गई जो दान पूजा वंदनादिककी विधि वही करनी योग्य है । शुभविधीसे न्यायकर उपार्जन किया अच्छा द्रव्य वह दातारके अच्छे गुणोंको धारणकर विधिसे पात्रको देना, जिनराजकी पूजा करना और पंच परमेष्ठीकी वंदना करना, ये ही व्यवहारनयकर कल्याणका उपाय है ॥ २९९ ॥

अर्धोन्मीलितलोचनाभ्यां योगः किं झंपिताभ्याम् ।
एवमेव लभ्यते परमगतिः निश्चितं स्थितैः ॥ ३०० ॥

अद्धुम्मीलिय लोयणिहिं अर्धोन्मीलितलोचनपुटाभ्यां **जोउ किं** योगो ध्यानं किं भवति अपि तु नैव । न केवलमर्धोन्मीलिताभ्यां । **झंपियएहिं** झंपिताभ्यामपि लोचनाभ्यां नैवेति । तर्हि कथं लभ्यते । **एमुइ लब्भइ** एवमेव लभ्यते लोचनपुटनिमीलनोन्मीलननिरपेक्षैः । का लभ्यते । **परमगइ** केवलज्ञानादिपरमगुणयोगात्परमगतिर्मोक्षगतिः । कैः लभ्यते । **णिच्चिंति ठियएहिं** ख्यातिपूजालाभप्रभृतिसमस्तचिंताजालरहितैः पुरुषैश्चिंतारहितैः स्वशुद्धात्मरूपस्थितैश्चेत्यभिप्रायः ॥ ३०० ॥

अथ;—

जोइय मिल्लहि चिंत जइ, तो तुट्टइ संसारु ।
चिंतासत्तउ जिणवरुवि, लहइ ण हंसाचारु ॥ ३०१ ॥

योगिन् मुंचसि चिंतां यदि ततः त्रुट्यति संसारः ।
चिंतासक्तो जिनवरोपि लभते न हंसचारं ॥ ३०१ ॥

जोइय इत्यादि । **जोइय** हे योगिन् **मिल्लहि** मुंचसि । कां । चिंतारहिताद्विशुद्धज्ञानदर्शनस्वभावात्परमात्मपदार्थाद्विलक्षणां **चिंतां जइ** यदि चेन **तो** ततश्चिंताभावात् । किं भवति । **तुट्टइ** नश्यति । स कः । **संसारु** निःसंसारात् शुद्धात्मद्रव्यात् विलक्षणो द्रव्यक्षेत्रकालादिभेदभिन्नः पंचप्रकारः संसारः । यतः कारणात् **चिंतासत्तउ जिणवरुवि** छद्मस्थावस्थायां शुभाशुभचिंतासक्तो जिनवरोपि **लहइ ण** लभते न । कं । **हंसाचारु** संशयवि-

---

आगे निश्चयसे चिंतारहित ध्यान ही मुक्तिका कारण है ऐसा कहते हैं;—[**अर्धोन्मीलितलोचनाभ्यां**] आधे उघड़े हुए नेत्रोंसे अथवा [**झंपिताभ्यां**] बंद हुए नेत्रोंसे [**किं**] क्या [**योगः**] ध्यानकी सिद्धि होती है कभी नहीं । [**निश्चितं स्थितैः**] जो चिंता रहित एकाग्रमें स्थित हैं उनको [**एवमेव**] इसीतरह [**लभ्यते परमगतिः**] स्वयमेव परमगति (मोक्ष) मिलती है । **भावार्थ**—ख्याति (वड़ाई) पूजा (अपनी प्रतिष्ठा) और लाभ इनको आदि लेकर समस्त चिंताओंसे रहित जो निश्चित पुरुष हैं वे ही शुद्धात्मस्वरूपमें स्थिरता पाते हैं उनहींके ध्यानकी सिद्धि है और वे ही परमगतिके पात्र हैं ॥ ३०० ॥

आगे फिर भी चिंताका ही त्याग वतलाते हैं;—[**योगिन्**] हे योगी [**यदि**] जो तू [**चिंतां मुंचसि**] चिंताओंको छोडेगा [**ततः**] तो [**संसारः**] संसारका भ्रमण [**त्रुट्यति**] छूट जायगा क्योंकि [**चिंतासक्तः**] चिंतामें लगे हुए [**जिनवरोपि**] छद्मस्थ अवस्थावाले तीर्थंकर देव भी [**हंसचारं न लभते**] परमात्माका आचरणरूप

भ्रमविमोहरहितानंतज्ञानादिनिर्मलगुणयोगेन हंस इव हंसः परमात्मा तस्य चारं रागादिरहितं शुद्धात्मपरिणाममिति । अत्रेदं व्याख्यानं ज्ञात्वा दृष्टश्रुतानुभूतभोगाकांक्षाप्रभृतिसमस्तचिंताजालं त्यक्त्वापि चिंतारहिते शुद्धात्मतत्त्वे सर्वतात्पर्येण भावना कर्तव्येति तात्पर्यं ॥

अथ;—

जोइय दुम्मइ कवुण तुह, भवकारणि ववहारि ।
बंभु पवंचहिं जो रहिउ, सो जाणिवि मणु मारि ॥ ३०२ ॥

योगिन् दुर्मतिः का तव भवकारणे व्यवहारे ।
ब्रह्म प्रपंचैर्यत् रहितं तत् ज्ञात्वा मनो मारय ॥ ३०२ ॥

जोइय इत्यादि । **जोइय** हे योगिन् **दुम्मइ कवुण तुह** दुर्मतिः का तवेयं **भवकारणि ववहारि** भवरहितान् शुभाशुभमनोवचनकायव्यापाररूपव्यवहारविलक्षणाच्च स्वशुद्धात्मद्रव्यात्प्रतिपक्षभूते पंचप्रकारसंसारकारणे व्यवहारे । तर्हि किं करोमीति चेत् । **बंभु** ब्रह्मशब्दवाच्यं स्वशुद्धात्मानं ज्ञात्वा । कथंभूतं यत् । **पवंचहिं जो रहिउ** यत्प्रपंचरहितं । पश्चात्किं कुरु । **सो जाणिवि** तं निजशुद्धात्मानं वीतरागस्वसंवेदनज्ञानेन ज्ञात्वा । पश्चात्किं कुरु । **मणु मारि** अनेकमानसविकल्पजालरहिते परमात्मनि स्थित्वा शुभाशुभविकल्पजालरूपं मनो मारय विनाशयेति भावार्थः ॥ ३०२ ॥

शुद्ध भावोंको नहीं पाते । **भावार्थ**—हे योगी निर्मल ज्ञान दर्शन स्वभाव परमात्मपदार्थसे पराङ्मुख जो चिंताजाल उसे छोड़ेगा तभी चिंताके अभावसे संसार भ्रमण टूटेगा । शुद्धात्म द्रव्यसे विमुख जो द्रव्य क्षेत्र काल भव भावरूप पांचप्रकारके संसारसे तू मुक्त होगा । जबतक चिंतावान है तबतक निर्विकल्प ध्यानकी सिद्धि नहीं हो सकती । दूसरोंकी तो क्या बात है जो तीर्थंकरदेव भी केवल अवस्थाके पहले जबतक कुछ शुभाशुभ चिंताकर सहित हैं तबतक वे भी रागादिरहित शुद्धोपयोगपरिणामोंको नहीं पासकते । संशय विमोह विभ्रमरहित अनंत ज्ञानादि निर्मलगुण सहित हंसके समान उज्ज्वल परमात्माके शुद्ध भाव हैं वे चिंताके विना छोड़े नहीं होते । तीर्थंकर देव भी मुनि होके निश्चित व्रत धारण करते हैं तभी परमहंस दशा पाते हैं ऐसा व्याख्यान जानकर देखे सुने भोगे हुए भोगोंकी वांछा आदि समस्तचिंताजालको छोड़कर परम निश्चित हो शुद्धात्माकी भावना करना योग्य है ॥ ३०१ ॥

आगे श्रीगुरु मुनियोंको उपदेश देते हैं कि मनको मारकर परमब्रह्मका ध्यान करो;—
[**योगिन्**] हे योगी [**तव का दुर्मतिः**] तेरी क्या खोटी बुद्धि है जो तू [**भवकारणे व्यवहारे**] संसारके कारण उद्यमरूप व्यवहार करता है । अब तू [**प्रपंचैः रहितं**] मायाजालरूप पाखंडोंसे रहित [**यत् ब्रह्म**] जो शुद्धात्मा है [**तत् ज्ञात्वा**] उसको

अथ;—

सव्वहिं रायहिं छहिं रसहिं, पंचहिं रूवहिं जंतु ।
चित्तु णिवारिवि झाइ तुहुं, अप्पा देउ अणंतु ॥ ३०३ ॥

सर्वैः रागैः षड्भिः रसैः पंचभिः रूपैः गच्छत् ।
चित्तं निवार्य ध्याय त्वं आत्मानं देवमनंतम् ॥ ३०३ ॥

सव्वहिं इत्यादि । **झाइ** ध्याय चिंतय **तुहुं** त्वं हे प्रभाकरभट्ट । कं । **अप्पा** स्वशुद्धात्मानं । कथंभूतं । **देउ** वीतरागपरमानंदसुखेन दीव्यति क्रीडति इति देवस्तं देवं । पुनरपि कथंभूतं । **अणंतु** केवलज्ञानाद्यनंतगुणाधारत्वादनंतसुखास्पदत्वादविनश्वरत्वाच्चानंतस्तमनंतं । किं कृत्वा पूर्वं । **चित्तु णिवारिवि** चित्तं निवार्य व्यावृत्य । किं कुर्वन् सन् । **जंतु** गच्छत्परिणममानं सत् । कैः करणभूतैः । **सव्वहिं रायहिं** वीतरागात्स्वशुद्धात्मद्रव्याद्विलक्षणैः सर्वशुभाशुभरागैः । न केवलं रागैः । **छहिं रसहिं** रसनारहिताद्वीतरागसदानंदैकरसपरिणतादात्मनो विपरीतैः गुडलवणदधिदुग्धतैलघृतषड्रसैः । पुनरपि कैः । **पंचहिं रूवहिं** अरूपात् शुद्धात्मतत्त्वात्प्रतिपक्षभूतैः कृष्णनीलरक्तश्वेतपीतपंचरूपैरिति तात्पर्यं ॥ ३०३ ॥

अथ येन स्वरूपेण चिंत्यते परमात्मा तेनैव परिणमतीति निश्चिनोति;—

जेण सरूविं झाइयइ, अप्पा एहु अणंतु ।
तेण सरूविं परिणवइ, जिमु फलिहउमणि मंतु ॥ ३०४ ॥

जानकर [**मनो मारय**] विकल्पजालरूपी मनको मार । **भावार्थ**—वीतरागस्वसंवेदनज्ञानसे शुद्धात्माको जानकर शुभाशुभविकल्पजालरूप मनको मारो । मनके विना वश किये निर्विकल्पध्यानकी सिद्धि नहीं होती । मनके अनेकविकल्पजालोंसे जो शुद्ध आत्मा उसमें निश्चलता तभी होती है जब कि मनको मारके निर्विकल्प दशाको प्राप्त होवे । इसलिये सकल शुभाशुभ व्यवहारको छोड़के शुद्धात्माको जानो ॥ ३०२ ॥

आगे यही कहते हैं कि सब विषयोंको छोडकर आत्मदेवको ध्यावो;—हे प्रभाकर भट्ट [**त्वं**] तू [**सर्वैः रागैः**] सब शुभाशुभरागोंसे [**षड्भिः रसैः**] छहों रसोंसे [**पंचभिः रूपैः**] पांच रूपोंसे [**गच्छत् चित्तं**] चलायमान चित्तको [**निवार्य**] रोककर [**अनंतं**] अनंतगुणवाले [**आत्मानं देवं**] आत्मदेवका [**ध्याय**] चिंतवनकर । **भावार्थ**—वीतराग परम आनंद सुखमें क्रीडा करने वाले केवलज्ञानादि अनंतगुणवाले अविनाशी शुद्ध आत्माका एकाग्रचित्त होकर ध्यान कर । क्या करके? वीतराग शुद्धात्मद्रव्यसे विमुख जो समस्त शुभाशुभराग, निजरससे विपरीत जो दधि दुग्ध तेल घी नोंन मिस्री ये छहरस और जो अरूप शुद्धात्मद्रव्यसे भिन्न काले सफेद हरे पीले लाल

येन स्वरूपेण ध्यायते आत्मा एषः अनंतः।

तेन स्वरूपेण परिणमति यथा स्फटिकमणिः मंत्रः॥ ३०४॥

जेण इत्यादि। **तेण सरूविं परिणवइ** तेन स्वरूपेण परिणमति। कोसौ कर्ता। **अप्पा** आत्मा **एहु** एष प्रत्यक्षीभूतः। पुनरपि किंविशिष्टः। **अणंतु** वीतरागानाकुलत्वलक्षणानंतशक्तिपरिणतत्वादनंतः। तेन केन। **जेण सरूवें झाइयइ** येन शुभाशुभशुद्धोपयोगरूपेण ध्यायते चिंत्यते। दृष्टांतमाह। **जह फलिहउमणि मंतु** यथा स्फटिकमणिः जपापुष्पाद्युपाधिपरिणतः गारुडादिमंत्रो वेति। अत्र विशेषव्याख्यानं तु "येन येन स्वरूपेण युज्यते यंत्रवाहकः। तेन तन्मयतां याति विश्वरूपो मणिर्यथा" इति श्लोकार्थकथितदृष्टांतेन ध्यातव्यः। इदमत्र तात्पर्यं। अयमात्मा येन येन स्वरूपेण चिंत्यते तेन तेन परिणमतीति ज्ञात्वा शुद्धात्मपदप्राप्त्यर्थिभिः समस्तरागादिविकल्पसमूहं त्यक्त्वा शुद्धरूपेणैव ध्यातव्य इति॥ ३०४॥

पांचतरहके रूप–इनमें निरंतर चित्त जाता है उसको रोककर आत्मदेवकी आराधना कर॥ ३०३॥

आगे आत्माको जिसरूपसे ध्यावो उसीरूप परिणमता है जैसे स्फटिकमणिके नीचे जैसा डंक दिया जाये वैसा ही रंग भासता है ऐसा कहते हैं;—[**एषः**] यह प्रत्यक्षरूप [**अनंतः**] अविनाशी [**आत्मा**] आत्मा [**येन स्वरूपेण**] जिस स्वरूपसे [**ध्यायते**] ध्याया जाता है [**तेन स्वरूपेण**] उसी स्वरूप [**परिणमति**] परिणमता है [**यथा स्फटिकमणिः मंत्रः**] जैसे स्फटिकमणि और गारुडी आदि मंत्र हैं। **भावार्थ**—यह आत्मा शुभ अशुभ शुद्ध इन तीन उपयोगरूप परिणमता है। जो अशुभोपयोगका ध्यान करे तो पापरूप परिणवे, शुभोपयोगका ध्यान करे तो पुण्यरूप परिणवे और जो शुद्धोपयोगको ध्यावे तो परमशुद्धरूप परिणमन करता है। जैसे स्फटिकमणिके नीचे जैसा डंक लगाओ अर्थात् श्याम हरा पीला लालमेंसे जैसा लगाओ उसीरूप स्फटिक मणि परिणमता है हरे डंकसे हरा और लालसे लाल भासता है। उसीतरह जीवद्रव्य जिस उपयोगरूप परिणमता है उसीरूप भासता है। और गारुडी आदि मंत्रोंमेंसे गारुडीमंत्र गरुडरूप भासता है जिससे कि सर्प डर जाता है। ऐसा ही कथन अन्य ग्रंथोंमें भी कहा है कि जिस २ रूपसे आत्मा परिणमता है उस २ रूपसे आत्मा तन्मयी हो जाता है जैसे स्फटिकमणि उज्वल है उसके नीचे जैसा डंक लगाओ वैसा ही भासता है। ऐसा जानकर आत्माका स्वरूप जानना चाहिये। जो शुद्धात्मपदकी प्राप्तिके चाहनेवाले हैं उनको यही योग्य है कि समस्त रागादिक विकल्पोंके समूहको छोडकर आत्माके शुद्धरूपको ध्यावें और विकारोंपर दृष्टि न रक्खें॥ ३०४॥

अथ चतुष्पादिकां कथयति;—

एहु जु अप्पा सो परमप्पा, कम्मविसेसें जायउ जप्पा ।
जामइ जाणइ अप्पें अप्पा, तामइं सो जि देउ परमप्पा ॥ ३०५ ॥

एष य आत्मा स परमात्मा कर्मविशेषेण जातः जाप्यः ।
यदा जानाति आत्मना आत्मानं तदा स एव परमात्मा ॥ ३०५ ॥

एहु जु एष यः प्रत्यक्षीभूतः **अप्पा** स्वसंवेदनप्रत्यक्ष आत्मा । स कथंभूतः । **सो परमप्पा** शुद्धनिश्चयेनानंतचतुष्टयस्वरूपः क्षुधाद्यष्टादशदोषरहितः स निर्दोषिपरमात्मा **कम्मविसेसें जायउ जप्पा** व्यवहारनयेनानादिकर्मबंधनविशेषेण स्वकीयबुद्धिदोषेण जात उत्पन्नः । कथंभूतो जातः । जाप्यः पराधीनः **जामइ जाणइ** यदा काले जानाति । केन कं । **अप्पें अप्पा** वीतरागनिर्विकल्पस्वसंवेदनज्ञानपरिणतेनात्मना निजशुद्धात्मानं **तावइ** तस्मिन् स्वशुद्धात्मानुभूतिकाले **सो जि** स एवात्मा **देउ** निजशुद्धात्मभावनोत्थवीतरागसुखानुभवेन दीव्यति क्रीडतीति देवः परमाराध्यः । किं विशिष्टो देवः । **परमप्पा** शुद्धनिश्चयेन मुक्तिगतपरमात्मसमानः । अयमत्र भावार्थः । यद्येवंभूतः परमात्मा शक्तिरूपेण देहमध्ये नास्ति तर्हि केवलज्ञानोत्पत्तिकाले कथं व्यक्तिर्भविष्यतीति ॥ ३०५ ॥

अथ तमेवार्थं व्यक्तिं करोति;—

जो परमप्पा णाणमउ, सो हउं देउ अणंतु ।
जो हउं सो परमप्पु परु, एहउ भावि णिभंतु ॥ ३०६ ॥

यः परमात्मा ज्ञानमयः सः अहं देवः अनंतः ।
यः अहं स परमात्मा परः इत्थं भावय निर्भ्रांतः ॥ ३०६ ॥

आगे चतुष्पदछंदमें आत्माके शुद्ध स्वरूपको कहते हैं;—[**एष य आत्मा**] यह प्रत्यक्षीभूत स्वसंवेदन ज्ञानकर प्रत्यक्ष जो आत्मा [**स परमात्मा**] वही शुद्ध निश्चयनयकर अनंत चतुष्टयस्वरूप क्षुधादि अठारहदोष रहित निर्दोष परमात्मा है वह व्यवहारनयकर [**कर्मविशेषेण**] अनादिकर्मबंधके विशेषसे [**जाप्यः जातः**] पराधीन हुआ दूसरेका जाप करता है परंतु [**यदा**] जिस समय [**आत्मना**] वीतराग निर्विकल्प स्वसंवेदन ज्ञानकर [**आत्मानं**] अपनेको [**जानाति**] जानता है [**तदा**] उस समय [**स एव**] यह आत्मा ही [**परमात्मा**] परमात्मा देव है । **भावार्थ**—निज शुद्धात्माकी भावनासे उत्पन्न हुआ जो परम आनंद उसके अनुभवमें क्रीडा करनेसे देव कहा जाता है यही आराधने योग्य है । जो आत्मदेव शुद्ध निश्चयनयकर भगवान् केवलीके समान है । ऐसा परमात्मदेव शक्तिरूपसे देहमें है जो देहमें न होवे तो केवलज्ञानके समय कैसे प्रगट होवे ॥ ३०५ ॥

जो परमप्पा इत्यादि । **जो परमप्पा** यःकश्चित् प्रसिद्धपरमात्मा सर्वोत्कृष्टानंतज्ञानादिरूपा मा लक्ष्मीर्यस्य स भवति परमश्चासावात्मा च परमात्मा **णाणमउ** ज्ञानेन निर्वृतो ज्ञानमयः **सो हउं** यद्यपि व्यवहारेण कर्मावृतस्तिष्ठामि तथापि निश्चयेन स एवाहं पूर्वोक्तः परमात्मा । कथंभूतः । **देउ** परमाराध्यः । पुनरपि कथंभूतः । **अणंतु** अनंतसुखादिगुणास्पदत्वादनंतः । **जो हउं सो परमप्पु** योऽहं स्वदेहस्थो निश्चयेन परमात्मा स एव तत्सदृश एव मुक्तिगतपरमात्मा । कथंभूतः । **परु** परमगुणयोगात् पर उत्कृष्टः **एहउ भावि** इत्थंभूतं परमात्मानं भावय हे प्रभाकरभट्ट । कथंभूतः सन् । **णिभंतु** भ्रांतिरहितः संशयरहितः सन्निति । अत्र स्वदेहेपि शुद्धात्मास्तीति निश्चयं कृत्वा मिथ्यात्वाद्युपशमवशेन केवलज्ञानाद्युत्पत्तिबीजभूतां कारणसमयसाराख्यामागमभाषया वीतरागसम्यक्त्वादिरूपां शुद्धात्मैकदेशव्यक्तिं लब्ध्वा सर्वतात्पर्येण भावना कर्तव्येत्यभिप्रायः ॥ ३०६ ॥

अथामुमेवार्थं दृष्टांतदार्ष्टान्ताभ्यां समर्थयति;—

णिम्मलफलिहहं जेम जिय, भिण्णउ परकियभाउ ।
अप्पसहावहं तेम मुणि, सयलुवि कम्मसहाउ ॥ ३०७ ॥

आगे इसी अर्थको प्रगटपनेसे दृढ करते हैं;—[**यः परमात्मा**] जो परमात्मा [**ज्ञानमयः**] ज्ञानस्वरूप है [**स अहं**] वह मैं ही हूं जो कि [**अनंतः देवः**] अविनाशी देवस्वरूप हूं [**य अहं**] जो मैं हूं [**स परः परमात्मा**] वही उत्कृष्ट परमात्मा है [**इत्थं**] इस प्रकार [**निर्भ्रांतः**] निस्संदेह [**भावय**] तू भावना कर । **भावार्थ**—जो कोई एक परमात्मा परम प्रसिद्ध सर्वोत्कृष्ट अनंतज्ञानादिरूप लक्ष्मीका निवास है ज्ञानमई है वैसाही मैं हूं । यद्यपि व्यवहारनयकर मैं कर्मोंसे बंधा हुआ हूं तौभी निश्चयनयकर मेरे बंध मोक्ष नहीं है, जैसा भगवानका स्वरूप है वैसा ही मेरा स्वरूप है । जो आत्मदेव महामुनियोंकर परम आराधने योग्य है और अनंत सुख आदि गुणोंका निवास है । इससे यह निश्चय हुआ कि जैसा परमात्मा वैसा यह आत्मा और जैसा यह आत्मा है वैसा ही परमात्मा है । जो परमात्मा है वो मैं हूं और जो मैं हूं वही परमात्मा है । **अहं** यह शब्द देहमें स्थित आत्माको कहता है और **सो** यह शब्द मुक्ति प्राप्त परमात्मामें लगाना । जो परमात्मा वह मैं हूं और मैं हूं सो परमात्मा—यही ध्यान हमेशा करना । वह परमात्मा परमगुणके संबंधसे उत्कृष्ट है । श्रीयोगींद्राचार्य प्रभाकरभट्टसे कहते हैं कि हे प्रभाकर भट्ट तू सब विकल्पोंको छोड़कर केवल परमात्माका ध्यानकर । निस्संदेह होके इस देहमें शुद्धात्मा है ऐसा निश्चयकर । मिथ्यात्वादि सब विभावोंकी उपशमताके वशसे केवलज्ञानादि उत्पत्तिका जो कारण समयसार (निज आत्मा) उसीकी नि-

निर्मलस्फटिकात् यथा जीव भिन्नः परकृतभावः ।
आत्मस्वभावात् तथा मन्यस्व सकलमपि कर्मस्वभावम् ॥ ३०७ ॥

भिण्णउ भिन्नो भवति **जिय** हे जीव **जेम** यथा । कोसौ कर्ता । **परकियभाउ** जपापुष्पाद्युपाधिरूपः परकृतभावः । कस्मात्सकाशात् । **णिम्मलफलिहहं** निर्मलस्फटिकात् **तेम** तथा भिन्नं **मुणि** मन्यस्व जानीहि । कं । **सयलु वि कम्मसहाउ** समस्तमपि भावकर्मद्रव्यकर्मनोकर्मस्वभावं । कस्मात् सकाशात् । **अप्पसहावहं** अनंतज्ञानादिगुणस्वभावात् परमात्मन इति भावार्थः ॥ ३०७ ॥

अथ तामेव देहात्मनोर्भेदभावनां दृढयति;—

जेम सहावि णिम्मलउ, फलिहउ तेम सहाउ ।
भंतिए मइलु म मण्णि जिय, मइलउ देक्खवि काउ ॥ ३०८ ॥

यथा स्वभावेन निर्मलः स्फटिकः तथा स्वभावः ।
भ्रांत्या मलिनं मा मन्यस्व जीव मलिनं दृष्ट्वा कायम् ॥ ३०८ ॥

जेम इत्यादि । **जेमु सहावि णिम्मलउ** यथा स्वभावेन निर्मलो भवति । कोसौ । **फलिहउ** स्फटिकमणिः **तेम** तथा निर्मलो भवति । कोसौ कर्ता । **सहाउ** विशुद्धज्ञानरूपस्य परमात्मनः स्वभावः **भंतिए मइलु म मण्णि** पूर्वोक्तमात्मस्वभावं कर्मतापन्नं भ्रांत्या मलिनं मा मन्यस्व **जिय** हे जीव । किं कृत्वा । **मइलउ दिक्खिवि** मलिनं दृष्ट्वा । कं । **काउ** निर्मलशुद्धबुद्धैकस्वभावपरमात्मपदार्थाद्विलक्षणं कायमित्यभिप्रायः ॥ ३०८ ॥

रंतर भावना करनी चाहिये । वीतरागसम्यक्त्वादिरूप शुद्ध आत्माका एकदेश प्रगटपनेको पाकर सब तरहसे ज्ञानकी भावना करना योग्य है ॥ ३०६ ॥

आगे इसी अर्थको दृष्टांत दार्ष्टांतसे पुष्ट करते हैं;—[**जीव**] हे जीव [**यथा**] जैसे [**परकृतभावः**] नीचेके सब डंक [**निर्मलस्फटिकात्**] महा निर्मल स्फटिकमणिसे [**भिन्नः**] जुदे हैं [**तथा**] उसीतरह [**आत्मस्वभावात्**] आत्मस्वभावसे [**सकलमपि**] सब [**कर्मस्वभावं**] शुभाशुभकर्म [**मन्यस्व**] भिन्न जानो । **भावार्थ**—आत्मस्वभाव महानिर्मल है भावकर्म द्रव्यकर्म नोकर्म ये सब जड़ हैं आत्मा चिद्रूप है । अनंत ज्ञानादि गुणरूप जो चिदानंद उससे तू सकल प्रपंच भिन्न मान ॥ ३०७ ॥

आगे देह और आत्मा जुदे २ हैं यह भेद भावना दृढ करते हैं;—[**यथा**] जैसे [**स्फटिकः**] स्फटिकमणि [**स्वभावेन**] स्वभावसे [**निर्मलः**] निर्मल है [**तथा**] उसीतरह [**स्वभावः**] आत्मा ज्ञान दर्शनरूप निर्मल है । ऐसे आत्मस्वभावको [**जीव**] हे जीव [**कायं मलिनं**] शरीरकी मलिनता [**दृष्ट्वा**] देखकर [**भ्रांत्या**] भ्रमसे [**मलिनं**]

अथ पूर्वोक्तभेदभावनां रक्तादिवस्त्रदृष्टांतेन व्यक्तीकरोति चतुष्कलेन;—

रत्तें वत्थें जेम बुहु, देहु ण मण्णइ रत्तु ।
देहिं रत्तिं णाणि तहं, अप्पु ण मण्णइ रत्तु ॥ ३०९ ॥
जिण्णि वत्थें जेम बुहु, देहु ण मण्णइ जिण्णु ।
देहिं जिण्णि णाणिं तहं, अप्पु ण मण्णइ जिण्णु ॥ ३१० ॥
वत्थु पणट्ठइं जेमु बुहु, देहु ण मण्णइ णट्ठु ।
णट्ठें देहिं णाणि तहं, अप्पु ण मण्णइ णट्ठु ॥ ३११ ॥
भिण्णउ वत्थु जि जेम जिय, देहहं मण्णइ णाणि ।
देहुवि भिण्णउ णाणि तहं, अप्पहं मण्णइ जाणि ॥ ३१२ ॥

रक्ते वस्त्रे यथा बुधः देहं न मन्यते रक्तं ।
देहे रक्ते ज्ञानी तथा आत्मानं न मन्यते रक्तम् ॥ ३०९ ॥
जीर्णे वस्त्रे यथा बुधः देहं न मन्यते जीर्णं ।
देहे जीर्णे ज्ञानी तथा आत्मानं न मन्यते जीर्णम् ॥ ३१० ॥
वस्त्रे प्रणष्टे यथा बुधः देहं न मन्यते नष्टम् ।
नष्टे देहे ज्ञानी तथा आत्मानं न मन्यते नष्टम् ॥ ३११ ॥
भिन्नं वस्त्रमेव यथा जीव देहात् मन्यते ज्ञानी ।
देहमपि भिन्नं ज्ञानी तथा आत्मनः मन्यते जानीहि ॥ ३१२ ॥

यथा कोपि व्यवहारज्ञानी रक्ते वस्त्रे जीर्णे वस्त्रे नष्टेपि स्वकीयवस्त्रे स्वकीयं देहं रक्तं जीर्णं नष्टं न मन्यते तथा वीतरागनिर्विकल्पस्वसंवेदनज्ञानी देहे रक्ते जीर्णे नष्टेपि सति व्यवहारेण देहस्थमपि वीतरागचिदानंदैकपरमात्मानं शुद्धनिश्चयनयेन देहाद्भिन्नं रक्तं जीर्णं नष्टं न मन्यते इति भावार्थः । अथ **मण्णइ** मन्यते । कोसौ । **णाणि** देहवस्त्रविषये भेदज्ञानी । किं मन्यते । **भिण्णउ** भिन्नं । किं । **वत्थु जि** वस्त्रमेव **जेम** यथा **जिय** हे जीव ।

मैला [**मा मन्यस्व**] मत मानें । **भावार्थ—**यह काय शुद्ध बुद्ध परमात्मपदार्थसे भिन्न है काय मैली है आत्मा निर्मल है ॥ ३०८ ॥

आगे पूर्वकथित भेदविज्ञानकी भावना रक्त पीतादि वस्त्रके दृष्टांतसे चार दोहाओंमें प्रगट करते हैं;—[**यथा**] जैसे [**बुधः**] कोई बुद्धिमान् पुरुष [**रक्ते वस्त्रे**] लाल वस्त्रसे [**देहं रक्तं**] शरीरको लाल [**न मन्यते**] नहीं मानता [**तथा**] उसीतरह [**ज्ञानी**] वीतराग निर्विकल्प स्वसंवेदन ज्ञानी [**देहे रक्ते**] शरीरके लाल होनेसे [**आत्मानं**] आत्माको [**रक्तं न मन्यते**] लाल नहीं मानता । [**यथा बुधः**] जैसे कोई बुद्धिमान् [**वस्त्रे जीर्णे**] कपड़ेके जीर्ण (पुराने) होनेपर [**देहं जीर्णं**] शरीरको

कस्माद्भिन्नं मन्यते । **देहहं** स्वकीयदेहात् । दृष्टांतमाह । **मण्णइ** मन्यते । कोसौ । **णाणि** देहात्मनोर्भेदज्ञानी **तहं** तथा भिन्नं मन्यते । कमपि । **देहुवि** देहमपि । कस्मात् । **अप्पहं** निश्चयेन देहविलक्षणाद् व्यवहारेण देहस्थात्सहजशुद्धपरमानंदैकस्वभावान्निजपरमात्मनः **जाणि** जानीहीति भावार्थः ॥ ३०९ । ३१० । ३११ । ३१२ ॥

अथ दुःखजनकदेहघातकं शत्रुमपि मित्रं जानीहीति दर्शयति;—

इहु तणु जीवड तुज्झ रिउ, दुक्खइं जेण जणेइ ।
सो परु जाणहि मित्तु तुहुं, जो तणु एहु हणेइ ॥ ३१३ ॥

इयं तनुः जीव तव रिपुः दुःखानि येन जनयति ।
तं परं जानीहि मित्रं त्वं यः तनुमिमां हंति ॥ ३१३ ॥

रिउ रिपुर्भवति । का । **इहु तणु** इयं तनुः कर्त्री **जीवड** हे जीव **तुज्झ** तव । कस्मात् । **दुक्खइं जेण जणेइ** येन कारणेन दुक्खानि जनयति **सो परु** तं परजनं **जाणहि**

जीर्णं [**न मन्यते**] नहीं मानता [**तथा ज्ञानी**] उसीतरह ज्ञानी [**देहे जीर्णे**] शरीरके जीर्ण होनेसे [**आत्मानं जीर्णं न मन्यते**] आत्माको जीर्ण नहीं मानता । [**यथा बुधः**] जैसे कोई बुद्धिमान् [**वस्त्रे प्रणष्टे**] वस्त्रके नाश होनेसे [**देहं नष्टं**] देहका नाश [**न मन्यते**] नहीं मानता [**तथा ज्ञानी**] उसी तरह ज्ञानी [**देहे नष्टे**] देहका नाश होनेसे [**आत्मानं**] आत्माका [**नष्टं न मन्यते**] नाश नहीं मानता । [**जीव**] हे जीव [**यथा ज्ञानी**] जैसे ज्ञानी [**देहात् भिन्नं एव**] देहसे भिन्न ही [**वस्त्रं मन्यते**] कपडेको मानता है [**तथा ज्ञानी**] उसीतरह ज्ञानी [**देहमपि**] शरीरको भी [**आत्मनः भिन्नं**] आत्मासे जुदा [**मन्यते**] मानता है ऐसा [**जानीहि**] तुम जानो । **भावार्थ**— जैसे वस्त्र और शरीर मिले हुए भासते हैं परंतु शरीरसे वस्त्र जुदा है उसीतरह आत्मा और शरीर मिले हुए दीखते हैं परंतु जुदे हैं । शरीरकी रक्ततासे, जीर्णतासे और विनाशसे आत्माकी रक्तता, जीर्णता और विनाश नहीं होता । यह निस्संदेह जानो । यह आत्मा व्यवहारनयकर देहमें स्थित है तौभी सहज शुद्ध परमानंदरूप निज स्वभावकर जुदा ही है देहके सुख दुःख जीवमें नहीं हैं ॥ ३०९।३१०।३११।३१२ ॥

आगे दुःख उत्पन्न करनेवाला शत्रुरूप यह देह है उसको तू मित्र मत समझ ऐसा कहते हैं;—[**जीव**] हे जीव [**इयं तनुः**] यह शरीर [**तव रिपुः**] तेरा शत्रु है [**येन**] क्योंकि [**दुःखानि**] दुःखोंको [**जनयति**] उत्पन्न करता है [**यः**] जो

---

१ "दुःखका कारण जो देह उसके नाश करनेवाले शत्रुको भी मित्र समझ ऐसा दिखलाते हैं" । यह अर्थ संस्कृतटीकाके अनुसार है ।

जानीहि । किं । **मित्तु** परममित्रं **तुहुं** त्वं कर्ता । यः परः किं करोति । **जो तणु एहु हणेइ** यः कर्ता तनुरियं प्रत्यक्षीभूतं हंतीति । अत्र यदा वैरी देहविनाशं करोति तदा वीतरागचिदानंदैकस्वभावपरमात्मतत्त्वभावनोत्पन्नसुखामृतसमरसीभावे स्थित्वा शरीरघातकस्योपरि यथा पांडवैः कौरवकुमारस्योपरि द्वेषो न कृतस्तथान्यतपोधनैरपि न कर्तव्यइत्यभिप्रायः ॥ ३१३ ॥

अथ उदयागते पापकर्मणि स्वस्वभावो न त्याज्य इति मनसि संप्रधार्य सूत्रमिदं कथयति;-

उदयहं आणिवि कम्मु मइ जं भुंजेवउ होइ ।
तं सइ आविउ खविउ मइ, सो पर लाहु जि कोइ ॥ ३१४ ॥

उदयमानीय कर्म मया यत् भोक्तव्यं भवति ।
तत् स्वयमागतं क्षपितं मया स परं लाभ एव कश्चित् ॥ ३१४ ॥

जं यत् **भुंजेवउ होइ** भोक्तव्यं भवति । किं कृत्वा । **उदयहं आणवि** विशिष्टात्मभावनाबलेनोदयमानीय । किं । **कम्मु** चिरसंचितं कर्म । केन । **मइ** मया **तं** तत् पूर्वोक्तं कर्म **सइ आविउ** दुर्धरपरीषहोपसर्गवशेन स्वयमुदयागतं सत् **खविउ मइ** निजपरमात्मतत्त्वभावनोत्पन्नवीतरागसहजानंदैकसुखरसास्वादद्रवीभूतेन परिणतेन मनसा क्षपितं मया **सो** स परं नियमेन **लाहु जि** लाभ एव **कोइ** कश्चिदपूर्व इति । अत्र केचन महापुरुषाः

[**इमां तनुं**] इस शरीरका [**हंति**] घात करे [**तं**] उसको [**त्वं**] तुम [**परं मित्रं**] परम मित्र [**जानीहि**] जानो । **भावार्थ—**यह शरीर तेरा शत्रु होनेसे दुःख उत्पन्न करता है इससे तू अनुराग मत करै और जो तेरे शरीरकी सेवा करता है उससे भी राग मतकर तथा जो तेरे शरीरका घात करदेवे उसको शत्रु मत जानें । जब कोई तेरे शरीरका विनाश करे तब वीतराग चिदानंद ज्ञानस्वभाव परमात्मतत्त्वकी भावनासे उत्पन्न जो परम समरसीभाव उसमें लीन होकर शरीरके घातकपर द्वेष मतकर । जैसे महा धर्मस्वरूप युधिष्ठिर आदि पांडव पांच भाई उन्होंने दुर्योधनादिपर द्वेष नहीं किया । उसी तरह सभी साधुओंका यही स्वभाव है कि अपने शरीरका जो घात करे उससे द्वेष नहीं करते सबके मित्र ही रहते हैं ॥ ३१३ ॥

आगे पूर्वोपार्जित पापके उदयसे दुःख अवस्था आजावे उसमें अपना धीरपना आदि स्वभाव न छोड़े ऐसा अभिप्राय मनमें रखकर व्याख्यान करते हैं;—[**यत्**] जो [**मया**] मैं [**कर्म**] कर्मको [**उदयं आनीय**] उदयमें लाकर [**भोक्तव्यं भवति**] भोगने चाहताथा [**तत्**] वह कर्म [**स्वयं आगतं**] आप ही आगया [**मया क्षपितं**] इससे मैं शांत चित्तसे फल सहनकर क्षय करूं [**स कश्चित्**] यह कोई [**परं लाभः**] महान ही लाभ हुआ । **भावार्थ—**जो महामुनि मुक्तिके अधिकारी हैं वे नहीं उदयमें आये हुए

दुर्धरानुष्ठानं कृत्वा वीतरागनिर्विकल्पसमाधौ स्थित्वा च कर्मोदयमानीय तमनुभवंति, अस्माकं पुनः स्वयमेवोदयागतमिति मत्वा संतोषः कर्तव्य इति तात्पर्यम् ॥ ३१४ ॥

अथ इदानीं परुषवचनं सोढुं नायाति तदा निर्विकल्पात्मतत्त्वभावना कर्तव्येति प्रतिपादयति;—

णिट्ठुरवयणु सुणेवि जिय, जइ मणि सहण ण जाइ ।
तो लहु भावहि बंभु परु, जिं मणु झत्ति विलाइ ॥ ३१५ ॥

निष्ठुरवचनं श्रुत्वा जीव यदि मनसि षोढुं न याति ।
ततो लघु भावय ब्रह्म परं येन मनो झटिति विलीयते ॥ ३१५ ॥

जइ यदि चेत् **सहण ण जाइ** सोढुं न याति । क । **मणि** मनसि **जिय** हे मूढ जीव । किं कृत्वा । **सुणिवि** श्रुत्वा । किं । **णिट्ठुरवयणु** निष्ठुरं हृदयकर्णशूलवचनं **तो** तद्वचनश्रवणानंतरं **लहु** शीघ्रं **भावहि** वीतरागपरमानंदैकलक्षणनिर्विकल्पसमाधौ स्थित्वा भावय । कं । **बंभु** ब्रह्मशब्दवाच्यनिजदेहस्थपरमात्मानं । कथंभूतं । **परु** परमानंतज्ञानादिगुणाधारत्वात् परमुत्कृष्टं **जिं** येन परमात्मध्यानेन । किं भवति । **मणु झत्ति विलाइ**

कर्मोंको परम आत्मज्ञानकी भावनाके बलसे उदयमें लाकर उसका फल भोगकर शीघ्र निर्जरा करदेते हैं । और जो वे पूर्वकर्म विना उपायके सहज ही बाईस परिषह तथा उपसर्गके वशसे उदयमें आये हैं तो विषाद न करना बहुत लाभ समझना । मनमें यह मानना कि हम तो उदीरणासे इन कर्मोंको उदयमें लाकर क्षय करते परंतु ये सहज ही उदयमें आये यह तो बड़ा ही लाभ है । जैसे कोई बड़ा व्यौपारी अपने ऊपरका कर्ज लोगोंको बुला बुलाके देता है यदि कोई विना बुलाये सहज ही लेने आया हो तो बडा ही लाभ है । उसी तरह कोई महा पुरुष महान दुर्द्धर तपकरके कर्मोंको उदयमें लाके क्षय करते हैं लेकिन वे कर्म अपने स्वयमेव उदयमें आये हैं तो इसके समान दूसरा क्या है ऐसा संतोष धारणकर ज्ञानीजन उदय आये हुए कर्मोंको भोगते हैं परंतु रागद्वेष नहीं करते ॥ ३१४ ॥

आगे यह कहते हैं कि जो कोई कर्कश (कठोर) वचन कहे और यह न कहसकता हो तो अपने कषायभाव रोकनेकेलिये निर्विकल्प आत्मतत्वकी भावना करनी चाहिये;—[**जीव**] हे जीव [**निष्ठुरवचनं श्रुत्वा**] जो कोई अविवेकी किसीको कठोर वचन कहे उसको सुनकर [**यदि**] जो [**न सोढुं याति**] न सह सके [**ततः**] तो कषाय दूर करनेकेलिये [**परं ब्रह्म**] परमानंदस्वरूप इस देहमें विराजमान परम ब्रह्मका [**मनसि**] मनमें [**लघु**] शीघ्र [**भावय**] ध्यान करो । जो ब्रह्म अनंतज्ञानादि

वीतरागनिर्विकल्पसमाधिसमुत्पन्नपरमानंदैकरूपसुखामृतास्वादेन मनो झटिति शीघ्रं विलयं याति द्रवीभूतं भवतीति भावार्थः ॥ ३१५ ॥

अथ जीवः कर्मवशेन जातिभेदभिन्नो भवतीति निश्चिनोति;—

लोउ विलक्खणु कम्मवसु, इत्थु भवंतरि एइ ।
वुज्झु कि जइ इहु अप्पि ठिउ, इत्थु जि भवि ण पडेइ ॥ ३१६ ॥

लोकः विलक्षणः कर्मवशः अत्र भवांतरे आयाति ।
आश्चर्यं किं यदि अयं आत्मनि स्थितः अत्रैव भवे न पतति ॥ ३१६ ॥

लोउ इत्यादि । **विलक्खणु** षोडशवर्णिकासुवर्णवत्केवलज्ञानादिगुणसदृशो न सर्वजीवराशिसदृशात् परमात्मतत्त्वाद्विलक्षणो विसदृशो भवति । केन । ब्राह्मणक्षत्रियवैश्यशूद्रादिजातिभेदेन । कोसौ । **लोउ** लोको जनः । कथंभूतःसन् । **कम्मवसु** कर्मरहितशुद्धात्मानुभूतिभावनारहितेन यदुपार्जितं कर्म तस्य कर्मण आधीनः कर्मवशः । इत्थंभूतःसन् किं करोति । **इत्थु भवंतरि एइ** पंचप्रकारभवरहिताद्वीतरागपरमानंदैकस्वभावात् शुद्धात्मद्रव्याद्विसदृशे अस्मिन् भवांतरे संसारे समायाति **वुज्झु कि** इदं किमाश्चर्यं किंतु नैव **जइ इहु अप्पि ठिउ** यदि चेदयं जीवः स्वशुद्धात्मनि स्थितो भवति तर्हि **इत्थु जि भवि ण पडेइ** अत्रैव भवे न पततीति इदमप्याश्चर्यं न भवतीति । अत्रेदं व्याख्यानं ज्ञात्वा संसारभयभी-

---

गुणोंका आधार है सर्वोत्कृष्ट है [**येन**] जिसके ध्यान करनेसे [**मनः**] मनका विकार [**झटिति**] शीघ्र ही [**विलीयते**] विलाय जाता है ॥ ३१५ ॥

आगे जीव, कर्मके वशसे भिन्न २ स्वरूप जातिभेदसे होता है ऐसा निश्चय करते हैं;—[**विलक्षणः**] सोलहवानीके सुवर्णकी तरह केवलज्ञानादि गुणकर समान जो परमात्मतत्व उससे भिन्न जो [**लोकः**] ब्राह्मण क्षत्रिय वैश्य शूद्र आदि जाति भेदरूप जीवराशि वह [**कर्मवशः**] कर्मसे उत्पन्न है अर्थात् जातिभेद कर्मके निमित्तसे हुआ है और वे कर्म आत्मज्ञानकी भावनासे रहित अज्ञानी जीवने उपार्जन किये हैं उन कर्मोंके अधीन जातिभेद है जबतक कर्मोंका उपार्जन है तब तक [**अत्र भवांतरे आयाति**] इस संसारमें अनेक जाति धारण करता है [**अयं यदि**] जो यह जीव [**आत्मनि स्थितः**] आत्मस्वरूपमें लगे तो [**अत्रैव भवे**] इसी भवमें [**न पतति**] नहीं पड़े भ्रमण नहीं करै [**किं आश्चर्यं**] इसमें क्या आश्चर्य है कुछ भी नहीं । **भावार्थ**—जबतक आत्मामें चित्त नहीं लगता तबतक संसारमें भ्रमण करता है अनेकभव धारण करता है लेकिन जब यह आत्मदर्शी हुआ तब कर्मोंको नहीं उपार्जन करता और भवमें भी नहीं भटकता । इसमें आश्चर्य नहीं है । संसार शरीर भोगोंसे उदास और जिसको भवभ्रमणका भय उत्पन्न होगया है ऐसा भव्य जीव उसको मिथ्यात्व अव्रत कषाय प्रमाद

तेन भव्येन भवकारणमिथ्यात्वादिपंचास्रवान् मुक्त्वा द्रव्यभावास्रवरहिते परमात्मभावे स्थित्वा च निरंतरं भावना कर्तव्येति तात्पर्यम् ॥ ३१६ ॥

अथ परेण दोषग्रहणे कृते कोपो न कर्तव्य इत्यभिप्रायं मनसि संप्रधार्य सूत्रमिदं प्रतिपादयति;—

अवगुणगहणइं महुतणइं, जइ जीवहं संतोसु ।
तो तहं सुक्खहं हेउ हउं, इउ मण्णिवि चइ रोसु ॥ ३१७॥

अवगुणग्रहणेन मदीयेन यदि जीवानां संतोषः ।
ततः तेषां सुखस्य हेतुरहं इति मत्वा त्यज रोषम् ॥ ३१७ ॥

जइ जीवहं संतोसु यदि चेदज्ञानिजीवानां संतोषो भवति । केन । **अवगुणगहणइं** निर्दोषिपरमात्मनो विलक्षणा ये दोषा अवगुणास्तेषां ग्रहणेन । कथंभूतेन । **महुतणइं** मदीयेन **तो तह सोक्खहं हेउ हउं** यतःकारणान्मदीयदोषग्रहणेन तेषां सुखं जातं ततस्तेषामहं सुखस्य हेतुर्यातः **इउं मण्णिवि चइ रोसु** केचन परोपकारनिरताः परेषां द्रव्यादिकं दत्वा सुखं कुर्वंति मया पुनर्द्रव्यादिकं मुक्त्वापि तेषां सुखं कृतमिति मत्वा रोषं त्यज । अथवा मदीया अनंतज्ञानादिगुणा न गृहीतास्तैः किंतु दोषा एव गृहीता इति मत्वा च कोपं त्यज, अथवा ममैते दोषास्संति सत्यमिदमस्य वचनं तथापि रोषं त्यज, अथवा ममैते दोषा न संति तस्य वचनेन किमहं दोषी जातस्तथापि क्षमितव्यं, अथवा परोक्षे दोषग्रहणं करोति न च प्रत्यक्षे समीचीनोसौ तथापि क्षमितव्यं, अथवा वचनमात्रेणैव दोषग्रहणं

योग इन पांच आस्रवोंको छोड़कर परमात्म तत्त्वमें हमेशा भावना करनी चाहिये । जो इसके आत्मभावना होवे तो भव भ्रमण नहीं होसकता ॥ ३१६ ॥

आगे जो कोई अपने दोष ग्रहण करे तो उसपर क्रोध नहीं करना क्षमा करना यह अभिप्राय मनमें रखकर व्याख्यान करते हैं;—[**मदीयेन अवगुणग्रहणेन**] अज्ञानी जीवोंको परके दोष ग्रहण करनेसे हर्ष होता है मेरे दोष ग्रहणकरके [**जीवानां संतोषः**] जिन जीवोंको हर्ष होता है [**ततः**] तो मुझे यही लाभ है कि [**अहं**] मैं [**तेषां सुखस्य हेतुः**] उनको सुखका कारण हुआ [**इति मत्वा**] ऐसा मनमें विचारकर [**रोषं त्यज**] गुस्सा छोडो । **भावार्थ**—ज्ञानी गुस्सा नहीं करते ऐसा विचारते हैं कि जो कोई परका उपकार करनेवाले परजीवोंको द्रव्यादि देकर सुखी करते हैं मैंने कुछ द्रव्य नहीं दिया उपकार नहीं किया मेरे अवगुण ही से सुखी होगये तो इसके समान दूसरी क्या बात है । ऐसा जानकर हे भव्य तू रोष छोड । अथवा ऐसा विचार कि मेरे अनंत ज्ञानादि गुण तो उसने नहीं लिये दोष लिये वो निस्संक लो । जैसे घरमें कोई चोर आया और उसने रत्न सुवर्णादि नहीं लिये माटी पत्थर लिये तो लो, तुच्छ

करोति न च शरीरबाधां करोति तथापि क्षमितव्यं, अथवा शरीरबाधामेव करोति न च प्राणविनाशं तथापि क्षमितव्यं, अथवा प्राणविनाशमेव करोति न च भेदाभेदरत्नत्रयभावनाविनाशं चेति मत्वा सर्वतात्पर्येण क्षमा कर्तव्येत्यभिप्रायः ॥ ३१७ ॥

अथ सर्वचिंतां निषेधयति युग्मेन;—

जोइय चिंति म किंपि तुहुं, जइ बीहउ दुक्खस्स ।
तिलतुसमित्तुवि सल्लडा, वेयण करइ अवस्स ॥ ३१८ ॥

योगिन् चिंतय मा किमपि त्वं यदि बिभेषि दुःखस्य ।
तिलतुषमात्रमपि शल्यं वेदनां करोत्यवश्यम् ॥ ३१८ ॥

चिंति म चिंतां मा कार्षीः **किंपि तुहुं** कामपि त्वं **जोइय** हे योगिन् । यदि किं । **जइ बीहउ,** यदि बिभेषि । कस्य । **दुक्खस्स** वीतरागतात्त्विकानंदैकरूपात् पारमार्थिकसुखात्प्रतिपक्षभूतस्य नारकादिदुःखस्य । यतः कारणात **तिलतुसमित्तुवि सल्लडा** तिलतु-

---

वस्तुके लेनेवालेपर क्या क्रोध करना, ऐसा जान रोष छोड़ना । अथवा ऐसा विचारे कि जो यह दोष कहता है वे सच कहता है तो सत्यवादीसे क्या द्वेष करना । अथवा ये दोष मुझमें नहीं हुआ वह वृथा कहता है ते उसके वृथा कहनेसे क्या मैं दोषी होगया बिलकुल नहीं हुआ । ऐसा जानकर क्रोध छोड़ क्षमाभाव करने चाहिये । अथवा यह विचारो कि वह मेरे मुंहके आगे नहीं कहता लेकिन पीठ पीछे कहता है सो पीठ पीछे तो राजाओंको भी बुरा कहते हैं ऐसा जानकर उससे क्षमा करना कि प्रत्यक्ष तो मेरा मानभंग नहीं करता है परोक्षकी वात क्या है । अथवा कदाचित कोई प्रत्यक्ष मुंह आगे दोष कहे तो तू यह विचार कि वचनमात्रसे मेरे दोष ग्रहण करता है शरीरको तो बाधा नहीं करता यह गुण है ऐसा जान क्षमा ही कर । अथवा जो कोई शरीरको भी बाधा करे तो तू ऐसा विचार कि मेरे प्राण तो नहीं हरता यह गुण है । जो कभी कोई पापी प्राण ही हर ले तो यह विचार कि ये प्राण तो विनाशीक हैं विनाशीक वस्तुके चले जानेकी क्या वात है । मेरा ज्ञान भाव अविनश्वर है उसको तो कोई हर नहीं सकता इसने तो मेरे बाह्य प्राण हर लिये हैं परंतु भेदाभेदरत्नत्रयकी भावनाका विनाश नहीं किया । ऐसा जानकर सर्वथा क्षमा ही करना चाहिये ॥ ३१७ ॥

आगे सब चिंताओंका निषेध करते हैं;—[**योगिन्**] हे योगी [**त्वं**] तू [**यदि**] जो [**दुःखस्य**] वीतराग परम आनंदके शत्रु जो नरकादि चार गतियोंके दुःख उनसे [**बिभेषि**] डर गया है तो तू निश्चिंत होकर परलोकका साधन कर, इस लोककी [**किमपि मा चिंतय**] कुछ भी चिंता मत कर । क्योंकि [**तिलतुषमात्रमपि शल्यं**]

षमात्रमपि शल्यं **वेयण करइ अवस्स** वेदनां बाधां करोत्यवश्यं नियमेन । अत्र चिंतारहितात्परमात्मनः सकाशाद्विलक्षणा या विषयकषायादिचिंता सा न कर्तव्या । कांडादिशल्यमिव दुःखकारणत्वादिति भावार्थः ॥ ३१८ ॥

किंच;—

मोक्खु म चिंतहि जोइया, मोक्खु ण चिंतिउ होइ ।
जेण णिबद्धउ जीवडउ, मोक्खु करेसइ सोइ ॥ ३१९ ॥

मोक्षं मा चिंतय योगिन् मोक्षो न चिंतितो भवति ।
येन निबद्धो जीवः मोक्षं करिष्यति तदेव ॥ ३१९ ॥

मोक्खु इत्यादि । **मोक्खु म चिंतहि** मोक्षचिंतां मा कार्षीस्त्वं **जोइया** हे योगिन् । यतः कारणात् **मोक्खु ण चिंतिउ होइ** रागादिचिंताजालरहितः केवलज्ञानाद्यनंतगुणव्यक्तिसहितो मोक्षः चिंतितो न भवति । तर्हि कथं भवति । **जेण णिबद्धउ जीवडउ** येन मिथ्यात्वरागादिचिंताजालोपार्जितेन कर्मणा बद्धो जीवः **सोइ** तदेव कर्म शुभाशुभविकल्पसमूहरहिते शुद्धात्मस्वरूपे स्थितानां परमयोगिनां **मोक्खु करेसइ** अनंतज्ञानादिगुणोपलंभरूपं मोक्षं

तिलके भूसे मात्र भी शल्य [**वेदनां**] मनको वेदना [**अवश्यं करोति**] निश्चयसे करती है । **भावार्थ**—चिंता रहित आत्मज्ञानसे उलटे जो विषय कषाय आदि विकल्पजाल उनकी चिंता कुछ भी नहीं करना । यह चिंता दुःखका ही कारण है, जैसे वाण आदिकी तृणप्रमाण भी सलाई महा दुःखका कारण है जब वह शल्य निकले तभी सुख होता है ॥ ३१८ ॥

आगे मोक्षकी भी चिंता नहीं करना ऐसा कहते हैं;—[**योगिन्**] हे योगी अन्य चिंताकी तो बात क्या रही [**मोक्षं मा चिंतय**] मोक्षकी भी चिंता मतकर [**मोक्षः**] क्योंकि मोक्ष [**चिंतितो न भवति**] चिंता करनेसे नहीं होती वांछाके त्यागसे ही होती है रागादि चिंताजालसे रहित केवलज्ञानादि अनंतगुणोंकी प्रगटता सहित जो मोक्ष है वह चिंताके त्यागसे होती है । यही कहते हैं—[**येन**] जिन मिथ्यात्वरागादि चिंताजालोंसे उपार्जन किये कर्मोंसे [**जीवः**] यह जीव [**निबद्धः**] बंधा हुआ है [**तदेव**] वे कर्म ही [**मोक्षं**] शुभाशुभविकल्पके समूहसे रहित जो शुद्धात्मतत्त्वका स्वरूप उसमें लीन हुए परमयोगियोंका मोक्ष [**करिष्यति**] करेंगे । **भावार्थ**—वह चिंताका त्याग ही तुझको निस्संदेह मोक्ष करेगा । अनंत ज्ञानादि गुणोंकी प्रगटता वह मोक्ष है । यद्यपि विकल्प सहित जो प्रथम अवस्था उसमें विषय कषायादि खोटे ध्यानके निवारण करनेकेलिये और मोक्षमार्गमें परिणाम दृढ करनेकेलिये ज्ञानीजन ऐसी भावना करते हैं कि चतुर्गतिके दुःखोंका क्षय हो, अष्ट कर्मोंका क्षय हो, ज्ञानका लाभ हो, पंचमगतिमें

करिष्यतीति । अत्र अद्यपि सविकल्पावस्थायां विषयकषायाद्यपध्यानवंचनार्थं च मोक्षमार्गो भावनादृढीकरणार्थं च । "दुक्खक्खउ कम्मक्खउ वोहिलाहो सुगइगमणं समाहिमरणं जिणगुणसंपत्ति होउ मज्झम्मि" इत्यादि भावना कर्तव्या तथापि वीतरागनिर्विकल्पपरमसमाधिकाले न कर्तव्येति भावार्थः ॥ ३१९ ॥

अथ चतुर्विंशतिसूत्रप्रमितमहास्थलमध्ये परमसमाधिव्याख्यानमुख्यत्वेन सूत्रषट्कमंतरस्थलं कथ्यते । तद्यथा;—

परमसमाहिमहासरहिं, जे बुड्डहिं पइसेवि ।
अप्पा थक्कइ विमलु तहं, भवमल जंति वहेवि ॥ ३२० ॥

परमसमाधिमहासरसि ये ब्रुडंति प्रविश्य ।
आत्मा तिष्ठति विमलः तेषां भवमलानि यांति वहित्वा ॥ ३२० ॥

जे बुड्डहिं ये केचन पुरुषा मग्ना भवंति । क । **परमसमाहिमहासरहिं** परमसमाधिमहासरोवरे । किंकृत्वा मग्ना भवंति । **पइसेवि** प्रविश्य सर्वात्मप्रदेशैरवगाह्य **अप्पा थक्कइ** चिदानंदैकस्वभावः परमात्मा तिष्ठति । कथंभूतः । **विमलु** द्रव्यकर्मनोकर्ममतिज्ञानादिविभावगुणनरनारकादिविभावपर्यायमलरहितः **तहं** तेषां परमसमाधिरतपुरुषाणां **भवमल जंति** भवरहितान् शुद्धात्मद्रव्याद्विलक्षणानि यानि कर्माणि भवमलकारणभूतानि गच्छंति । किं कृत्वा । **वहेवि** शुद्धपरिणामनीरप्रवाहेण प्रहितत्वेनेति भावार्थः ॥ ३२० ॥

अथ;—

सयलवियप्पहं जो विलउ, परमसमाहि भणंति ।
तेण सुहासुहभावडा, मुणि सयलवि मिल्लंति ॥ ३२१ ॥

गमन हो समाधि मरण हो और जिनराजके गुणोंकी संपत्ति मुझको हो । यह भावना चौथे पांचवें छट्ठे गुणस्थानमें करने योग्य है तौ भी ऊपरके गुणस्थानोंमें वीतरागनिर्विकल्पसमाधिके समय नहीं होती ॥ ३१९ ॥

आगे चौवीस दोहाओंके स्थलमें परमसमाधिके व्याख्यानकी मुख्यतासे छह दोहासूत्र कहते हैं;—[**ये**] जो कोई महान पुरुष [**परमसमाधिमहासरसि**] परमसमाधिरूप सरोवरमें [**प्रविश्य**] घुसकर [**ब्रुडंति**] मग्न होते हैं उनके सब प्रदेश समाधिरसमें भीग जाते हैं [**आत्मा तिष्ठति**] उन्हींके चिदानंद अखंड स्वभाव आत्माका ध्यान स्थिर होता है । जो कि आत्मा [**विमलः**] द्रव्यकर्म भावकर्म नोकर्मसे रहित महानिर्मल है [**तेषां**] जो योगी परमसमाधिमें रत हैं उन्हीं पुरुषोंके [**भवमलानि**] शुद्धात्मद्रव्यसे विपरीत अशुद्धभावके कारण जो कर्म हैं वे सब [**वहित्वा यांति**] शुद्धात्मपरिणामरूप जो जलका प्रवाह उससे वहजाते हैं । **भावार्थ**—जहां जलका प्रवाह आवे वहां मल कैसे रह सकता है कभी नहीं रहता ॥ ३२० ॥

सकलविकल्पानां यं विलयं परमसमाधिं भणंति ।
तेन शुभाशुभभावान् मुनयः सकलानपि मुंचंति ॥ ३२१ ॥

भणंति कथयंति । के ते । वीतरागसर्वज्ञाः । कं भणंति । **परमसमाहि** वीतरागपरमसामायिकरूपं परमसमाधिकं **जो विलउ** यं विलयं विनाशं । केषां । **सयलवियप्पहं** निर्विकल्पात्परमात्मस्वरूपात्प्रतिकूलानां समस्तविकल्पानां **तेण** तेन कारणेन **मिल्लंति** मुंचंति । के कर्तारः । **मुणि** परमाराध्यध्यानरतास्तपोधनाः । कान् मुंचंति । **सुहासुहभावडा** शुभाशुभमनोवचनकायव्यापाररहितान् शुद्धात्मद्रव्याद्विपरीतान् शुभाशुभभावान् परिणामान् । कतिसंख्योपेतान् । **सयलवि** समस्तानपि ॥ अयं भावार्थः । समस्तपरद्रव्याशारहितात् स्वशुद्धात्मस्वभावाद्विपरीता याशापीहलोकपरलोकाशा यावत्तिष्ठति मनसि तावद्दुःखी जीव इति ज्ञात्वा सर्वपरद्रव्याशारहितशुद्धात्मद्रव्यभावना कर्तव्येति । तथा चोक्तं । "आसापिसायगहिओ जीवो पावेइ दारुणं दुक्खं । आसा जाहं णियत्ता ताहं णियत्ताइ सयलदुक्खाइं" ॥ ३२१ ॥

अथ;—

घोरु करंतुवि तवचरणु, सयलवि सत्थ मुणंतु ।
परमसमाहिविवज्जियउ, णवि देक्खइ सिउ संतु ॥ ३२२ ॥

घोरं कुर्वाणोपि तपश्चरणं सकलान्यपि शास्त्राणि मन्वानः ।
परमसमाधिविवर्जितः नैव पश्यति शिवं शांतम् ॥ ३२२ ॥

आगे परमसमाधिका लक्षण कहते हैं;—[**यत्**] जो [**सकलविकल्पानां**] निर्विकल्पपरमात्मस्वरूपसे विपरीत रागादि समस्त विकल्पोंका [**विलयं**] नाश होना उसको [**परमसमाधिं भणंति**] परमसमाधि कहते हैं [**तेन**] इस परमसमाधिसे [**मुनयः**] मुनिराज [**सकलानपि**] सभी [**शुभाशुभविकल्पान्**] शुभअशुभ भावोंको [**मुंचंति**] छोड देते हैं । **भावार्थ**—परमआराध्य जो आत्मस्वरूप उसके ध्यानमें लीन जो तपोधन वे शुभअशुभ मन वचन कायके व्यापारसे रहित जो शुद्धात्मद्रव्य उससे विपरीत जो अच्छे बुरे भाव उन सबको छोड़देते हैं, समस्त परद्रव्यकी आशासे रहित जो निज शुद्धात्म स्वभाव उससे विपरीत जो इस लोक परलोककी आशा, वह जब तक मनमें स्थित है तब तक यह जीव दुःखी है । ऐसा जानकर सब परद्रव्यकी आशासे रहित जो शुद्धात्मद्रव्य उसकी भावना करनी चाहिये । ऐसा ही कथन अन्य जगह भी है–आशारूप पिशाचसे घिरा हुआ यह जीव महान भयंकर दुःख पाता है जिन मुनियोंने आशा छोड़ी उन्होंने सब दुःख दूर किये क्योंकि दुःखका मूल आशा ही है ॥ ३२१ ॥

करंतुवि कुर्वाणोपि । किं । **तवचरणु** समस्तपरद्रव्येच्छावर्जितं तपश्चरणं । कथंभूतं । **घोरु** घोरं दुर्धरं वृक्षमूलातापनादिरूपं । न केवलं तपश्चरणं कुर्वन् । **सयलवि सत्थ मुणंतु** शास्त्रजनितविकल्पतात्पर्यरहितात् परमात्मस्वरूपात्प्रतिपक्षभूतानि सर्वशास्त्राण्यपि जानन् । इत्थंभूतोपि सन् **परमसमाहिविवज्जियउ** यदि चेद्रागादिविकल्परहितपरमसमाधिविवर्जितो भवति तर्हि **णवि देखइ सिउ** न पश्यति । कं । शिवं शिवशब्दवाच्यं विशुद्धज्ञानदर्शनस्वभावं स्वदेहस्थमपि च परमात्मानं । कथंभूतं । **संतु** रागद्वेषमोहरहितत्वेन शांतं परमोपशमरूपमिति । इदमत्र तात्पर्यं । यदि निजशुद्धात्मैवोपादेय इति मत्वा तत्साधकत्वेन तदनुकूलं तपश्चरणं करोति तत्परिज्ञानसाधकं च पठति तदा परंपरया मोक्षसाधकं भवति, नोचेन् पुण्यबंधकारणं तमेवेति । तथाचोक्तं । निर्विकल्पसमाधिरहिताः संतः आत्मरूपं न पश्यंति । "आनंदं ब्रह्मणो रूपं निजदेहे व्यवस्थितं । ध्यानहीना न पश्यंति जात्यंधा इव भास्करम्" ॥ ३२२ ॥

आगे ऐसा कहते हैं कि जो परमसमाधिके विना शुद्ध आत्माको नहीं देख सकता;— [**घोरं तपश्चरणं कुर्वाणोपि**] जो मुनि महा दुर्धर तपश्चरण करता हुआ भी और [**सकलानि शास्त्राणि**] सब शास्त्रोंको [**मन्वानः अपि**] जानता हुआ भी [**परमसमाधिविवर्जितः**] जो परमसमाधिसे रहित है वह [**शांतं शिवं**] शांतरूप शुद्धात्माको [**नैव पश्यति**] नहीं देख सकता । **भावार्थ**—तप उसे कहते हैं कि जिसमें किसी वस्तुकी इच्छा न हो । सो इच्छाका अभाव तो हुआ नहीं परंतु कायक्लेश करता है; शीतकालमें नदीके तीर, ग्रीष्मकालमें पर्वतके शिखरपर और वर्षाकालमें वृक्षकी मूलमें महान दुर्धर तप करता है । केवल तप ही नहीं करता शास्त्र भी पढता है । सकल शास्त्रोंके प्रबंधसे रहित जो निर्विकल्प परमात्मस्वरूप उससे रहित हुआ सीखता है शास्त्रोंका रहस्य जानता है परंतु परमसमाधिसे रहित है अर्थात् रागादि विकल्पसे रहित समाधि जिसके प्रगट न हुई तो वह परमसमाधिके विना तप करता हुआ और श्रुत पढता हुआ भी निर्मल ज्ञान दर्शनरूप तथा इस देहमें विराजमान ऐसे निजपरमात्माको नहीं देख सकता । जो आत्मस्वरूप रागद्वेषमोह रहित परमशांत है । परमसमाधिके विना तप और श्रुतसे भी शुद्धात्माको नहीं देख सकता । जो निज शुद्धात्माको उपादेय जानकर ज्ञानका साधक तप करता है और ज्ञानकी प्राप्तिका उपाय जो जैनशास्त्र उनको पढता है तो परंपरा मोक्षका साधक है । और जो आत्माके श्रद्धान विना कायक्लेशरूप तप ही करे तथा शब्दरूप ही श्रुत पढे तो मोक्षका कारण नहीं है पुण्यबंधके कारण होते हैं । ऐसा ही परमानंद स्तोत्रमें कहा है कि जो निर्विकल्प समाधिरहित जीव हैं वे आत्मस्वरूपको नहीं देखसकते । ब्रह्मका रूप आनंद है वह ब्रह्म निज देहमें मौजूद है

अथ;—

विसयकसायवि णिद्दलिवि, जे ण समाहि करंति ।
ते परमप्पहं जोइया, ण वि आराहय होंति ॥ ३२३ ॥

विषयकषायानपि निर्मूल्य ये न समाधिं कुर्वंति ।
ते परमात्मनः योगिन् नैव आराधका भवंति ॥ ३२३ ॥

जे ये केचन **ण करंति** न कुर्वन्ति । कं । **समाहि** त्रिगुप्तिगुप्तपरमसमाधिं । किं-कृत्वा पूर्वं । **णिद्दलिवि** निर्मूल्य । कानपि **विसयकसायवि** निर्विषयकषायात् शुद्धात्मतत्त्वात् प्रतिपक्षभूतान् विषयकषायानपि **ते णवि आराहय होंति** ते नैवाराधका भवंति **जोइय** हे योगिन् । कस्याराधका न भवंति । **परमप्पहं** निर्दोषिपरमात्मन इति । तथाहि । विषयकषायनिवृत्तिरूपं शुद्धात्मानुभूतिस्वभावं वैराग्यं शुद्धात्मोपलब्धिरूपं तत्तत्त्वविज्ञानं बाह्याभ्यंतरपरिग्रहपरित्यागरूपं नैर्ग्रंथ्यं निश्चितात्मानुभूतिरूपा वशचित्तता वीतरागनिर्विकल्पसमाधिबहिरंगसहकारिभूतं जितपरीषहत्वं चेति पंचैतान् ध्यानहेतून् ज्ञात्वा भावयित्वा च ध्यानं कर्तव्यमिति भावार्थः । तथा चोक्तं । "वैराग्यं तत्त्वविज्ञानं नैर्ग्रंथ्यं वशचित्तता । जितपरीषहत्वं च पंचैते ध्यानहेतवः" ॥ ३२३ ॥

परंतु ध्यानसे रहित जीव ब्रह्मको नहीं देखसकते, जैसे जन्मका अंधा सूर्यको नहीं देख सकता है ॥ ३२२ ॥

आगे विषयकषायोंका निषेध करते हैं;—[**ये**] जो [**विषयकषायानपि**] समाधिको धारणकर विषयकषायोंको [**निर्मूल्य**] मूलसे उखाडकर [**समाधिं**] तीन गुप्तिरूप परमसमाधिको [**न कुर्वंति**] नहीं धारण करते [**ते**] वे [**योगिन्**] हे योगी [**परमात्माराधकाः**] परमात्माके आराधक [**नैव भवंति**] नहीं हैं । **भावार्थ**—ये विषय कषाय शुद्धात्म तत्त्वके शत्रु हैं जो इनका नाश न करे वह स्वरूपका आराधक कैसा । स्वरूपको वही आराधता है जिसके विषयकषायका प्रसंग न हो सब दोषोंसे रहित जो निज परमात्मा उसकी आराधनाके घातक विषयकषायके सिवाय दूसरा कोई भी नहीं है । विषयकषायकी निवृत्तिरूप शुद्धात्माकी अनुभूति वह वैराग्यसे ही देखी जाती है । इसलिये ध्यानका मुख्य कारण वैराग्य है । जब वैराग्य हो तब तत्त्वज्ञान निर्मल हो, सो वैराग्य और तत्त्वज्ञान ये दोनों परस्परमें मित्र हैं । ये ही ध्यानके कारण हैं और बाह्याभ्यंतर परिग्रहके त्यागरूप निर्ग्रंथपना वह ध्यानका कारण है । निश्चित आत्मानुभूति ही है स्वरूप जिसका ऐसा जो मनका वश होना वह वीतरागनिर्विकल्पसमाधिका सहकारी है और बाईस परीषहोंका जीतना वह भी ध्यानका कारण है । ये पांच ध्यानके कारण जानकर ध्यान करना चाहिये । ऐसा दूसरी जगह भी कहा है कि संसार शरीरभोगोंसे

अथ;—

परमसमाहि धरेवि मुणि, जे परबंभु ण जंति ।
ते भवदुक्खइं बहुविहइं, कालु अणंतु सहंति ॥ ३२४ ॥

परमसमाधिं धृत्वापि मुनयः ये परब्रह्म न यांति ।
ते भवदुःखानि बहुविधानि कालं अनंतं सहंते ॥ ३२४ ॥

जे ये केचन **मुणि** मुनयः **ण जंति** न गच्छंति । कं कर्मतापन्नं । **परबंभु** परमब्रह्म परमशब्दवाच्यं निजदेहस्थं केवलज्ञानाद्यनंतगुणस्वभावं परमात्मस्वरूपं । किं कृत्वा पूर्वं । **परमसमाहि धरेवि** वीतरागतात्त्विकचिदानंदैकानुभूतिरूपं परमसमाधिं धृत्वा **ते** पूर्वोक्त-शुद्धात्मभावनारहिताः पुरुषाः **सहंति** सहंते । कानि कर्मतापन्नानि । **भवदुक्खइं** वीतरागपरमाह्लादरूपात् पारमार्थिकसुखात्प्रतिपक्षभूतानि नरनारकादिभवदुःखानि । कतिसंख्योपेतानि । **बहुविहइं** शारीरमानसादिभेदेन बहुविधानि । कियंतं कालं । **कालु अणंतु** अनंतकालपर्यंतमिति । अत्रेदं व्याख्यानं ज्ञात्वा निजशुद्धात्मनि स्थित्वा रागद्वेषादिसमस्तविभावत्यागेन भावना कर्तव्येति तात्पर्यम् ॥ ३२४ ॥

अथ;—

जामु सुहासुहभावडा, णवि सयलवि तुट्टंति ।
परमसमाहि ण तामु मणि, केमुलि एमु भणंति ॥ ३२५ ॥

विरक्तता, तत्त्वविज्ञान, सकलपरिग्रहका त्याग, मनका वश करना और बाईस परीषहका जीतना–ये पांच आत्मध्यानके कारण हैं ॥ ३२३ ॥

आगे परमसमाधिकी महिमा कहते हैं—[**ये मुनयः**] जो कोई मुनि [**परमसमाधिं**] परमसमाधिको [**धृत्वापि**] धारण करके भी [**परब्रह्म**] निज देहमें ठहरे हुए केवलज्ञानादि अनंतगुणरूप निज आत्माको [**न यांति**] नहीं जानते हैं [**ते**] वे शुद्धात्मभावनासे रहित पुरुष [**बहुविधानि**] अनेक प्रकारके [**भवदुःखानि**] नारकादि भवदुःख आधि व्याधिरूप [**अनंतं कालं**] अनंत काल तक [**सहंते**] भोगते हैं । **भावार्थ**—मनके दुःखको आधि कहते हैं और तनसंबंधी दुःखोंको व्याधि कहते हैं, इन नानाप्रकारके दुःखोंको अज्ञानी जीव भोगता है । ये दुःख वीतराग परम आह्लादरूप जो पारमार्थिक सुख उससे विमुख हैं । यह जीव अनंतकाल तक निज स्वरूपके ज्ञान विना चारों गतियोंके नानाप्रकारके दुःख भोग रहा है । ऐसा व्याख्यान जानकर निज शुद्धात्ममें स्थिर होके रागद्वेषादि समस्त विभावोंका त्यागकर निज स्वरूपकी ही भावना करनी चाहिये ॥ ३२४ ॥

यावत् शुभाशुभभावाः नैव सकला अपि त्रुट्यंति ।
परमसमाधिर्न तावत् मनसि केवलिन एवं भणंति ॥ ३२५ ॥

जासु इत्यादि । **जासु** यावत्कालं **णवि तुट्टंति** नैव नश्यंति । के कर्तारः । **सुहासुहभावडा** शुभाशुभविकल्पजालरहितात् परमात्मद्रव्याद्विपरीताः शुभाशुभभावाः परिणामाः । कतिसंख्योपेता अपि । **सयलवि** समस्ता अपि **तासु ण** तावत्कालं न । कोसौ । **परमसमाहि** शुद्धात्मसम्यक्श्रद्धानज्ञानानुचरणरूपः शुद्धोपयोगलक्षणः परमसमाधिः । क । **मणि** रागादिविकल्परहितत्वने शुद्धचेतसि **केवुलि एमु भणंति** केवलिनो वीतरागसर्वज्ञा एवं कथयंतीति भावार्थः ॥ ३२५ ॥ इति चतुर्विंशतिसूत्रप्रमितमहास्थलमध्ये परमसमाधिप्रतिपादकसूत्रषट्केन प्रथममंतरस्थलं गतं ।

तदनंतरमर्हत्पदमिति भावमोक्ष इति जीवन्मोक्ष इति केवलज्ञानोत्पत्तिरित्येकोर्थः तस्य चतुर्विधनामाभिधेयस्यार्हत्पदस्य प्रतिपादनमुख्यत्वेन सूत्रत्रयपर्यंतं व्याख्यानं करोति । तद्यथा;—

सयलवियप्पहं तुट्टाहं, सिवपयमग्गि वसंतु ।
कम्मचउक्कइ विलउ गइ, अप्पा हुइ अरहंतु ॥ ३२६ ॥

सकलविकल्पानां त्रुट्यतां शिवपदमार्गे वसन् ।
कर्मचतुष्के विलयं गते आत्मा भवति अर्हन् ॥ ३२६ ॥

हुइ भवति । कोसौ । **अप्पा** आत्मा । कथंभूतो भवति । **अरहंतु** अरिर्मोहनीयं कर्म तस्य हननात् रजसी ज्ञानदृगावरणे तयोरपि हननात् रहस्यशब्देनांतरायस्तदभावाच्च देवेंद्रादिविनिर्मितामतिशयवतीं पूजामर्हतीत्यर्हन् । कस्मिन् सति । **कम्मचउक्कइ विलउ गइ**

आगे यह कहते हैं कि जबतक इस जीवके शुभाशुभभाव सब दूर न हों तबतक परम समाधि नहीं होसकती;—[**यावत्**] जब तक [**सकला अपि**] समस्त [**शुभाशुभभावाः**] सकल विकल्पजालसे रहित जो परमात्मा उससे विपरीत शुभाशुभ परिणाम [**नैव त्रुट्यंति**] दूर न हों नहीं मिटें [**तावत्**] तबतक [**मनसि**] रागादिविकल्परहित शुद्ध चित्तमें [**परमसमाधिः न**] सम्यग्दर्शन ज्ञान चारित्ररूप शुद्धोपयोग जिसका लक्षण है ऐसी परमसमाधि इस जीवके नहीं होसकती [**एवं**] ऐसा [**केवलिनः**] केवली भगवान [**भणंति**] कहते हैं । **भावार्थ**—शुभाशुभ विकल्प जब मिटें तभी परमसमाधि होवे ऐसी जिनेश्वरदेवकी आज्ञा है ॥ ३२५ ॥ इस प्रकार चौवीस दोहाओंके महास्थलमें परमसमाधिके कथनरूप छह दोहाओंका अंतरस्थल गया ।

आगे तीन दोहाओंमें अरहंतपदका व्याख्यान करते हैं, अरहंत पद कहो या भावमोक्ष कहो, अथवा जीवन्मोक्ष कहो या केवलज्ञानकी उत्पत्ति कहो—ये चारों अर्थ एकको ही सूचित करते हैं अर्थात् चारों शब्दोंका अर्थ एक है;—[**कर्मचतुष्के विलयं गते**]

घातिकर्मचतुष्के विलयं गते सति । किं कुर्वन् सन् पूर्वं । **सिवपयमग्गि वसंतु** शिवशब्द-वाच्यं यन्मोक्षपदं तस्य योसौ सम्यग्दर्शनज्ञानचारित्रत्रितयैकलक्षणो मार्गस्तस्मिन् वसन् सन् । केषां सतां । **सयलवियप्पहं तुट्टाहं** समस्तविकल्पानां नष्टानां समस्तरागादिविक-ल्पविनाशादनंतरं भवतीति भावार्थः ॥ ३२६ ॥

अथ;—

केवलणाणिं अणवरउ, लोयालोउ मुणंतु ।
णियमें परमाणंदमउ, अप्पा हुइ अरहंतु ॥ ३२७ ॥

केवलज्ञानेनानवरतं लोकालोकं जानन् ।
नियमेन परमानंदमयः आत्मा भवति अर्हन् ॥ ३२७ ॥

हुइ भवति । कोसौ । **अप्पा** आत्मा । कथंभूतो भवति **अरहंतु** पूर्वोक्तलक्षणो अर्हन् । किं कुर्वन । **लोयालोउ मुणंतु** क्रमकरणव्यवधानरहितत्वेन कालत्रयविषयं लोकालोकं वस्तु वस्तुस्वरूपेण युगपत् जानन् सन् । केन । **केवलणाणें** लोकालोकप्रकाशकसकलविम-लकेवलज्ञानेन । कथं । **अणवरउ** निरंतरं । किंविशिष्टो भवति भगवान् । **परमाणंदमउ** वीतरागपरमसमरसीभावलक्षणतात्त्विकपरमानंदमयः । केन । **णियमें** निश्चयेनात्र संदेहो न कर्तव्य इत्यभिप्रायः ॥ ३२७ ॥

ज्ञानावरणी दर्शनावरणी मोहनी और अंतराय इन चार घातिया कर्मोंके नाश होनेसे [**आत्मा**] यह जीव [**अर्हन् भवति**] अर्हंत होता है अर्थात् जब घातियाकर्म विलय हो जाते हैं तब अरहंतपद पाता है देवेंद्रादिकर पूजाके योग्य हो वह अरहंत है क्योंकि पूजायोग्यको ही अर्हंत कहते हैं । पहले तो महामुनि हुआ [**शिवपदमार्गे वसन्**] मोक्षपदके मार्गरूप सम्यग्दर्शनज्ञानचारित्रमें ठहरता हुआ [**सकलविकल्पानां**] समस्त रागादिविकल्पोंका [**त्रुट्यतां**] नाश करता है अर्थात् जब समस्तरागादि विकल्पोंका नाश हो जावे तब निर्विकल्प ध्यानके प्रसादसे केवलज्ञान होता है । केवलज्ञानीका नाम अर्हंत है चाहे उसे जीवन्मुक्त कहो । जब अरहंत हुआ तब भाव मोक्ष हुई पीछे चार अघातियाओंको नाशकर सिद्ध हो जाता है । सिद्धको विदेहमोक्ष कहते हैं । यही मोक्ष होनेका उपाय है ॥ ३२६ ॥

अब केवलज्ञानकी ही महिमा कहते हैं;—[**केवलज्ञानेन**] केवल ज्ञानसे [**लोका-लोकं**] लोक अलोकको [**अनवरतं**] निरंतर [**जानन्**] जानता हुआ [**नियमेन**] निश्चयसे [**परमानंदमयः**] परम आनंदमई [**आत्मा**] यह आत्मा ही रत्नत्रयके प्रसा-दसे [**अर्हन्**] अरहंत [**भवति**] होता है । **भावार्थ**—समस्त लोकालोकको एक ही

अथ;—

जो जिणु केवलणाणमउ, परमाणंदसहाउ ।
सो परमप्पउ परमपउ, सो जिय अप्पसहाउ ॥ ३२८ ॥

यः जिनः केवलज्ञानमयः परमानंदस्वभावः ।
सः परमात्मा परमपरः स जीव आत्मस्वभावः ॥ ३२८ ॥

जो इत्यादि । **जो** यः **जिणु** अनेकभवगहनव्यसनप्रापणहेतून् कर्मारातीन् जयतीति जिनः । कथंभूतः । **केवलणाणमउ** केवलज्ञानाविनाभूतानंतगुणमयः । पुनरपि कथंभूतः । **परमाणंदसहाउ** इंद्रियविषयातीतः स्वात्मोत्थः रागादिविकल्परहितः परमानंदस्वभावः **सो परमप्पउ** स पूर्वोक्तोऽर्हन्नेव परमात्मा **परमपरु** प्रकृष्टानंतज्ञानादिगुणरूपा मा लक्ष्मीर्यस्य स भवति परमः संसारिभ्यः पर उत्कृष्टः पर इत्युच्यते परमश्चासौ परश्च परमपरः **सो** स पूर्वोक्तो वीतरागः सर्वज्ञः **जिय** हे जीव **अप्पसहाउ** आत्मस्वभाव इति । अत्र योसौ पूर्वोक्तभणितो भगवान् स एव संसारावस्थायां निश्चयेन शक्तिरूपेण जिन इत्युच्यते । केवलज्ञानावस्थायां व्यक्तिरूपेण च । तथैव च परमब्रह्मादिशब्दवाच्यः स एव तद्गुः

समयमें केवल ज्ञानसे जानता हुआ अरहंत कहलाता है । जिसका ज्ञान जाननेके क्रमसे रहित है । एक ही समयमें समस्तलोकालोकको प्रत्यक्ष जानता है आगे पीछे नहीं जानता । सब क्षेत्र सब काल सब भावको निरंतर प्रत्यक्ष जानता है । जो केवली भगवान परम आनंदमई है । वीतराग परम समरसी भावरूप जो परम आनंद अतींद्रिय अविनाशी सुख वही जिसका लक्षण है । निश्चयसे ज्ञानानंद स्वरूप है इसमें संदेह नहीं है ॥ ३२७ ॥

आगे ऐसा कहते हैं कि केवलज्ञान ही आत्माका निजस्वभाव है और केवलीको ही परमात्मा कहते हैं;—[**यः जिनः**] जो अनंत संसाररूपी वनके भ्रमणके कारण ज्ञानावरणादि आठ कर्मरूपी वैरी उनका जीतनेवाला वह [**केवलज्ञानमयः**] केवलज्ञानादि अनंत गुणमई है [**परमानंदस्वभावः**] और इंद्रियविषयसे रहित आत्मीकरागादि विकल्पोंसे रहित परमानंद ही जिसका स्वभाव है ऐसा जिनेश्वर केवलज्ञानमई अरहंत देव [**सः**] वही [**परमात्मा**] उत्कृष्ट अनंत ज्ञानादि गुणरूपलक्ष्मीवाला आत्मा परमात्मा है । उसीको वीतराग सर्वज्ञ कहते हैं [**जीव**] हे जीव वही [**परमपरः**] संसारियोंसे उत्कृष्ट है ऐसा जो भगवान वह तो व्यक्तिरूप है और [**स आत्मस्वभावः**] वह आत्माका ही स्वभाव है । **भावार्थ**—संसार अवस्थामें निश्चयनयकर शक्तिरूप विराजमान है इसलिये संसारीको शक्तिरूप जिन कहते हैं और केवलीको व्यक्तिरूप कहते हैं । द्रव्यार्थिक नयकर जैसा भगवान है वैसे ही सब जीव हैं इस तरह निश्चयनयकर जीवको परब्रह्म कहो परमशिव कहो जितने भगवानके नाम हैं उतनेही निश्चयनयकर विचारो तो

स्वयमेव कथयति । निश्चयनयेन सर्वे जीवा जिनस्वरूपाः जिनोपि सर्वजीवस्वरूप इति भावार्थः । तथा चोक्तं । "जीवा जिणवर जो मुणइ जिणवर जीव मुणेइ । सो समभावि परिट्ठियउ लहु णिव्वाणु लहेइ" ॥ ३२८ ॥ एवं चतुर्विंशतिसूत्रप्रमितमहास्थलमध्ये अर्हदवस्थाकथनमुख्यत्वेन सूत्रत्रयेण द्वितीयमंतरस्थलं गतं ।

अत ऊर्ध्वं परमात्मप्रकाशशब्दस्यार्थकथनमुख्यत्वेन सूत्रत्रयपर्यंतं व्याख्यानं करोति तद्यथा;—

सयलहं कम्महं दोसहं वि, जो जिणुदेउ विभिण्णु ।
सो परमप्पपयासु तुहुं, जोइय णियमें मण्णु ॥ ३२९ ॥

सकलेभ्यः कर्मभ्यः दोषेभ्यः अपि यो जिनदेवः विभिन्नः ।
तं परमात्मप्रकाशं त्वं योगिन् नियमेन मन्यस्व ॥ ३२९ ॥

सो तं **परमप्पपयासु** परमात्मप्रकाशसंज्ञं **तुहुं** त्वं कर्ता **मण्णु** मन्यस्व जानीहि **जोइय** हे योगिन् **णियमें** निश्चयेन । स कः । **जो जिणदेउ** यो जिनदेवः । किंविशिष्टः । **विभिण्णु** विशेषेण भिन्नः । केभ्यः । **सयलहं कम्महं** रागादिरहितचिदानंदैकस्वभावपरमात्मनो यानि भिन्नानि सर्वकर्माणि तेभ्यः । न केवलं कर्मभ्यो भिन्नः । **दोसहंवि** टंकोत्कीर्णज्ञायकैकस्वभावस्य परमात्मनो येऽनंतज्ञानसुखादिगुणास्तत्प्रच्छादका ये दोषास्तेभ्योपि भिन्न इत्यभिप्रायः ॥ ३२९ ॥

सब जीवोंके हैं सभी जीव जिनसमान हैं और जिनराज भी जीवोंके समान हैं ऐसा जानना । ऐसा दूसरी जगह भी कहा है । जो सम्यग्दृष्टि जीवोंको जिनवर जानें और जिनवरको जीव जानें जो जीवोंकी जाति है वही जिनवरकी जाति है और जो जिनवरकी जाति है वही जीवोंकी जाति है ऐसें महामुनि द्रव्यार्थिकनयकर जीव और जिनवरमें जातिभेद नहीं मानते वे मोक्ष पाते हैं ॥ ३२८ ॥ इसप्रकार चौवीस दोहाओंके महास्थलमें अरहंतदेवके कथनकी मुख्यतासे तीन दोहाओंमें दूसरा अंतरस्थल कहा ।

आगे परमात्माप्रकाश शब्दके अर्थके कथनकी मुख्यतासे तीन दोहा कहते हैं;— [**सकलेभ्यः कर्मभ्यः**] ज्ञानावरणादि अष्टकर्मोंसे [**दोषेभ्यः अपि**] और सब क्षुधादि अठारह दोषोंसे [**विभिन्नः**] रहित [**यः जिनदेवः**] जो जिनेश्वरदेव है [**तं**] उसको [**योगिन् त्वं**] हे योगी तू [**परमात्मप्रकाशं**] परमात्माप्रकाश [**नियमेन**] निश्चयसे [**मन्यस्व**] मान । अर्थात् जो निर्दोष जिनेंद्रदेव है वही परमात्माप्रकाश है । **भावार्थ**— रागादि रहित चिदानंद स्वभाव परमात्मासे भिन्न जो सब कर्म वे ही संसारके मूल हैं । जगतके जीव तो कर्मोंकर सहित हैं और भगवान जिनराज इनसे मुक्त हैं और सब दोषोंसे रहित हैं । वे दोष सब संसारी जीवोंके लगरहे हैं, ज्ञायकस्वभाव आत्माके अनंत

अथ;—

केवलदंसणु णाणु सुहु, वीरिउ जो जि अणंतु ।
सो जिणदेउवि परममुणि, परमपयासु मुणंतु ॥ ३३० ॥

केवलदर्शनं ज्ञानं सुखं वीर्यः य एव अनंतं ।
स जिनदेवोपि परममुनिः परमप्रकाशं मन्यमानः ॥ ३३० ॥

सो जिणदेउवि स जिनदेवोपि एवं भवति । न केवलं जिनदेवो भवति । **परममुणि** परम उत्कृष्टो मुनिः प्रत्यक्षज्ञानी । किं कुर्वन् सन् । **मुणंतु** मन्यमानो जानन् सन् । कं । **परमपयासु** परममुत्कृष्टं लोकालोकप्रकाशकं केवलज्ञानं यस्य स भवति परमप्रकाशस्तं परमप्रकाशं । स कः । **केवलदंसणु णाणु सुहु वीरिउ जो जि** केवलज्ञानदर्शनसुखवीर्यस्वरूपं य एव । कथंभूतं तत् केवलज्ञानादिचतुष्टयं । **अणंतु** युगपदनंतद्रव्यक्षेत्रकालभावपरिच्छेदकत्वादविनश्वरत्वाच्चानंतमिति भावार्थः ॥ ३३० ॥

अथ;—

जो परमप्पउ परमपउ, हरि हर बंभुवि बुद्धु ।
परमपयासु भणंति मुणि, सो जिणदेउ विसुद्धु ॥ ३३१ ॥

यः परमात्मा परमपदः हरिः हरः ब्रह्मापि बुद्धः ।
परमप्रकाशं भणंति मुनयः स जिनदेवो विशुद्धः ॥ ३३१ ॥

भणंति कथयंति । के ते । **मुणि** मुनयः प्रत्यक्षज्ञानिनः । कथंभूतं भणंति । **परमपयासु**

ज्ञान सुखादि गुणोंके आच्छादक हैं । उन दोषोंसे रहित जो सर्वज्ञ वही परमात्मप्रकाश है योगीश्वरोंके मनमें ऐसा ही निश्चय है । श्रीगुरु शिष्यसे कहते हैं कि हे योगिन् तू निश्चयसे ऐसा ही मान यही सत्पुरुषोंका अभिप्राय है ॥ ३२९ ॥

फिर भी इसी कथनको दृढ करते हैं;—[**केवलदर्शनं ज्ञानं सुखं वीर्यः**] केवल दर्शन केवल ज्ञान अनंतसुख अनंतवीर्य [**यदेव अनंतं**] ये अनंतचतुष्टय जिसके हों [**स जिनदेवः**] वही जिनदेव है [**परममुनिः**] वही परममुनि अर्थात् प्रत्यक्ष ज्ञानी है । क्या करता संता ! [**परमप्रकाशं मन्यमानः**] उत्कृष्ट लोकालोकका प्रकाशक जो केवल ज्ञान वही जिसके परमप्रकाश है उससे सकल द्रव्य क्षेत्र काल भव भावको जानता हुआ परमप्रकाशक है । ये केवल ज्ञानादि अनंत चतुष्टय एक ही समयमें अनंतद्रव्य अनंतक्षेत्र अनंतकाल और अनंतभावोंको जानते हैं इसलिये अनंत हैं अविनश्वर हैं इनका अंत नहीं है ऐसा जानना ॥ ३३० ॥

आगे जिनदेवके ही अनेक नाम हैं ऐसा निश्चय करते हैं;—[**यः**] जिस [**परमात्मा**] परमात्माको [**मुनयः**] मुनि [**परमपदः**] परमपद [**हरिः हरः ब्रह्मा अपि**]

परमप्रकाशः । यः कथंभूतः । **जो परमप्पउ** यः परमात्मा । पुनरपि कथंभूतः । **परमपउ** परमानंतज्ञानादिगुणाधारत्वेन परमपदस्वभावः । पुनरपि किंविशिष्टः । **हरि** हरिसंज्ञः **हरु** महेश्वराभिधानः **बंभुवि** परमब्रह्माभिधानोपि **बुद्धु** बुद्धः सुगतसंज्ञः **सो जिणदेउ** स एव पूर्वोक्तः परमात्मा जिनदेवः । किंविशिष्टः । **विसुद्धु** समस्तरागादिदोषपरिहारेण शुद्ध इति । अत्र य एव परमात्मप्रकाशसंज्ञो निर्दोषिपरमात्मा व्याख्यातः स एव परमात्मा, स एव परमपदः, स एव विष्णुसंज्ञः, स एवेश्वराभिधानः, स एव ब्रह्मशब्दवाच्यः स एव सुगतशब्दाभिधेयः, स एव जिनेश्वरः, स एव विशुद्ध इत्याद्यष्टाधिकसहस्रनामाभिधेयो भवति । नानारुचीनां जनानां तु कस्यापि केनापि विवक्षितेन नाम्नाराध्यः स्यादिति भावार्थः । तथा चोक्तं । ''नामाष्टकसहस्रेण युक्तं मोक्षपुरेश्वर''मित्यादि ॥ ३३१ ॥ एवं चतुर्विंशतिसूत्रप्रमितमहास्थलमध्ये परमात्मप्रकाशशब्दार्थकथनमुख्यत्वेन सूत्रत्रयेण तृतीयमंतरस्थलं गतम् ।

तदनंतरं सिद्धस्वरूपकथनमुख्यत्वेन सूत्रत्रयपर्यंतं व्याख्यानं करोति तद्यथा;—

झाणिं कम्मक्खउ करिवि, मुक्कउ होइ अणंतु ।
जिणवरदेवइं सो जि जिय, पभणिउ सिद्धु महंतु ॥ ३३२ ॥

ध्यानेन कर्मक्षयं कृत्वा मुक्तो भवति अनंतः ।
जिनवरदेवेन स एव जीव प्रभणितः सिद्धो महान् ॥ ३३२ ॥

हरि महादेव ब्रह्मा [**बुद्धः परमप्रकाशः भणंति**] बुद्ध और परमप्रकाश नामसे कहते हैं [**सः**] वह [**विशुद्धः जिनदेवः**] रागादि रहित शुद्ध जिनदेव ही है उसीके ये सब नाम हैं । **भावार्थ—**प्रत्यक्षज्ञानी उसे परमानंद ज्ञानादिगुणोंका आधार होनेसे परमपद कहते हैं, । वही विष्णु है वही महादेव है उसीका नाम पर ब्रह्म है, सबका ज्ञायक होनेसे बुद्ध है, सबमें व्यापक ऐसा जिनदेव देवाधिदेव परमात्मा अनेक नामोंसे गाया जाता है । समस्त रागादिक दोषके न होनेसे निर्मल है ऐसा जो अरहंत देव वही परमात्मप्रकाश है । निर्दोष परमात्माका व्याख्यान करनेसे वही परमात्मा परमपद, वही विष्णु, वही ईश्वर, वही ब्रह्म, वही शिव, वही सुगत, वही जिनेश्वर और वो ही विशुद्ध—इत्यादि एक हजार आठ नामोंसे गाया जाता है । नानारुचिके धारक ये संसारी जीव वे नानाप्रकारके नामोंसे जिनराजको आराधते हैं । ये नाम जिनराजके सिवाय दूसरेके नहीं हैं । ऐसा ही दूसरे ग्रंथोंमें भी कहा है— एक हजार आठ नामों सहित वह मोक्षपुरका स्वामी उसकी आराधना सब करते हैं । उसके अनंत नाम और अनंतरूप हैं । वास्तवमें नामसे रहित रूपसे रहित ऐसे भगवान देवको हे प्राणियों तुम आराधो ॥ ३३१ ॥ इसप्रकार चौवीस दोहाओंके महास्थलमें परमात्मप्रकाश शब्दके अर्थकी मुख्यतासे तीन दोहापर्यंत तीसरा अंतरस्थल कहा ।

पभणिउ प्रभणितः कथितः । केन कर्तृभूतेन । **जिणवरदेवइं** जिनवरदेवेन । कोसौ भणितः । **सिद्धु** सिद्धः । कथंभूतः । **महंतु** महापुरुषाराधितत्वात् केवलज्ञानादिमहागुणाधारत्वाच्च महान् । क एव । **सो जि** स एव । स कः । योसौ **मुक्कउ होइ** ज्ञानावरणादिभिः कर्मभिर्मुक्तो रहितः सम्यक्त्वाद्यष्टगुणसहितश्च **जिय** हे जीव । कथंभूतः । **अणंतु** न विद्यतेंतो विनाशो यस्य स भवत्यनंतः । किं कृत्वा पूर्वं मुक्तो भवति । **कम्मक्खउ करिवि** विशुद्धज्ञानदर्शनस्वभावादात्मद्रव्याद्विलक्षणं यदार्तरौद्रध्यानद्वयं तेनोपार्जितं यत्कर्म तस्य क्षयः कर्मक्षयस्तं कर्मक्षयं कृत्वा । केन । **झाणिं** रागादिविकल्परहितस्वसंवेदनज्ञानलक्षणेन ध्यानेनेति तात्पर्यम् ॥ ३३२ ॥

अथ;—

अण्णुवि बंधुवि तिहुयणहं, सासयसुक्खसहाउ ।
तित्थु जि सयलुवि कालु जिय, णिवसइ लद्धसहाउ ॥ ३३३ ॥

अन्यदपि बंधुरपि त्रिभुवनस्य शाश्वतसुखस्वभावः ।
तत्रैव सकलमपि कालं जीव निवसति लब्धस्वभावः ॥ ३३३ ॥

आगे सिद्धस्वरूपके कथनकी मुख्यतासे तीनदोहापर्यंत व्याख्यान करते हैं;— [**ध्यानेन**] शुक्लध्यानसे [**कर्मक्षयं**] कर्मोंका क्षय [**कृत्वा**] करके [**मुक्तः भवति**] जो मुक्त होता है [**अनंतः**] और अविनाशी है [**जीव**] हे जीव [**स एव**] वो ही [**जिनवरदेवेन**] जिनवरदेवने [**महान् सिद्धः प्रभणितः**] सबसे महान् सिद्ध भगवान कहा है । **भावार्थ**—अरहंत परमेष्ठी सकल सिद्धांतोंके प्रकाशक हैं वे सिद्ध परमात्माको सिद्ध परमेष्ठी कहते हैं जिसे सब संत पुरुष आराधते हैं । केवलज्ञानादि महान अनंतगुणोंके धारण करनेसे वह महान अर्थात् सबमें बड़ा है । जो सिद्ध भगवान ज्ञानावरणादि आठों ही कर्मोंसे रहित है और सम्यक्त्वादि आठ गुण सहित है । क्षायक सम्यक्त्व, केवल ज्ञान, केवलदर्शन, अनंतवीर्य, सूक्ष्म, अवगाहन, अगुरुलघु, अव्याबाध— इन आठ गुणोंसे मंडित है और जिसका अंत नहीं ऐसा निरंजनदेव विशुद्धज्ञान दर्शन स्वभाव जो आत्मद्रव्य उससे विपरीत जो आर्त रौद्र खोटे ध्यान उनसे उत्पन्न हुए जो शुभ अशुभकर्म उनका स्वसंवेदनज्ञानरूप शुक्लध्यानसे क्षय करके अक्षय पद पा लिया है । कैसा है शुक्लध्यान? रागादि समस्तविकल्पोंसे रहित परम निराकुलतारूप है । यही ध्यान मोक्षका मूल है इसीसे अनंत सिद्ध हुए और होंगे ॥ ३३२ ॥

आगे फिर भी सिद्धोंकी महिमा कहते हैं;—[**अन्यदपि**] फिर वे सिद्धभगवान [**त्रिभुवनस्य**] तीन लोकके प्राणियोंके [**बंधुरपि**] हित करने वाले हैं [**शाश्वतसुखस्वभावः**] और जिनका स्वभाव अविनाशी सुख है और [**तत्रैव**] उसी सिद्ध क्षेत्रमें

अण्णुवि इत्यादि । **अण्णुवि** अन्यदपि पुनरपि स पूर्वोक्तः सिद्धः । कथंभूतः । **बंधुवि** बंधुरेव । कस्य । **तिहुयणहं** त्रिभुवनस्थभव्यजनस्य । पुनरपि किं विशिष्टः । **सासयसुक्खसहाउ** रागादिरहिताव्याबाधशास्वतसुखस्वभावः । एवं गुणविशिष्टः सन् किं करोति स भगवान् । **तित्थु जि** तत्रैव मोक्षपदे **णिवसइ** निवसति । कथंभूतः सन् । **लद्धसहाउ** लब्धशुद्धात्मस्वभावः । कियत्कालं निवसति । **सयलुवि** समस्तमप्यनंतानंतकालपर्यंतं **जिय** हे जीवेति । अत्रानेन समस्तकालग्रहणेन किमुक्तं भवति । ये केचन वदंति मुक्तानां पुनरपि संसारे पतनं भवति तन्मतं निरस्तमिति भावार्थः ॥ ३३३ ॥

अथ;—

जम्मणमरणविवज्जियउ, चउगइदुक्खविमुक्कु ।
केवलदंसणणाणमउ, णंदइ तित्थु जि मुक्कु ॥ ३३४ ॥

जन्ममरणविवर्जितः चतुर्गतिदुःखविमुक्तः ।
केवलदर्शनज्ञानमयः नंदति तत्रैव मुक्तः ॥ ३३४ ॥

पुनरपि कथंभूतः स भगवान् । **जम्मणमरणविवज्जियउ** जन्ममरणविवर्जितः । पुनरपि किंविशिष्टः । **चउगइदुक्ख विमुक्कु** सहजशुद्धपरमानंदैकस्वभावं यदात्मसुखं तस्माद्विपरीतं यच्चतुर्गतिदुःखं तेन विमुक्तो रहितः । पुनरपि किंस्वरूपः । **केवलदंसणणाणमउ** क्रमकरण-

---

[**लब्धस्वभावः**] निजस्वभावको पाकर [**जीव**] हे जीव [**सकलमपि कालं**] सदा काल [**निवसति**] निवास करते हैं फिर चतुर्गतिमें नहीं आवेंगे । **भावार्थ**—सिद्ध परमेष्ठी तीनलोकके नाथ हैं और जिनका भव्य जीव ध्यान करके भवसागरके पार होते हैं इसलिये भव्योंके बंधु हैं हितकारी हैं । जिनका रागादि रहित अव्याबाध अविनाशी सुख स्वभाव है । ऐसे अनंत गुणरूप वे भगवान उस मोक्षपदमें सदा काल विराजते हैं । जिन्होंने शुद्ध आत्मस्वभाव पा लिया है । अनंत काल वीत गये और अनंतकाल आवेंगे परंतु वे प्रभु सदा काल सिद्ध क्षेत्रमें वस रहे हैं । समस्त काल रहते हैं इसके कहनेका प्रयोजन यह है कि जो कोई ऐसा कहते हैं कि मुक्त जीवोंका भी संसारमें पतन होता है सो उनका कहना खंडित किया गया ॥ ३३३ ॥

आगे फिर भी सिद्धोंका ही वर्णन करते हैं;—[**जन्ममरणविवर्जितः**] वे भगवान सिद्धपरमेष्ठी जन्म और मरणकर रहित हैं [**चतुर्गतिदुःखविमुक्तः**] चारों गतियोंके दुःखोंसे रहित हैं [**केवलदर्शनज्ञानमयः**] और केवलदर्शनकेवलज्ञानमई हैं ऐसे [**मुक्तः**] कर्म रहित हुए [**तत्रैव**] अनंतकालतक उसी सिद्ध क्षेत्रमें [**नंदति**] अपने स्वभावमें आनंदरूप विराजते हैं । **भावार्थ**—सहज शुद्ध परमानंद एक अखंड स्वभावरूप जो आत्मसुख उससे विपरीत जो चतुर्गतिके दुःख उनसे रहित हैं जन्ममरणरूप-

व्यवधानरहितत्वेन जगत्त्रयकालत्रयवर्तिपदार्थानां प्रकाशककेवलदर्शनज्ञानाभ्यां निर्वृत्तः केवलदर्शनज्ञानमयः । एवं गुणविशिष्टः सन् किंकरोति । **णंदइ** स्वकीयस्वाभाविकानंतज्ञानादिगुणैः सह नंदति वृद्धिं गच्छति । क । **तित्थु जि** तत्रैव मोक्षपदे । पुनरपि किं विशिष्टः सन् । **मुक्कु** ज्ञानावरणाद्यष्टकर्मनिर्मुक्तो रहितः अव्याबाधाद्यनंतगुणैः सहितश्चेति भावार्थः ॥ ३३४ ॥ एवं चतुर्विंशतिसूत्रप्रमितमहास्थलमध्ये सिद्धपरमेष्ठिव्याख्यानमुख्यत्वेन सूत्रत्रयेण चतुर्थमंतरस्थलं गतं ।

अथानंतरं परमात्मप्रकाशभावनारतपुरुषाणां फलं दर्शयन् सूत्रपर्यंतं व्याख्यानं करोति । तथाहि;—

जे परमप्पपयासु मुणि, भाविं भावहिं सत्थु ।
मोहु जिणेविणु सयलु जिय, ते बुज्झहिं परमत्थु ॥ ३३५ ॥

ये परमात्मप्रकाशं मुनयः भावेन भावयंति शास्त्रं ।
मोहं जित्वा सकलं जीव ते बुध्यंति परमार्थम् ॥ ३३५ ॥

भावहिं भावयंति ध्यायंति । के । **मुणि** मुनयः जे ये केचन । किं भावयंति । **सत्थु** शास्त्रं । कथंभूतं शास्त्रं । **परमप्पपयासु** परमात्मस्वभावप्रकाशत्वात्परमात्मप्रकाशसंज्ञं । केन भावयंति । **भाविं** समस्तरागाद्यपध्यानरहितशुद्धभावेन । किं कृत्वा पूर्वं । **जिणेविणु** जित्वा । कं । **मोहु** निर्मोहपरमात्मतत्त्वाद्विलक्षणं मोहं । कतिसंख्योपेतं । **सयलु** समस्तं

रोगोंसे रहित हैं अविनश्वरपुरमें सदा काल रहते हैं । जिनका ज्ञान संसारी जीवोंकी तरह विचाररूप नहीं है कि किसीको पहले जानें किसीको पीछे जानें उनका केवलज्ञान और केवलदर्शन एक ही समयमें सब द्रव्य सब क्षेत्र सब काल और सब भावोंको जानता है । लोकालोक प्रकाशी आत्मा निज भाव अनंत ज्ञान अनंत दर्शन अनंतसुख और अनंत वीर्य मई है । ऐसे अनंत गुणोंके सागर भगवान् सिद्ध परमेष्ठी स्वद्रव्य स्वक्षेत्र स्वकाल स्वभावरूप चतुष्टयमें निवास करते हुए सदा आनंदरूप लोकके शिखरपर विराजरहे हैं जिसका कभी अंत नहीं उसी सिद्धपदमें सदा काल विराजते हैं केवलज्ञान दर्शनकर घट २ में व्यापक हैं । सकल कर्मोपाधिरहित महा निरुपाधि निराबाधपना आदिदे अनंतगुणों सहित मोक्षमें आनंद विलास करते हैं ॥ ३३४ ॥ इस तरह चौबीस दोहावाले महास्थलमें सिद्ध परमेष्ठीके व्याख्यानकी मुख्यताकर तीनदोहाओंमें चौथा अंतरस्थल कहा ।

आगे तीन दोहाओंमें परमात्मप्रकाशकी भावनामें लीन पुरुषोंके फलको दिखाते हुए व्याख्यान करते हैं;—[**ये मुनयः**] जो मुनि [**भावेन**] भावोंसे [**परमात्मप्रकाशं शास्त्रं**] इस परमात्मप्रकाश नामा शास्त्रका [**भावयंति**] चिंतवन करते हैं हमेशा इसीका

निरवशेषं जिय हे जीवेति **ते** त एवं गुणविशिष्टास्तपोधनाः **बुज्झहिं** बुध्यंति । कं । **परमत्थु** परमार्थशब्दवाच्यं चिदानंदैकस्वभावं परमात्मानमिति भावार्थः ॥ ३३५ ॥

अथ;—

अण्णु जि भत्तिए जे मुणहिं, इहु परमप्पपयासु ।
लोयालोयपयासयरु पावहिं तेवि पयासु ॥ ३३६ ॥

अन्यदपि भक्त्या ये मन्यंते इमं परमात्मप्रकाशं ।
लोकालोकप्रकाशकं प्राप्नुवंति तेपि प्रकाशम् ॥ ३३६ ॥

अण्णु जि इत्यादि । **अण्णु जि** अन्यदपि विशेषफलं कथ्यते **भत्तिए जे मुणहिं** भक्त्या ये मन्यंते जानंते । कं । **परमप्पपयासु** इमं प्रत्यक्षीभूतं परमात्मप्रकाशग्रंथमर्थतस्तु परमात्मप्रकाशशब्दवाच्यं परमात्मतत्त्वं **पावहिं** प्राप्नुवंति **तेवि** तेपि । कं । **पयासु** प्रकाश-शब्दवाच्यं केवलज्ञानं तदाधारपरमात्मानं वा । कथंभूतं परमात्मप्रकाशं । **लोयालोयप-यासयरु** अनंतगुणपर्यायसहितत्रिकालविषयलोकालोकप्रकाशकमिति तात्पर्यं ॥ ३३६ ॥

अभ्यास करते हैं [**जीव**] हे जीव [**ते**] वे [**सकलं मोहं**] समस्त मोहको [**जित्वा**] जीतकर [**परमार्थं बुध्यंति**] परमतत्त्वको जानते हैं । **भावार्थ**—जो कोई सब परिग्रहके त्यागी साधु परमात्मस्वभावका प्रकाशक इस परमात्मप्रकाश नामा ग्रंथको समस्त रागादि खोटे ध्यान रहित जो शुद्धभाव उससे निरंतर विचारते हैं वे निर्मोह परमात्मतत्त्वसे विपरीत जो मोह नामा कर्म उसकी समस्त प्रकृतियोंको मूलसे उखाड़ देते हैं मिथ्यात्वरागादिकोंको जीतकर निर्मोह निराकुल चिदानंद स्वभाव जो परमात्मा उसको अच्छीतरह जानते हैं ॥ ३३५ ॥

आगे फिर भी परमात्मप्रकाशके अभ्यासका फल कहते हैं;—[**अन्यदपि**] और भी फल कहते हैं [**ये**] जो कोई भव्य जीव [**भक्त्या**] भक्तिसे [**इमं परमात्मप्रकाशं**] इस परमात्माप्रकाश शास्त्रको [**मन्यंते**] पढें सुनें इसका अर्थ जानें [**तेपि**] वे भी [**लोकालोकप्रकाशकं**] लोकालोकको प्रकाशनेवाले [**प्रकाशं**] केवलज्ञान तथा उसके आधारभूत परमात्मतत्त्वको शीघ्र ही पासकेंगे । **अर्थात्** परमात्मप्रकाश नाम परमात्मतत्त्वका भी है और इस ग्रंथका भी है सो परमात्मप्रकाशग्रंथके पढनेवाले दोनों हीको पावेंगे । प्रकाश ऐसा केवलज्ञानका नाम है उसका आधार जो शुद्ध परमात्मा अनंत गुण-पर्याय सहित तीनकालका जाननेवाला लोकालोकका प्रकाशक ऐसा आत्मद्रव्य उसे तुरंत ही पावेंगे ॥ ३३६ ॥

अथ;—

जे परमप्पपयासयहं, अणुदिणु णाउ लयंति ।
तुट्टइ मोहु तडत्ति तहं, तिहुयणणाह हवंति ॥ ३३७ ॥

ये परमात्मप्रकाशस्य अनुदिनं नाम गृह्णंति ।
त्रुट्यति मोहः झटिति तेषां त्रिभुवननाथा भवंति ॥ ३३७ ॥

लयंति गृह्णंति **जे** ये विवेकिनः **णाउ** नाम । कस्य । **परमप्पपयासयहं** व्यवहारेण परमात्मप्रकाशाभिधानग्रंथस्य निश्चयेन तु परमात्मप्रकाशशब्दवाच्यस्य केवलज्ञानाद्यनंतगुणस्वरूपस्य परमात्मपदार्थस्य । कथं । **अणुदिणु** अनवरतं । तेषां किं फलं भवति । **तुट्टइ** नश्यति । कोसौ । **मोहु** निर्मोहात्मद्रव्याद्विलक्षणो मोहः **तडत्ति** झटिति **तहं** तेषां । न केवलं मोहो नश्यति । **तिहुयणणाह हवंति** तेन पूर्वोक्तेन निर्मोहशुद्धात्मतत्त्वभावनाफलेन पूर्वं देवेंद्रचक्रवर्त्यादिविभूतिविशेषं लब्ध्वा पश्चाज्जिनदीक्षां गृहीत्वा च केवलज्ञानमुत्पाद्य त्रिभुवननाथा भवंतीति भावार्थः ॥ ३३७ ॥ एवं चतुर्विंशतिसूत्रप्रमितमहास्थलमध्ये परमात्मप्रकाशभावनाफलकथनमुख्यत्वेन सूत्रत्रयेण पंचमस्थलं गतं ।

अथ परमात्मप्रकाशशब्दवाच्यो योसौ परमात्मा तदाराधकपुरुषलक्षणज्ञापनार्थं सूत्रत्रयेण व्याख्यानं करोति । तद्यथा—

जे भवदुक्खहं बीहिया, पउ इच्छहिं णिव्वाणु ।
इह परमप्पपयासयहं, ते पर जोग्ग वियाणु ॥ ३३८ ॥

ये भवदुःखेभ्यः भीताः पदं इच्छंति निर्वाणम् ।
अस्य परमात्मप्रकाशकस्य ते परं योग्या विजानीहि ॥ ३३८ ॥

ते पर त एव **जोग्ग वियाणु** योग्या भवंतीति विजानीहि । कस्य । **इह परमप्पपयास-**

आगे फिर भी परमात्मप्रकाशके पढनेका फल कहते हैं;—[**ये**] जो कोई भव्यजीव [**परमात्मप्रकाशस्य**] व्यवहारनयसे परमात्माके प्रकाश करनेवाले इस ग्रंथका तथा निश्चयनयसे केवलज्ञानादि अनंत गुण सहित परमात्मपदार्थका [**अनुदिनं**] हमेशा [**नाम गृह्णंति**] नाम लेते हैं सदा उसीका स्मरण करते हैं [**तेषां**] उनका [**मोहः**] निर्मोह आत्मद्रव्यसे विलक्षण जो मोह नामा कर्म [**झटिति त्रुट्यति**] शीघ्र ही टूट जाता है और वे [**त्रिभुवननाथा भवंति**] शुद्धात्मतत्त्वकी भावनाके फलसे पूर्व देवेंद्र चक्रवर्त्यादिकी महान विभूति पाकर चक्रवर्तिपदको छोड़कर जिनदीक्षा ग्रहण करके केवलज्ञानको उत्पन्न कराके तीन भुवनके नाथ होते हैं, यह सारांश है ॥ ३३७ ॥ इस प्रकार चौवीस दोहाओंके महास्थलमें परमात्मप्रकाशकी भावनाके फलके कथनकी मुख्यतासे तीन दोहाओंमें पांचवां अंतर स्थल कहा ।

यहं व्यवहारेणास्य परमात्मप्रकाशाभिधानग्रंथस्य परमार्थेन तु परमात्मप्रकाशशब्दवाच्यस्य निर्दोषिपरमात्मनः । ते के । **जे बीहिया** ये भीताः । केषां । **भवदुक्खहं** रागादिविकल्परहितपरमाह्लादरूपशुद्धात्मभावनोत्थपारमार्थिकसुखविलक्षणानां नारकादिभवदुःखानां । पुनरपि किं कुर्वंति । **जे इच्छहिं** ये इच्छंति । किं । **पउ** पदं स्थानं । कथंभूतं । **णिव्वाणु** निर्वृतिगतपरमात्माधारभूतं निर्वाणशब्दवाच्यं मुक्तिस्थानमित्यभिप्रायः ॥ ३३८ ॥

अथ;—

जे परमप्पहं भत्तियर, विसयण जे विरमंति ।
ते परमप्पपयासयहं, मुणिवर जोग्ग हवंति ॥ ३३९ ॥

ये परमात्मनो भक्तिपराः विषयेभ्यः ये विरमंति ।
ते परमात्मप्रकाशकस्य मुनिवरा योग्या भवंति ॥ ३३९ ॥

हवंति भवंति **जोग्ग** योग्याः । के ते । **मुणिवर** मुनिप्रधानाः । के । **ते** ते पूर्वोक्ताः । कस्य योग्या भवंति । **परमप्पपयासयहं** व्यवहारेण परमात्मप्रकाशसंज्ञग्रंथस्य परमार्थेन तु परमात्मप्रकाशशब्दवाच्यस्य शुद्धात्मस्वभावस्य । कथंभूता ये । **जे परमप्पहं भत्तियर** ये परमात्मनो भक्तिपराः । पुनरपि किं कुर्वंति ये । **विसयण जे विरमंति** निर्विषयपरमात्म-

---

आगे परमात्मप्रकाश शब्दसे कहा गया जो प्रकाशरूप शुद्ध परमात्मा उसकी आराधनाके करनेवाले महा पुरुषोंके लक्षण जाननेके लिये तीन दोहाओंमें व्याख्यान करते हैं;—[**ते परं**] वे ही महापुरुष [**अस्य परमात्मप्रकाशकस्य**] इस परमात्मप्रकाशग्रंथके अभ्यास करनेके [**योग्याः विजानीहि**] योग्य जानो [**ये**] जो [**भवदुःखेभ्यः**] चतुर्गतिरूप संसारके दुःखोंसे [**भीताः**] डर गये हैं और [**निर्वाणं पदं**] मोक्षपदको [**इच्छंति**] चाहते हैं । **भावार्थ**—व्यवहारनयकर परमात्मप्रकाश नामा ग्रंथकी और निश्चयनयकर निर्दोषपरमात्मतत्त्वकी भावनाके योग्य वे ही हैं जो रागादि विकल्प रहित परम आनंदरूप शुद्धात्मतत्त्वकी भावनासे उत्पन्न हुए अतींद्रिय अविनश्वर सुखसे विपरीत जो नारकादि संसारके दुःख उनसे डर गये हैं जिनको चतुर्गतिके भ्रमणका डर है और जो सिद्धपरमेष्ठीका निवास मोक्षपदको चाहते हैं ॥ ३३८ ॥

आगे फिर भी उन्हीं पुरुषोंकी महिमा कहते हैं;—[**ये**] जो [**परमात्मनः भक्तिपराः**] परमात्माकी भक्ति करनेवाले [**ये**] जो मुनि [**विषयेभ्यः विरमंति**] विषयकषायोंमें नहीं रमते हैं [**ते मुनिवराः**] वे ही मुनीश्वर [**परमात्मप्रकाशस्य योग्याः**] परमात्मप्रकाशके अभ्यासके योग्य [**भवंति**] हैं । **भावार्थ**—व्यवहारनयकर परमात्मप्रकाश नामका ग्रंथ और निश्चयनयकर निजशुद्धात्मस्वरूप परमात्मा उसकी भक्तिमें जो

तत्त्वानुभूतिसमुत्पन्नातींद्रियपरमानंदसुखरसास्वादतृप्ताः संतः सुलभान्मनोहरानपि विषयान्न रमंत इत्यभिप्रायः ॥ ३३९ ॥

अथ;—

णाणवियक्खणु, सुद्धमणु, जो जणु एहउ कोइ ।
सो परमप्पपयासयहं, जोग्गु भणंति जि जोइ ॥ ३४० ॥
ज्ञानविचक्षणः शुद्धमना यो जन ईदृशः कश्चिदपि ।
तं परमात्मप्रकाशकस्य योग्यं भणंति ये योगिनः ॥ ३४० ॥

भणंति कथयंति **जि जोइ** ये परमयोगिनः । कं भणंति । **जोग्गु** योग्यं । कस्य । **परमप्पपयासयहं** व्यवहारनयेन परमात्मप्रकाशाभिधानशास्त्रस्य निश्चयेन तु परमात्मप्रकाशशब्दवाच्यस्य शुद्धात्मस्वरूपस्य । कं पुरुषं योग्यं भणंति । **सो** तं । तं कं । **जो जणु एहउ कोइ** यो जनः इत्थंभूतः कश्चित् । कथंभूतः । **णाणवियक्खणु** स्वसंवेदनज्ञानविचक्षणः । पुनरपि कथंभूतः । **सुद्धमणु** परमात्मानुभूतिविलक्षणरागद्वेषमोहस्वरूपसमस्तविकल्पजालपरिहारेण शुद्धात्मा इत्यभिप्रायः ॥ ३४० ॥ एवं चतुर्विंशतिसूत्रप्रमितमहास्थलमध्ये परमाराधकपुरुषलक्षणकथनरूपेण सूत्रत्रयेण षष्ठमंतरस्थलं गतम् ।

तत्पर हैं वे विषय रहित जो परमात्मतत्त्वकी अनुभूति उससे उपार्जन किया जो अतींद्रिय परमानंदसुख उसके रसके आस्वादसे तृप्त हुए विषयोंमें नहीं रमते हैं । जिनको मनोहर विषय आकर प्राप्त हुए हैं तौभी वे उनमें नहीं रमते ॥ ३३९ ॥

आगे फिर भी यही कथन करते हैं;—[**यः जनः**] जो प्राणी [**ज्ञानविचक्षणः**] स्वसंवेदनज्ञानकर विचक्षण (बुद्धिमान) है और [**शुद्धमनाः**] जिसका मन परमात्माकी अनुभूतिसे विपरीत जो रागद्वेषमोहरूप समस्त विकल्पजाल उनके त्यागसे शुद्ध है [**कश्चिदपि ईदृशः**] ऐसा कोई भी सत्पुरुष हो [**तं**] उसे [**ये योगिनः**] जो योगीश्वर हैं वे [**परमात्मप्रकाशस्य योग्यं**] परमात्मप्रकाशके आराधने योग्य [**भणंति**] कहते हैं । **भावार्थ**—व्यवहारनयकर यह परमात्मप्रकाश नामा द्रव्यसूत्र और निश्चयनयकर शुद्धात्मस्वभाव सूत्र उसके आराधनेको वे ही पुरुष योग्य हैं जो कि आत्मज्ञानके प्रभावसे महा प्रवीण हैं और जिनके मिथ्यात्व राग द्वेषादिमलकर रहित शुद्ध भाव हैं । ऐसे पुरुषोंके सिवाय दूसरा कोई भी परमात्मप्रकाशके आराधने योग्य नहीं है ॥ ३४० ॥ इस प्रकार चौवीस दोहाओंके महास्थलमें आराधक पुरुषके लक्षण तीन दोहाओंमें कह छठा अंतरस्थल समाप्त हुआ ।

अथ शास्त्रफलकथनमुख्यत्वेन सूत्रमेकं तदनंतरमौद्धत्यपरिहारेण च सूत्रद्वयपर्यंतं व्याख्यानं करोति । तद्यथा;—

लक्खणछंदविवज्जियउ, एहु परमप्पपयासु ।
कुणइ सुहावि भावियउ, चउगइदुक्खविणासु ॥ ३४१ ॥

लक्षणछंदोविवर्जितः अयं परमात्मप्रकाशः ।
करोति सुभावेन भावितः चतुर्गतिदुःखविनाशं ॥ ३४१ ॥

लक्खण इत्यादि । **लक्खणछंदविवज्जियउ** लक्षणछंदोविवर्जितोऽयं । अयं कः । **इहु परमप्पपयासु** एष परमात्मप्रकाशः । एवंगुणविशिष्टोऽयं किं करोति । **कुणइ** करोति । कं । **चउगइदुक्खविणासु** चतुर्गतिदुःखविनाशं । कथंभूतः सन् । **भावियउ** भावितः । केन । **सहावइं** शुद्धस्वभावेनेति । तथाहि । यद्यप्ययं परमात्मप्रकाशग्रंथः शास्त्रक्रमव्यवहारेण दोहकछंदसा प्राकृतलक्षणेन च युक्तः तथापि निश्चयेन परमात्मप्रकाशशब्दवाच्यशुद्धात्मस्वरूपापेक्षया लक्षणछंदोविवर्जितः । एवंभूतः सन्नयं किं करोति । शुद्धभावनया भावितःसन् शुद्धात्मसंवित्तिसमुत्पन्नरागादिविकल्परहितपरमानंदैकलक्षणसुखविपरीतानां चतुर्गतिदुःखानां विनाशं करोतीति भावार्थः ॥ ३४१ ॥

अथ श्रीयोगींद्रदेव औद्धत्यं परिहरति;—

इत्थु ण लेव्वउ पंडियहिं, गुणदोसुवि पुणरुत्तु ।
भट्टपभायरकारणइं, मइ पुणु पुणुवि पउत्तु ॥ ३४२ ॥

आगे शास्त्रके फलके कथनकी मुख्यताकर एक दोहा और उद्धतपनेके त्यागकी मुख्यताकर दो दोहे इसतरह तीनदोहाओंमें व्याख्यान करते हैं;—[**अयं परमात्मप्रकाशः**] यह परमात्माप्रकाश [**सुभावेन भावितः**] शुद्ध भावोंकर भाया हुआ [**चतुर्गतिदुःखविनाशं**] चारों गतीके दुःखोंका विनाश [**करोति**] करता है । जो परमात्मप्रकाश [**लक्षणछंदोविवर्जितः**] यद्यपि व्यवहारनयकर प्राकृतरूप दोहा छंदोंकर सहित है और अनेक लक्षणोंकर सहित है तौभी निश्चयनयकर परमात्मप्रकाश जो शुद्धात्मस्वरूप वह लक्षण और छंदोंकर रहित है । **भावार्थ**—शुभलक्षण और प्रबंध ये दोनों परमात्मामें नहीं हैं । परमात्मा शुभाशुभलक्षणोंकर रहित है और जिसके कोई प्रबंध नहीं अनंतरूप है उपयोगलक्षणमई परमानंदलक्षणस्वरूप है सो भावोंसे उसको आराधो, वही चतुर्गतिके दुःखोंका नाश करने वाला है ॥ शुद्ध परमात्मा तो व्यवहार लक्षण और श्रुतरूप छंदोंसे रहित है इनसे भिन्न निजलक्षणमई है और यह परमात्मप्रकाशनामा अध्यात्म ग्रंथ यद्यपि दोहकछंदरूप है और प्राकृतलक्षणरूप है परंतु इसमें स्वसंवेदनज्ञानकी मुख्यता है छंद अलंकारादिकी मुख्यता नहीं है ॥ ३४१ ॥

अत्र न ग्राह्यः पंडितैः गुणो दोषोपि पुनरुक्तः ।
भट्टप्रभाकरकारणेन मया पुनः पुनरपि प्रोक्तम् ॥ ३४२ ॥

इत्थु इत्यादि । **इत्थु** अत्र ग्रंथे **ण लेवउ** न ग्राह्यः । कैः । **पंडियहिं** पंडितैर्विवेकिभिः । कोसौ । **गुण दोसुवि** गुणो दोषोपि । कथंभूतः । **पुणुरुत्तु** पुनरुक्तः । कस्मान्न ग्राह्यः । यतः **मइ पुणु पुणुवि पउत्तु** मया पुनः पुनः प्रोक्तं । किं तत् । वीतरागपरमात्मतत्त्वं । किमर्थं । **भट्टपहायरकारणइं** प्रभाकरभट्टनिमित्तेनेति । अत्र भावनाग्रंथे समाधिशतकादिवत् पुनरुक्तदूषणं नास्ति इति । तदपि कस्मादिति चेत् । अर्थं पुनः पुनश्चिंतनलक्षणमिति वचनादिति मत्वा प्रभाकरभट्टव्याजेन समस्तजनानां सुखबोधार्थं बहिरंतःपरमात्मभेदेन तु त्रिविधात्मतत्त्वं बहुधाप्युक्तमिति भावार्थः ॥ ३४२ ॥

अथ;—

जं मइ किंपिवि जंपियउ, जुत्ताजुत्तुवि इत्थु ।
तं वरणाणि खमंतु महु, जे बुज्झहिं परमत्थु ॥ ३४३ ॥

यत् मया किमपि जल्पितं युक्तायुक्तमपि अत्र ।
तत् वरज्ञानिनः क्षाम्यंतु मम ये बुध्यंते परमार्थम् ॥ ३४३ ॥

जं इत्यादि । **जं मइ किंपिवि जंपियउ** यन्मया किमपि जल्पितं । किं जल्पितं । **जुत्ताजुत्तुवि** शब्दविषये अर्थविषये वा युक्तायुक्तमपि **इत्थु** अत्र परमात्मप्रकाशाभिधानग्रंथे **खमंतु** क्षमां कुर्वंतु । किं तत् । पूर्वोक्तदूषणं । के । **वरणाणि** वीतरागनिर्विकल्पस्वसंवेदन-

---

आगे श्री योगींद्रदेव उद्धतपनेका त्याग दिखलाते हैं;—[अत्र] श्री योगींद्रदेव कहते हैं अहो भव्यजीव हो इस ग्रंथमें [**पुनरुक्तः**] पुनरुक्तका [**गुणो दोषोपि**] दोष भी [**पंडितैः**] आप पंडितजन [**न ग्राह्यः**] ग्रहण नहीं करें और कविकलाका गुण भी न लें क्योंकि [**मया**] मैंने [**भट्टप्रभाकरकारणेन**] प्रभाकर भट्टके संबोधनेकेलिये [**पुनः पुनरपि प्रोक्तं**] वीतरागपरमानंदरूप परमात्म तत्त्वका कथन वार वार किया है । **भावार्थ**—इस शुद्धात्मभावनाके ग्रंथमें पुनरुक्तका दोष नहीं लगता । **समाधितंत्र** ग्रंथकी तरह इस ग्रंथमें भी वार २ शुद्धस्वरूपका ही कथन किया है वारंवार उसी अर्थका चिंतवन है ऐसा जानकर इसका रहस्य (अभिप्राय) वार २ चिंतवना । प्रभाकर भट्टकी मुख्यताकर समस्त जीवोंको सुखसे प्रतिबोध होनेकेलिये इस ग्रंथमें वार वार बहिरात्मा अंतरात्मा और परमात्माका कथन किया है ऐसा जानना ॥ ३४२ ॥

आगे श्रीयोगींद्राचार्य ज्ञानी जनोंसे प्रार्थना करते हैं कि मैंने जो किसी जगह छंद अलंकारादिमें युक्त अयुक्त कहा हो तो उसे पंडितजन परमार्थके जानने वाले मुझपर क्षमा करें;—[**अत्र**] इस ग्रंथमें [**यत्**] जो [**मया**] मैंने [**किमपि**] कुछ भी

ज्ञानयुक्ता विशिष्टज्ञानिनः । कस्य । मह्नु मम योगींद्रदेवाभिधानस्य । कथंभूता ये ज्ञानिनः । जे बुज्झहिं ये केचन बुध्यंते जानंति । कं । परमत्थु रागादिदोषरहितमनंतज्ञानदर्शनसुखवीर्यसहितं च परमार्थशब्दवाच्यं शुद्धात्मानमिति भावार्थः ॥ ३४३ ॥ इति सूत्रत्रयेण सप्तममंतरस्थलं गतं । एवं सप्तभिरंतरस्थलैश्चतुर्विंशतिसूत्रप्रमितं महास्थलं समाप्तम् ।

अथैकवृत्तेन प्रोत्साहनार्थं पुनरपि फलं दर्शयति;—

जं तत्तं णाणरूवं परममुणिगणा णिच्च झायंति चित्ते
जं तत्तं देहचत्तं णिवसइ भुवणे सव्वदेहीण देहे ।
जं तत्तं दिव्वदेहं तिहुवणगुरुगं सिज्झए संतजीवे
तं तत्तं जस्स सुद्धं फुरइ णियमणे पावए सो हि सिद्धिं ॥ ३४४ ॥

यत् तत्त्वं ज्ञानरूपं परममुनिगणा नित्यं ध्यायंति चित्ते
यत् तत्त्वंदेहत्यक्तं निवसति भुवने सर्वदेहिनां देहे ।
यत् तत्त्वं दिव्यदेहं त्रिभुवनगुरुकं सिध्यति शांतजीवे
तत् तत्त्वं यस्य शुद्धं स्फुरति निजमनसि प्राप्नोति स हि सिद्धिम् ॥ ३४४ ॥

पावए सो प्राप्नोति स हि स्फुटं । कं । **सिद्धिं** मुक्तिं । यस्य किं । **जस्स णियमणे फुरइ** यस्य निजमनसि स्फुरति प्रतिभाति । कि कर्मतापन्नं । **तं तत्तं** तत्तत्त्वं । कथंभूतं ।

[**युक्तायुक्तमपि जल्पितं**] युक्त अथवा अयुक्त शब्द कहा होवे तो [**तत्**] उसे [**ये वरज्ञानिनः**] जो महान ज्ञानके धारक [**परमार्थं**] परम अर्थको [**बुध्यंते**] जानते हैं वे पंडित जन [**मम क्षाम्यंतु**] मेरे ऊपर क्षमा करें । **भावार्थ**—मेरी छद्मस्थकी बुद्धि है जो कदाचित् मैंने शब्दमें अर्थमें तथा छंद अलंकारमें अयुक्त कहा हो वह मेरा दोष क्षमा करो । सुधार लो । जो विवेकी परमअर्थको अच्छी तरह जानते हैं वे मुझपर कृपा करो मेरा दोष न लो । यह प्रार्थना योगींद्राचार्यने महामुनियोंसे की । जो महामुनि अपने शुद्धस्वरूपको अच्छी तरह अपनेमें जानते हैं । जो निजस्वरूप रागादि दोष रहित अनंत दर्शन अनंत सुख अनंत वीर्यकर सहित है ऐसे अपने स्वरूपको अपनेमें ही देखते हैं, जानते हैं और अनुभवते हैं वे ही इस ग्रंथके सुननेके योग्य हैं और सुधारनेके योग्य हैं ॥ ३४३ ॥ इस प्रकार तीन दोहाओंमें सातवां अंतरस्थल कहा । इस तरह चौवीस दोहाओंका महास्थल पूर्ण हुआ ।

आगे एक स्रग्धरा नामके छंदमें फिर भी इस ग्रंथके पढनेका फल कहते हैं;—[**तत्**] वह [**तत्त्वं**] निज आत्मतत्त्व [**यस्य निजमनसि**] जिसके मनमें [**स्फुरति**] प्रकाशमान हो जाता है [**स हि**] वो ही साधु [**सिद्धिं प्राप्नोति**] सिद्धिको पाता है । कैसा

सुद्धं रागादिरहितं । पुनरपि कथंभूतं यत् । **जं तत्तं णाणरूवं** यदात्मतत्त्वं ज्ञानरूपं । पुनरपि किं विशिष्टं यत् । **णिच्च झायंति** नित्यं ध्यायंति । क । **चित्ते** मनसि । के ध्यायंति । **परममुणिगणा** परममुनिसमूहाः । पुनरपि किं विशिष्टं यत् । **जं तत्तं देहचत्तं** यत्परमात्मतत्त्वं देहत्यक्तं देहाद्भिन्नं । पुनरपि कथंभूतं यत् । **णिवसइ** निवसति । क । **भुवणे सव्वदेहीण देहे** त्रिभुवने सर्वदेहिनां संसारिणां देहे । पुनरपि कीदृशं यत् । **जं तत्तं दिव्वदेहं** यत् शुद्धात्मतत्त्वं दिव्यदेहं दिव्यं केवलज्ञानादिशरीरं । शरीरमिति कोर्थः । स्वरूपं । पुनश्च कीदृशं यत् । **तिहुयणगुरुगं** अव्याबाधानंतसुखादिगुणेन त्रिभुवनादपि गुरुं पूज्यमिति त्रिभुवनगुरुकं । पुनरपि किं रूपं यत् । **सिज्झए** सिद्ध्यति निष्पत्तिं याति । क । **संतजीवे** ख्यातिपूजालाभादिसमस्तमनोरथविकल्पजालरहितत्वेन परमोपशांतजीवस्वरूपे इत्यभिप्रायः ॥ ३४४ ॥

अथ ग्रंथस्यावसाने मंगलार्थमाशीर्वादरूपेण नमस्कारं करोति;—

परमपयगयाणं भासओ दिव्वकाओ
मणसि मुणिवराणं मुक्खदो दिव्वजोओ ।
विसयसुहरयाणं दुल्लहो जो हु लोए
जयउ सिवसरूवो केवलो कोवि बोहो ॥ ३४५ ॥

परमपदगतानां भासको दिव्यकायः
मनसि मुनिवराणां मोक्षदो दिव्ययोगः ।
विषयसुखरतानां दुर्लभो यो हि लोके
जयतु शिवस्वरूपः केवलः कोपि बोधः ॥ ३४५ ॥

है वह तत्त्व ? जो कि [**शुद्धं**] रागादि मलरहित है [**ज्ञानरूपं**] और ज्ञानरूप है जिसको [**परममुनिगणाः**] परममुनीश्वर [**नित्यं**] सदा [**चित्ते ध्यायंति**] अपने चित्तमें ध्याते हैं [**यत् तत्त्वं**] जो तत्त्व [**भुवने**] इस लोकमें [**सर्वदेहिनां देहे**] सब प्राणियोंके शरीरमें [**निवसति**] मौजूद है [**देहत्यक्तं**] और आप देहसे रहित है [**यत् तत्त्वं**] जो तत्त्व [**दिव्यदेहं**] केवलज्ञान और आनंदरूप अनुपम देहको धारण करता है [**त्रिभुवनगुरुकं**] तीनभुवनमें श्रेष्ठ है [**शांतजीवे सिध्यति**] जिसको आराधकर शांतपरिणामी संतपुरुष सिद्धपद पाते हैं । **भावार्थ**—ऐसा वह चैतन्यतत्त्व जिसके चित्तमें प्रगट हुआ है वही साधु सिद्धिको पाता है । अव्याबाध अनंतसुख आदि गुणोंकर वह तत्त्व तीनलोकका गुरु है संत पुरुषोंके ही हृदयमें वह तत्त्व सिद्ध होता है । कैसे हैं संत ? जो अपनी बड़ाई, अपनी प्रतिष्ठा और लाभादि समस्त मनोरथ विकल्प जालोंसे रहित हैं । जिन्होंने अपना स्वरूप परमशांतभावरूप पा लिया है ॥ ३४४ ॥

जयउ सर्वोत्कर्षेण वृद्धिं गच्छतु । कोसौ । **दिव्वकाओ** परमौदारिकशरीराभिधान-दिव्यकायस्तदाधारो भगवान् । कथंभूतः । **भासओ** दिवाकरसहस्रादप्यधिकतेजस्त्वाद्भासकः प्रकाशकः । केषां कायः । **परमपयगयाणं** परमानंतज्ञानादिगुणास्पदं यदर्हत्पदं तत्र गतानां । न केवलं दिव्यकायो जयतु । **दिव्वजोओ** द्वितीयशुक्लध्यानाभिधानो वीतरागो निर्विकल्पसमाधिरूपो दिव्ययोगः । कथंभूतः । **मोक्खदो** मोक्षप्रदायकः । क जयतु । **मणसि** मनसि । केषां । **मुणिवराणं** मुनिपुंगवानां । न केवलं योगो जयतु । **केवलो कोवि बोहो** केवलज्ञानाभिधानः कोप्यपूर्वो बोधः । कथंभूतः । **सिवसरूवो** शिवशब्दवाच्यं यदनंतसुखं तत्स्वरूपः । पुनरपि कथंभूतः । **दुल्लहो जो हु लोए** दुर्लभो दुष्प्राप्यः यः स्फुटं । क । लोके । केषां दुर्लभः । **विसयसुहरयाणं** विषयसुखातीतपरमात्मभावनोत्पन्न-परमानंदैकरूपसुखास्वादरहितत्वेन पंचेंद्रियविषयासक्तानामिति भावार्थः ॥ ३४५ ॥

इति 'पऊ जाणंतुवि परममुणि परमंसग्गु चयंति' इत्याद्येकाशीतिसूत्रपर्यंतं सामान्यभेद-भावना, तदनंतरं 'परमसमाहि महासरहिं' इत्यादि चतुर्विंशतिसूत्रपर्यंतं महास्थलं, तदनंतरं वृत्तद्वयं चेति सर्वसमुदायेन सप्ताधिकसूत्रशतेन **द्वितीयमहाधिकारे** चूलिकागतेति ॥ एवमत्र परमात्मप्रकाशाभिधानग्रंथे' प्रथमतस्तावत् 'जे जाया झाणग्गियए, इत्यादि त्रयो-विंशत्यधिकसूत्रशतेन प्रक्षेपकत्रयसहितेन प्रथममहाधिकारो गतः । तदनंतरं चतुर्दशाधिक-शतद्वयेन प्रक्षेपकपंचकसहितेन द्वितीयोपि महाधिकारो गतः । एवं पंचाधिकचत्वारिंशत्स-

---

आगे ग्रंथके अंतमंगलकेलिये आशीर्वादरूप नमस्कार करते हैं;—[**दिव्यकायः**] जिसका ज्ञान आनंदरूप शरीर है अथवा [**परमपदगतानां भासकः**] अरहंतपदको प्राप्त हुए जीवोंका प्रकाशमान परमौदारिक शरीर है ऐसा परमात्म तत्त्व [**जयतु**] सर्वोत्कर्षपनेसे वृद्धिको प्राप्त होवे। जो परमौदारिक शरीर ऐसा है कि जिसका तेज हजारों सूर्योंसे अधिक है अर्थात् सकल प्रकाशी है । जो परमपदको प्राप्त हुए केवली हैं उनको तो साक्षात् दिव्यकाय पुरुषाकार भासता है [**मुनिवराणां**] और जो महामुनि हैं उनके [**मनसि**] मनमें [**दिव्ययोगः**] द्वितीयशुक्लध्यानरूप वीतराग निर्विकल्पसमाधिरूप भास रहा है । [**मोक्षदः**] और मोक्षका देनेवाला है । [**केवलः कोपि बोधः**] जिसका केवल ज्ञान स्वभाव है ऐसी अपूर्व ज्ञानज्योति [**शिवस्वरूपः**] सदा कल्याणरूप है । [**लोके**] लोकमें [**विषयसुखरतानां**] शिवस्वरूप अनंत परमात्माकी भावनासे उत्पन्न जो परमानंद अतींद्रियसुख उससे विपरीत जो पांच इंद्रियोंके विषय उनमें जो आसक्त हैं उनको [**यः हि**] जो परमात्मतत्त्व [**दुर्लभः**] महा दुर्लभ है । **भावार्थ—** इस लोकमें विषयी जीव जिसको नहीं पासकते ऐसा वह परमात्मतत्त्व जयवंत होवे ॥ ३४५ ॥

हितशतत्रयप्रमित श्रीयोगींद्रदेवविरचित दोहकसूत्राणां विवरणभूता **परमात्मप्रकाशवृत्तिः** समाप्ता ॥

इसप्रकार इस **परमात्मप्रकाश**नामा ग्रंथमें पहले 'जे जाया झाणग्गीए' इत्यादि एकसौ तेवीस दोहा तीन प्रक्षेपकों सहित ऐसे १२६ दोहाओंमें पहला अधिकार समाप्त हुआ। एकसौ चौदह दोहा तथा ५ प्रक्षेपक सहित दूसरा महाधिकार कहा। और 'परु जाण-तुंवि' इत्यादि एकसौ सात दोहाओंमें तीसरा महाधिकार कहा। प्रक्षेपक और अंतके दो छंद उन सहित तीनसौ पैंतालीस ३४५ दोहाओंमें परमात्मप्रकाशका व्याख्यान **ब्रह्मदेवकृत टीका सहित** समाप्त हुआ।



---

१ संस्कृत टीकामें दूसरे अधिकारकी चूलिका कही गई है।

टीकाकारस्यांतिमकथनं ।

अत्र ग्रंथे प्रचुरेण पदानां संधिर्न कृतः, वाक्यानि च भिन्नभिन्नानि कृतानि सुखबोधार्थं । किंच परिभाषासूत्रं पदयोः संधिर्विवक्षितो न समासांतरं तयोस्तेन कारणेन लिंगवचन-क्रियाकारकसंधिसमासविशेषणवाक्यसमाप्त्यादिकं दूषणमत्र न ग्राह्यं विद्वद्भिरिति ।

इदं परमात्मप्रकाशवृत्तेर्व्याख्यानं ज्ञात्वा किं कर्तव्यं भव्यजनैः । सहजशुद्धज्ञानानंदैक-स्वभावोऽहं, निर्विकल्पोऽहं उदासीनोऽहं, निजनिरंजनशुद्धात्मसम्यक्श्रद्धानज्ञानानुष्ठानरू-पनिश्चयरत्नत्रयात्मकनिर्विकल्पसमाधिसंजातवीतरागसहजानंदरूपसुखानुभूतिमात्रलक्षणेन स्वसंवेदनज्ञानेन स्वसंवेद्यो गम्यः प्राप्यो भरितावस्थोऽहं, रागद्वेषमोहक्रोधमानमायालोभ-

---

टीकाकारका अंतिमकथन ।

इस ग्रंथमें बहुधा पदोंकी संधि नहीं की और वचन भी जुदे २ सुखसे समझनेकेलिये रक्खे गये हैं, समझनेकेलिये कठिन संस्कृत नहीं रक्खी इसलिये यहां लिंग वचन क्रिया कारक संधि समास विशेष्य विशेषणके दोष न लेना । जो पंडितजन विशेषज्ञ हैं वे ऐसा समझें कि यह ग्रंथ बालबुद्धियोंके समझानेकेलिये सुगम किया है । इस परमात्मप्रकाशकी टीकाका व्याख्यान जानकर भव्यजीवोंको ऐसा विचार करना चाहिये कि मैं सहज शुद्ध ज्ञानानंद स्वभाव निर्विकल्प हूं, उदासीन हूं, निजानंद निरंजन शुद्धात्म सम्यग्दर्शन सम्यग्ज्ञान और सम्यक् चारित्ररूप निश्चयरत्नत्रयमई निर्विकल्पसमाधिसे उत्पन्न वीतरागसहजानंदरूप आनंदानुभूतिमात्र जो स्वसंवेदनज्ञान उससे गम्य हूं, अन्य उपायोंसे गम्य नहीं हूं । निर्विकल्प निजानंद ज्ञानकर ही मेरी प्राप्ति है पूर्ण हूं । राग द्वेष मोह क्रोध मान माया लोभ पांच इंद्रियोंके विषय व्यापार मन वचन काय द्रव्यकर्म भावकर्म नोकर्म ख्याति पूजा लाभ देखे सुने और अनुभवे भोगोंकी वांछारूप निदानबंध, माया मिथ्या ये तीन शल्य इत्यादि विभाव परिणामोंसे रहित सब प्रपंचोंसे रहित मैं हूं । तीन लोक तीनकालमें मन वचन कायकर कृत कारित अनुमोदनाकर शुद्ध निश्चयनयसे मैं आत्माराम ऐसा हूं । तथा सभी जीव ऐसे हैं । ऐसी हमेशा भावना करनी चाहिये । अब टीकाकारके अंतके श्लोकका अर्थ कहते हैंः—युधिष्ठिरराजाको आदि लेकर पांच भाई पांडव और श्री रामचंद्र तथा अन्य भी विवेकी राजा हैं उनसे अत्यंत भक्तिकर यह जिनशासन पूजनीक है जिसको सुर नाग भी पूजते हैं ऐसा श्री जिन भाषित शासन

पंचेंद्रियविषयव्यापारमनोवचनकायव्यापारभावकर्मद्रव्यकर्मनोकर्मख्यातिपूजालाभदृष्टश्रुतानुभूतभोगाकांक्षारूपनिदानमायामिथ्याशल्यत्रयादिसर्वविभावपरिणामरहितशून्योऽहं, जगत्त्रये कालत्रयेपि मनोवचनकायैः कृतकारितानुमतैश्च शुद्धनिश्चयनयेन । तथा सर्वेपि जीवाः, इति निरंतरं भावना कर्तव्येति ॥ ग्रंथसंख्या ४००० ।

पंडवरामहिं णरवरहिं, पुज्जिउ भत्तिभरेण ।
सिरिसासणु जिणभासियउ, णंदउ सुक्खसएहिं ॥ १ ॥

इति श्रीब्रह्मदेवविरचिता
परमात्मप्रकाशवृत्तिः समाप्ता ।

सुखोंके सैकड़ाओंकर वृद्धिको प्राप्त होवे ॥ यह परमात्मप्रकाश ग्रंथका व्याख्यान प्रभाकर भट्टके संबोधनेकेलिये श्रीयोगींद्रदेवने किया उसपर श्री ब्रह्मदेवने संस्कृतटीका की । श्री योगींद्रदेवने प्रभाकरभट्टके समझानेकेलिये तीनसौ तेतालीस दोहा किये उसपर श्री ब्रह्मदेवने संस्कृतटीका पांच हजार चार प्रमाण की । उसपर दौलतरामने भाषावचनिकाके श्लोक अडसठिसौ नव्वै संख्याप्रमाण किये ।

इसप्रकार श्री **योगींद्राचार्य** विरचित परमात्मप्रकाशकी
पं० **दौलतराम** कृत **भाषाटीका** समाप्त हुई.

समाप्त.

---

१ पांडवरामैः नरवरैः पूजितः भक्तिभरेण । श्रीशासनं जिनभाषितं नंदतु सुखशतैः ॥ १ ॥

अथ परमात्मप्रकाशस्य विषयानुक्रमणिका ।